वि.सं.-२०७३
वर्ष-५
अङ्क-१

श्रेयोभूता शब्दसिद्धिः, पदसिद्धिश्च श्रेयसे ।
वचःसिद्धिस्ततो नित्यं, निःश्रेयसपदप्रदा ॥

# श्री निःश्रेयसम्

## षाणमासिक-पत्रम्

९

सम्पादकः
मुनिश्रीसम्यग्दर्शनविजयगणिः

यत् पत्रं शुभभावभासुरगुणं, स्पष्टं रुचेत् सत्वरम्,
वाचं स्काश्विचारसारकलितं, माधुर्यभावाकरम्।
कल्याणं च करोति स्वात्महितदं, सन्मार्गप्रस्थापकम्,
तं पत्रं निःश्रेयसं भविजन!, निःश्रेयसाय श्रय।।

वि.सं.-२०७३
वर्ष-५
अङ्क-१

श्रेयोभूता शब्दसिद्धिः, पदसिद्धिश्च श्रेयसे ।
वच:सिद्धिस्ततो नित्यं, नि:श्रेयसपदप्रदा ।।

# श्री नि:श्रेयसम्

## षाण्मासिक-पत्रम्

९

श्री सुधर्मास्वामि जैन ज्ञानभंडार
C/o. विमुक्ति विश्व विद्यालय
हिराजैन सोसायटी के पास, रामनगर,
साबरमती, अहमदाबाद - 380005
फोन नं.:-(079) 55220409

सम्पादक:
मुनिश्रीसम्यग्दर्शनविजयगणि

|| णमोत्थुणं समणस्स भगवओ महावीरस्स ||
|| ॐ ह्रीँ श्री शंखेश्वरपार्श्वनाथाय नमः ||
|| पू.आत्म-कमल-वीर-दान-प्रेम-रामचन्द्रसूरिसद्गुरुभ्यो नमः ||
||पू.मुक्तिचन्द्र-महोदय-ललितशेखर-जयकुञ्जर-मुक्तिप्रभ-हेमभूषणसूरीभ्यो नमः||

**श्रीनिःश्रेयसम् (षाण्मासिक-पत्रम्-९)**
वर्ष : ५ अङ्क = १

**निमित्तम् :**
जैनशासनज्योतिर्धर पू.आ.श्रीविजय**रामचन्द्र**सूरीश्वराणां दीक्षाशताब्दीचर्ष-वि.सं.२०६९

**आशीर्वाद :**
सुविशालगच्छनायक पू.आ.श्री विजय**पुण्यपाल**सूरीश्वराः
प्रवचनप्रभावक पू.आ.श्री विजय**मुक्तिप्रभ**सूरीश्वराः
वात्सल्यवारिधि पू.पं.श्री **वज्रसेन**विजयगणिवराः

**प्रेरणा :**
प्रसिद्धप्रवचनकार पू.आ.श्री विजय**श्रेयांसप्रभ**सूरीश्वराः
प्रवचनकुशल पू.आ.श्री विजय**हेमप्रभ**सूरीश्वराः

**सम्पादनम् :**
पूज्यमुनिप्रवरश्री**सम्यग्दर्शन**विजयगणिवरः

**संशोधनम् :**
पूज्य साध्वीजीश्री **प्रशमनिधि**श्रीः
पं.श्री **अमृत**भाई पटेलः

**प्रकाशनप्रतिष्ठानम् :**
**जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्**
ए-१, घनश्यामपार्क फ्लेट, १७, आनंदनगर सोसायटी,
त्रिशला फ्लेट के सामने, भट्ठा, पालडी, अहमदाबाद फोन : (ओ) २६६० ५८६४

**प्रकाशनम् :**
वैक्रमीय २०७३, पोष शुक्लात्रयोदशी,
मंगलवार, दि. १०-१-२०१७

**प्रतयः** ७५० **मूल्यम् :** २००

---

**आभारः....अनुग्रहः....अनुमोदनम्....**

प्रसिद्धप्रवचनकारपूज्यपादाचार्यप्रवरश्रीमद्विजय**श्रेयांसप्रभसूरी**श्वराणामुपकारस्मृत्यर्थम्
वर्षिल अशोक छेडाया आत्मश्रेयार्थञ्च अशोक भवानजीभाई छेडा परिवारेण
अस्मिन् ग्रन्थे द्रव्यव्ययेन सुकृतसञ्चयः कृतस्तमनुमोदयति...
**जगद्गुरु पू.आ.श्री विजय हीरसूरीश्वरजी श्रुतज्ञानभवनस्य**
**सञ्चालकगणः**

# ।। चयं रिक्तीकरोति इति चारित्रम् ।।

● सञ्चितं कर्म रिक्तीकरोति इति चारित्रम्। चयः-ज्ञानावरणीय-वेदनीय-मोहनीयायुष्य-नाम-गोत्रान्तरायस्वरूपाष्टप्रकाराणां कर्मणां सञ्चयः यो जीवैः स्वात्मप्रदेशैः सहैकीकृतः निबद्धः स्वात्मसात् कृतस्तम् रीक्तीकरोति-विफलीकरोति यत् तच्चारित्रम्। तच्चयात्मके कर्मबन्धे मिथ्यात्वाविरति-प्रमाद-कषाय-योगादीनि पञ्चकारणानि शास्त्रे निर्दिश्यन्ते।

तत्र-**मिथ्यात्वं** - सुदेवगुरूधर्मेषु असदितिमतिः, कुदेवगुरुधर्मेषु सदिति मतिः अुवा सत्येषु असत्यता मतिः, असत्येषुसत्यतामतिःस्तन् मिथ्यात्वम्। **अविरतिः**-देशतः सर्वतो वा हिंसामृषाचौर्याब्रह्म-परिग्रहादिपापस्थानैरविरमणम्सा-अविरतिः। **प्रमादः**-मद्यंविषय-कषायनिद्राविकथा इति पञ्चप्रकारः प्रमादः। **कषायः**-क्रोधमानमायालोभस्वरूपाश्चत्वारो मूलकषायाः। ते तु अनन्तानुबन्ध्यप्रत्याख्यान-प्रत्याख्यानसंज्वलनभेदैः षोडशप्रकारा भवन्ति। चतुःषष्ठिभेदा अपि भवन्ति। ते तु शास्त्रान्तरेभ्यः द्रष्टव्याः। **योगः**- मनोवचनकायानां विविधो व्यापारः।

एतैः हेतुस्वरूपैः पञ्चभिः प्रकारैः जीवाः कर्म बध्नन्ति। तत् कर्मणां आत्मनः रिक्तीकरणकार्यं चारित्रं करोति। तच्चारित्रम् द्विविधम् प्रोक्तम् लौकिकं लोकोत्तरञ्च, तदपि द्विविधं शुद्धमशुद्धञ्च। तत्रः-

**शुद्धं लौकिकचारित्रम्**- इहामुत्रस्वेष्टधनस्वजनगृहस्वर्णादिप्राप्त्यर्थं सांसारिकसुखाभि-काङ्क्षा-सिद्ध्यर्थम् माननं, पूजनं, वन्दनं, तप-श्चरणादिकरणं तद् **शुद्धं लौकिकचारित्रम्। अशुद्धं लौकिकचारित्रं** - यदकामेन-अनिच्छया कष्टसहनम् तद्, यथा पश्वादयः। पुनश्च स्वेप्सितवस्तु-व्यक्तिप्राप्त्यर्थं, अग्निस्नानपर्वतजलपतनादयः मोक्षेच्छाविरुद्धत्वादकामेन क्रियते तद् **अशुद्धं लौकिकचारित्रम्। शुद्धं लोकोत्तरचारित्रं**-मोक्षसुखसंसाधनाय वीतरागदेवाज्ञानुसारी देव-गुरु-धर्मराधनरूपं यदनुष्ठानं संयम-दया-शील-दान-तपश्चरणादिकम् तद् **शुद्धं लोकोत्तरचारित्रम्**।
**अशुद्धं लोकोत्तरचारित्रं**-मोक्षसुखसंसाधकदेव-गुरु-धर्मादिसेवनेन इहामुत्र सांसारिकसुखेच्छा, **तदशुद्धं लोकोत्तरचारित्रम्**। अथवा - चर्यते ब्रह्मणि इति चारित्रम्। अथवा - चर्यते सदाचारे धर्मे येन तच्चारित्रम्। अथवा - च=चत्वारः कषायाः अथवा चतुर्गतिकः संसारः, स एव अरिः = शत्रु तेन त्र = त्रायते तच्चारित्रम्।। अथवा चारि=पशुनामदनम्-तृणादिकम् तुच्छप्रकारं, तद्वत् संसारभोगसुखं तस्मात्, त्र=त्रायते इति चारित्रम्।

ईदृशं चारित्रं प्रकटीकरोति स्वात्मनि विनयनम्रतासौजन्यादिसद्गुणान्। आविर्भावयति दयासंयमतपश्चरणम्।

स्वभावदर्शिकाम् अध्यात्मभावसंपदां नयति। समताभावमभिव्यनक्ति। किं बहुना-अध्यात्मजनितसर्वसंपदो दापयति। यावदक्षयममलमपुनरावृत्तिकमव्याबाधं स्थानं निःश्रेयसमपि तेनैव लभ्यते। अत्र पत्रके चारित्रलाभसाधनं सरलतयोपढौकितं। येन लेखक-वाचक सुहृज्जनाश्चारित्रवन्तो भवेयुः। अत एवास्माकमयं प्रयासलेशः। ततश्चैव परमनिःश्रेयसपदमपि प्राप्नुयुः।

इति शम्।।

**- परमश्रद्धेयगुरुदेवश्रीमद्विजयश्रेयांसप्रभसूरीश्वर-**
**चरणसेवाहेवाकी मुनिसम्यग्दर्शनविजयगणि**

# क्रमनिर्देशः


| **विषयः** | **लेखकादयः** | **पृष्ठम्** |
|---|---|---|
| प्रतिघोषः | | १ |
| **विभाग : १ प्राचीन कृतयः** | | |
| **खण्ड १ पूर्वमहर्षीणां वचनामृतम्...** | | |
| जयसागरगणिप्रणीतम् श्रीस्तम्भनकपार्श्वजिनस्तवनम् | मुनिश्री वैराग्यरतिविजयः | ३ |
| श्रीसिद्धसेनसूरिप्रणीता पूजा-चतुर्विंशतिका | साध्वीजीश्री कल्पप्रियाश्रीः | ४ |
| कल्याणमन्दिरस्तोत्रम् | अमृत पटेलः | ७ |
| **विभागः -२ अर्वाचीनकृतयः** | | |
| **खण्ड : २ यशोप्रज्ञादर्शनम्** | | |
| परमज्योतिः पञ्चविंशतिका | आचार्यश्रीविजय कल्याणबोधिसूरिः | २० |
| वृत्तं यशोविजयवाचकपुङ्गवानाम् | मुनिश्री सम्यग्दर्शनविजयगणि | २० |
| **खण्ड : ३ सूरिरामचन्द्र दीक्षाशताब्दी भावाञ्जलिः** | | |
| श्री प्रेमशतकम् | आचार्यश्रीविजय मुक्तिप्रभसूरिः | २५ |
| श्रीरामचन्द्रीय महाकाव्यम् | पन्यासप्रवरश्रीमोक्षरतिविजय गणि | २८ |
| **खण्ड : ४ प्रकीर्णककृतयः** | | |
| आगमस्यामृतम् | आचार्यश्रीविजय कल्याणबोधिसूरिः | ३२ |
| गृद्धिः | श्रीकमलः | ३३ |
| श्रीचारित्रसप्तविंशिका-८-११ | मुनिश्री सम्यग्दर्शनविजयगणि | ३५ |
| स्वरूपसुधा | प्रियम् | ४० |
| अस्ति सुखम् संसारे? | मुनिश्री प्रियंकरप्रभविजयः | ४५ |
| श्रीजीरावलापार्श्वप्रभुस्तोत्रम् | मुनिश्री ज्ञानभूषणविजयः | ४९ |
| "धर्मबिन्दु"- | मुनिश्री आत्मदर्शनविजयः | ५१ |
| मरीचिकृतस्योउत्सूत्रस्य विचारः | मुनिश्री पद्मकीर्तिविजयः | ५९ |
| बहुरत्ना वसुन्धरा | मुनिश्री दर्शनरक्षितविजयः | ६१ |
| आत्महितोपदेशः | मुनिश्री दर्शनरक्षितविजयः | ६२ |
| स सज्जनः | मुनिश्री प्रशमरक्षितविजयः | ६४ |
| बालमुनिवराष्टकम् | मुनिश्री प्रशमरक्षितविजयः | ६८ |
| ऐकाक्षरीय जिनभक्तिकाव्यम् | मुनिश्री हीरभूषणविजयः | ६९ |
| श्री शङ्खेश्वरपार्श्वनाथ पदनवकं | मुनिश्री हीरभूषणविजयः | ७१ |
| श्रेयस्करीजिनस्तुतिचतुर्विंशी | साध्वीजीश्री प्रशमनिधिश्रीः | ७६ |
| काव्यशास्त्र-विनोदेन | साध्वीजीश्री प्रशमनिधिश्रीः | ८२ |
| विश्वजनीनः प्रसारः संस्कृतभाषायाः | म.म.देवर्षि कलानाथ शास्त्री | ८३ |
| **खण्ड : ५ नित्यशीर्षककृतयः** | | |
| चतुर्दशलेखसङ्ग्रहः | श्रेयःसरित् प्रभृतयः | ८८ |

# प्रतिघोषः

मान्याः!

सादरं प्रणामाः।

'श्रीनिःश्रेसस्य' अष्टमोऽङ्कोऽधिगतः। अनेका रचना रमणीयाः पठनीयाश्च। सम्पादकीयं नितरां प्रसादयति। जैनदर्शनसाहित्यादिसंवर्धनेन सह यद्याधुनिकविषया अपि भवेयुः-तर्हि सर्वे संस्कृतज्ञा विशेषेण सन्तुष्टा स्युरिति मन्यतेऽयं जनः।

विनीतः

**रूपनारायणपाण्डेयः**

मो.८८३६८३०५७५

मनीकापूरा, सोहमः, प्रयागः, उ.प्र.

पीन : २१२५०२

* * *

**सादरं वन्दनम्...**

संस्कृतभाषां भारतस्य निधिं मन्वानाः सर्वेऽपि विद्वांसः, सर्वधर्मानुयायिनो मनीषिण एनां प्रति सुतरामात्मीयस्नेहभावनां बिभ्रति। कामं ते हिन्दवः स्युः महिम्मदाः स्युः, ख्रिस्तीयाः स्युः, वैदिकाः स्युः, जैनाः स्युः, बौद्धाः स्युः। इयमेव सार्वदैशिकता, सार्वधार्मिकता च संस्कृतभाषाया एनां विश्वजनीनां प्रख्यापयति। इयमेवास्ति श्रेयस्करी अद्य विश्वमानवीयाया एकताया युगे। **"निःश्रेयसम्"** सदृश्यः पत्रिकास्तथ्यस्यास्य प्रत्यक्षं निदर्शनानीति किमधिकं विस्तरेण।

**– म.म. देवर्षिकलानाथ शास्त्री**

"भारती" संस्कृतमासिकपत्रिकायाः

अध्यक्षः

सी/८ पृथ्वीराज रोड, सी स्कीम,

जयपुर-३०२००१. राजस्थान.



# विभाग : १
# प्राचीनकृतयः

## खण्ड : १ पूर्वमहर्षीणां वचनामृतम्...

भो: भो: वाचक महोदया:!

श्रवसी चेतश्च स्थापयत! वचनमवधारयत!

किञ्चित् स्वादयत! आस्वादयत!

श्री नि:श्रेयसस्य नवमाङ्के प्रथम विभागे पूर्वर्षिरचितं अद्यावधि अपूर्वोऽ-प्रकटः साहित्यरसः प्रस्तूयते । यतः पूर्वर्षिमहामतीनां चारित्रेण महामहिममहारथिना मोक्षलक्ष्यलक्षितभवोद्धारक-क्रियाकलापहेतिभि: संसारनाटकसूत्रधारो महामोहो ध्वस्तप्रायोऽकरोत्। ततः एव रागद्वेषनामकं मुरजं विनष्टं। तस्य च दुष्टाभिसन्धिनामवादको बद्धः। तत्रैव मारिता: रागाद्युद्घोषका: मान-क्रोधादय:।

तेन विषयाभिलाषाभिधानः नांदीपाठक: निष्चेष्टीकृत:, कामाख्यविदूषको निर्निमेषलोचनो कारित:। सञ्जातानि सर्वपात्राणि हत-प्रहतानि। एवं विनष्टसंसारनाटकानां तेषां संयतानां संयतोपासकानाञ्च अध्यात्मसाम्राज्यं संप्राप्तम्। तेषां जीवनं परमपावनम्। तेषां हृदयमपि भगवद्वचनेन भावितम्। ततो जिनवचनबलेन तेऽस्मानपि **नि:श्रेयस**-राज्यं प्रापयन्त्येव। अत एव तैः सन्दृब्धं हितंमधुरवचनमत्र प्रस्तुतम्।

**'परम:'**

# जयसागरगणिप्रणीतम् श्रीस्तम्भनकपार्श्व-जिनस्तवनम्

-* मुनिश्री वैराग्यरतिविजय गणि

योगात्मनामप्यरं परंपरं भिन्दाना मनः सकलं कलंकलम् ।
वामेयमाहुः सदयोदयो दयो मुदे स मे, दभ्र महा महा महा ।।१।।

अहो तवास्थावरणे रणे रणे यदद्भुताकारधराधरा (धरा) ।
स्वरागनास्वान्तमना मना मना, न यद्विकारं नवभा वभा वभा ।।२।।

विभो! तवासेवनयाऽनयानया, निवारिताऽवाच्यमया मया मया ।
अतः प्रसादाद् भवतो वतो वतो, तीर्णोऽस्मि दुःखात् परमा रमा रमा ।।३।।

यन्मौलिदेशे त्वमदा मदा मदा, वाञ्छार्थसम्पत्तिकरं करं करम् ।
न तन्मनोऽरंस्त हरौ हरौ हरौ, मायामयेनापि भवे भवे भवे ।।४।।

दिष्ट्या स्तम्भनकेशपार्श्वभगवन्! नानागुणग्रामणी-
रेषा **श्रीजयसागरेण** रचिता स्वल्पाक्षरापि स्तुतिः ।
तर्कव्याकरणादिशास्त्रविदुषां यायादुपादेयतां ।
सौवर्णाभरणं सुरत्नखचितं यद् वा न कस्य प्रियम् ।।५।।

।। इति श्रीपार्श्वस्तवनम् ।।

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्तिः ।

## श्रीसिद्धसेनसूरिप्रणीता
# पूजा-चतुर्विंशतिका

- पुनःसंपा. *साध्वीजीश्रीकल्पप्रियाश्रीः

नमिऊणं वद्धमाणं, धम्मनिहाणं जिणंदणुट्ठाणं।
वुच्छामि विबुहजणमणनिव्वुइजणयं खु भावविहिं ॥१॥

अज्झप्पजोगजुत्तिहिं भव्वेहिं सया वि सावयजणेहिं।
कायव्वा जिणपूया, भावप्पसू दव्वगुणजुत्ता ॥२॥

पुज्जाणं जा पूया सा पूया अप्पसुद्धिणो हेऊ।
अप्पपरम (प्प) रूवप्पगडणसंसाहिणी भणिया ॥३॥

तत्थ य सुहरुइभूमि, पहुगुणसलिलं खु तत्थ दंतवणं।
जा [1]तज्जोगऽपमत्ता, सा णेया दंतवणसुद्धी ॥४॥

मिच्छत्तमलिणभावाऽवणयणन्हाणं अपच्छिंतणुलुहणं।
धिइतोसधवलवत्थे, कम्मट्ठगत्थगणं मुहकोसो ॥५॥

एकग्गचित्तभावो उवलो, सद्धा य चंदणुल्लेवो।
सुहझाणरंगजुत्तो, पावयणभत्ती परमपत्तं ॥६॥

पणववहार पणंगी, पवयणजुत्तं विसेसयं भाले।
अ(ब) ज्झ विभावहरणं, निमल्लुत्तारणं णेयं ॥७॥

भूसणमुज्झणमुवहिभावच्चयणं च अंगसब्भावो।
भूसणपरिहावणयं अज्झप्पसहावणुब्भावो ॥८॥

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्तिनी।
१. जोगऽप्पमत्तया जा इति पाठः स्यात्।

विसयकसायग्गिसमो, चंदणलेवो नियाणनिज्जवणं।
जीवाईनवपयत्थतत्तं नवबंभसुद्धि वा ।।९।।

पंचाचारविसुद्धि, पणलक्खणभूसणाइ सम्मस्स।
पुप्फोवयारकरणं, तं पुण मालावरोहणयं ।।१०।।

तत्तनयमाणचिंताधयपुण्णो नाणदीवाओ जलिओ।
तण्णिट्ठा य सरावंसुहकिरिया धूवपरिवाडी ।।११।।

धम्मज्झाणग्गिजुया गयदूसणता णवंग अणुभासो।
विहिकरणाइसुवासो परिमलपब्भार मुद्दिट्ठो ।।१२।।

सुक्कज्झाणालंबणचामरसेढी य छत्तसुक्कप्पा।
अडमयठाणोज्झावणमडमंगलठावणं पुरओ ।।१३।।

नाणायाराइ तंदुललिहणमगिद्धित्ति सारमारत्ती।
लवणोत्तारण कित्तिमधम्मच्चयणं विणिद्दिट्ठं ।।१४।।

अविहिअहम्मपरूवणजणिया जाऽऽसायणापरिच्चाओ।
आरत्तियउत्तारो दुगवेलं सड्ढमित्थ तुरो ।।१५।।

कुनरकुदेवदुहत्तं, दुहदुग्गमणपुव्वुत्तं।
अहवा अड्ढाइज्जे, दीवंमि तत्थइक्कारा ।।१६।।

जो सुद्धधम्मपयडणुब्भावण परभा (मा) य गुणसमिद्धा य।
मंगलपईवसेणी, कायव्वा दुहतमोहोई (हरणी) ।।१७।।

नीरयनिम्मलसीयलसुब्भिगंधा सुहा य इच्चाइ।
तियकरणावंचणया, बोहिफलमपुणबंधत्तं ।।१८।।

अणुभवरससंपुण्णा, पुग्गलदव्वाण जा अणासंसा।
इच्चाइ भावजणिया, अडप्पयारी भवे पूया ।।१९।।

अडंगजोगसाहण अडभयठाणवज्जणारूवा।
दुट्ठट्ठकम्ममहणट्ठमयाए अडमंगलालिहयणं ।।२०।।

पूया समाहिजणणी, अप्पपरविवेयणी य दुहमहणी।
दुट्ठट्ठकम्ममहणी, निट्ठवणी सच्चवायाणं ।।२१।।

कारुण्णसमुब्भवणी, सब्भावणभाविणी पुमत्थस्स।
वोदाणमणिण्हयस्सऽप्पभावसामत्थसुद्धिकरी ।।२२।।

निच्चं जईणमेसा, भावविसेसेहिं जाव सेलेसी।
सड्ढाणं पुण महग्घदव्वेहिं हवइ भावजुया ।।२३।।

पूया परमसहावा, भुवणपडाया समत्थवित्थारा।
उज्जोयपवणलुलिया, जयउ चिरं भावणाकलसे ।।२४।।

पुव्वाओ उद्धरिया, चउविसी **सिद्धसेण**सूरीहिं।
[1]बीयाऽबीयप्पभावा, दंसणकप्पदुमस्सेसा ।।२५।।

।। इति पूजा चोविशी द्वितीया।। इति श्रीसिद्धसेन विरचितायां चतुर्विंशतिकायां द्वितीया चतुर्विंशतिका समाप्ता ।।

१. प्राकृतमां द्वितीयनुं ''बीय'' रुप बने छे. माटे अद्वितीय अर्थ साचो छे अमृत।

# सौभाग्यमञ्जरीवृत्तिसमेतम्।।
# कल्याणमन्दिरस्तोत्रम्
**(उत्तरार्धः)**

**- *अमृत पटेलः**

**२३. श्यामं गभीरगिरमुज्ज्वल-हेम-रत्न-**
**सिंहासनस्थमिह भव्यशिखण्डिनस् त्वाम्।**
**आलोकयन्ति रभसेन नदन्तमुच्चैश्-**
**चामीकराद्रिशिरसीव नवाम्बुवाहम्।।२३।।**

**सौ.मं.** हे प्रभो! हे स्वामिन्! इह समवसरणे, श्यामं गगभीरगिरमुज्ज्वलहेमरत्न-सिंहासनस्थं, इह भव्यशिखण्डिनो-भव्यमयूरा रभसेन वेगेन त्वां आलोकयन्ति-अवलोकयन्ति-पश्यन्ति। किंलक्षणं त्वाम्? **श्यामं** नीलं-कृष्णनीलं (चामरकं.K)। भगवान् श्रीपार्श्वनाथो नीलवर्णः इन्दीवरकान्तिः। पुनः किंलक्षणं त्वाम्? गभीरगिरम्। गभीरा गीर्यस्य स गभीरगीः, तं गभीरगिरम्-गम्भीरशब्दम्। पुनरपि किंलक्षणं त्वाम्? उज्ज्वलहेमरत्न-सिंहासनस्थम्[१]। उज्ज्वलहेमरत्नखचितसिंहासनस्थितम्। पूर्वार्धं जातं, उत्तरार्धं यथा- आलकयन्ति रभसेन नदन्तमुच्चैश्चामीकराद्रिशिखर आसीननवम्बुवाहम्। भव्यशिखण्डिनः त्वां आलोकयन्ति। त्वां कमिव? नवाम्बुवाहमिव नवीनमेघमिव। यथा शिखण्डिनो मयूराश्चामीकराद्रिशिरसि-मेरुपर्वतशृङ्गे स्थितं नवाम्बुवाहं-मेघं (आलोक-यन्ति) अवलोकयन्ति। किं लक्षणं नवाम्बुवाहम्? उच्चैर्नदन्तं अतिशयेन शब्दाय-मानम्।।२३।।

---

* व्याकरण काव्य-छन्दादिनामध्यापकः

१. उज्ज्वलहेम-रत्नसिंहासने तिष्ठति इति उज्ज्वल हेमरत्नसिंहासनस्थः, तं उज्ज्वलहेमरत्नसिंहासनस्थं K पाठः।

२४. **उद्गच्छता तव शितिद्युति-मण्डलेन,**

**लुप्तच्छदच्छविरशोकतरुर् बभूव।**

**सान्निध्यतोऽपि यदि वा तव वीतराग!,**

**नीरागतां व्रजति को न सचेतनोऽपि ।।२५।।**

**सौ.म.**-हे प्रभो! हे स्वामिन्! अशोकवृक्षः लुप्तच्छदच्छविर्बभूव। लुप्ता छदानां पत्राणां छविर्यस्य स लुप्तच्छदच्छविः। स्वकीयवर्णं मुक्त्वा वर्णान्तरं प्राप्त इत्यर्थः। केन? तव शितिद्युतिमण्डलेन। [१]कालोऽसितः शितिः। परमेश्वरस्य श्रीपार्श्वनाथस्य शरीरकान्तिः छविः नीलवर्णा वर्तते। अत एव (मूर्ध्नः) पृष्ठप्रदेशे भामण्डलं नीलम्। किंलक्षणेन? [२]असितद्युतिमण्डलेन? उद्गच्छता उत्-ऊर्ध्वं गच्छता प्रसरता। सानिध्यतोऽपि यदि वा तव वीतराग! नीरागतां व्रजति को न सचेतनोऽपि। यदि वाऽथवा हे वीतराग! तव सानिध्यतोऽपि तव समीपात् (सामीप्या)त्, कः सचेतनोऽपि प्राणी नीरागतां रागरहितत्वं न व्रजति, अपि तु सर्वः कोऽपि नीरागतां व्रजति। नीरागस्य भावो नीरागता, तां नीरागताम्। अचेतनोऽपि जगन्नाथसमीपाद्[३] यदि नीरागतां व्रजति तदा सचेतनस्य का वार्ता? अत्र को भावः? अशोकवृक्षस्य पत्राणि अरुणानि वर्त्तन्ते। भगवतो भामण्डलसंसर्गात् अशोकवृक्षपत्राणि नीलभावं प्रपन्नानि इति भावः।।२४।।

२४. **"भो भोः प्रमादमवधूय भजध्वमेन-**

**मागत्य निर्वृतिपुरीं प्रति सार्थवाहम्"**

**एतन्निवेदयति देव! जगत्त्रयाय,**

**मन्ये नदन्नभिनभः सुर-दुन्दुभिस् ते।।२५।।**

**सौ.मं.**-हे देव! अहं एवं मन्ये। ते तव, सुरदुन्दुभिर् दुन्दुभिः, जगत्त्रय एतन्निवेदयति कथयति। एतत् किम्[४]? भो भो लोकाः! यूयं आगत्य प्रमादं आलस्यं, अवधूय त्यक्त्वा, एनं स्वामिनं श्रीपार्श्वनाथं, भजध्वं-सेवध्वं-आश्रयध्वम्। किंलक्षणं एनम्? निवृतिपुरीं प्रति सार्थवाहम्। मुक्तिनगरीं प्रति सार्थवाहम्, भगवति सेविते सति मुक्तिर्लभ्यते, नात्र सन्देहः। किं लक्षणः सुरदुन्दुभिः? अभिनभः आकाशसमीपं नदन् आकाशे गर्जन्।।२५।।

१. 'कालो नीलोऽसितः, शितिः-अभि.चिन्ता.१३९७। २. शितिद्युति। ३. सामीप्यं प्राप्य। ४. भो भो प्रमादमवधूय इति।

२६. **उद्योतितेषु भवता भुवनेषु नाथ!,**

**तारान्वितो विधुरयं विहताधिकारः**

**मुक्ता-कलाप-कलितो-च्छ्वसितातपत्र-**

**व्याजात् त्रिधा धृत-तनुर्ध्रुवमभ्युपेतः।।२६।।**

**सौ.मं.**- हे नाथ! तारान्वितः तारासंयुक्तः, अयं विधुश्चन्द्रः, ध्रुवं निश्चितं त्वां प्रति अभ्युपेतः तव सेवार्थं समागतः। किं लक्षणो विधुश्चन्द्रः? त्रिधा धृततनुः। 'त्रिधा' त्रिभिः प्रकारैः, धृतः तनुर्येन, चन्द्रेण निजं शरीरं त्रिधाकृतम्। कस्मात्? मुक्ताकलाप-कलितोच्छ्वसिताऽऽतपत्रव्याजात्। 'मुक्ताकलापेन' मुक्तासमूहेन, 'कलितं' संयुक्तं सत्, 'उच्छ्वसितं' विकसितं यद् 'आतपत्रं'-मुक्ता कलापकालितोच्छ्वसिताऽऽतपत्रं, तस्य व्याजं, तस्मात् मुक्ता कलापकलितोच्छ्वसितातपत्रव्याजात्, मुक्ताफलसमूहसंयुक्त-विकसितछत्रमिषात्। पुनः किंलक्षणो विधुश्चन्द्रः? विहताधिकारः-विगलिताधिकारः। विहतोऽधिकारो यस्य स विहताधिकारः। केषु सत्सु? भवता त्वया भुवनेषु त्रिभुवनेषु उद्योतितेषु सत्सु।।२६।।

२७. **स्वेन प्रपूरितजगत्त्रय-पिण्डितेन,**

**कान्ति-प्रताप-यशसामिव सञ्चयेन।**

**माणिक्य-हेम-रजत-प्रविनिर्मितेन,**

[१] **साल-त्रयेण भगवन्नभितो विभासि ।।२७।।**

**सौ.मं.**- हे भगवन्! त्वं सालत्रयेण अभितः समन्तात् विभासि शोभसे। किं लक्षणेन सालत्रयेण? माणिक्य-हेम-रजत-प्रविनिर्मितेन-माणिक्य-स्वर्ण-रूप्यरचितेन, माणिक्यं च हेम च रजतं च-माणिक्य-हेम-रजतानि, तैः प्रविनिर्मितः, माणिक्य-हेम रजतप्रविनिर्मितः, तेन माणिक्य-हेम-रजतप्रविनिर्मितेन। पुनः किंलक्षणेन सालत्रयेण? उत्प्रेक्ष्यते-स्वेन आत्मीयेन कान्तिप्रतापयशसां सञ्चयेन इव, उत्प्रेक्षालङ्कारः। किंलक्षणेन कान्ति-प्रताप-यशसां सञ्चयेन? प्रपूरितजगत्त्रितयपिण्डितेन जगतत्त्रितयं पूरयित्वा पिण्डीभूतेन।।२७।।

---

१. 'शाल' पाठो हस्तप्रतौ।

२८. **दिव्य-स्रजो जिन! नमत्त्रिशाधिपाना-**

**मृत्सृज्य रत्न-रचितानपि मौलि-बन्धान्।**

**पादौ श्रयन्ति भवतो यदि वा परत्र,**

**त्वत्सङ्गमे सुमनसो न रमन्त एव।।२८।।**

**सौ.मं.-** हे जिन! दिव्यस्रजो देवकुसुममाला भवतः पादौ श्रयन्ति। किं कृत्वा? नमत्त्रिदशाधिपानां-नमद्देवेन्द्राणां, मौलिबन्धनान् मुकुटमणिबन्धान्। उत्सृज्य परित्यज्य। किं लक्षणान् मौलिबन्धान्? रत्नरचितानपि, यदि वा परत्र परलोके, त्वत्संगमे सुमनसः पुरुषाः किं न रमन्ते? अपि तु रमन्त एव। शोभनं मनो येषां ते सुमनसो मनुष्याः, पक्षे सुमनसः कुसुमानि। पुष्पं सूनं सुमनसः हैमीनाममालायाम् (११२५) ।।२८।।

२९. **त्वं नाथ! जन्मजलधेर्विपराङ्मुखोऽपि,**

**यत् तारयस्यसुमतो निजपृष्ठलग्नान्।**

**युक्तं हि पार्थिवनिपस्य सतस्तवैव,**

**चित्रं विभो! यदसि कर्मविपाकशून्यः ।।२९।।**

**सौ.मं.-**हे स्वामिन्! हे नाथ! [1]निजपृष्ठिलग्नान् असुमतः प्राणिनो यत् त्वं तारयसि। किं लक्षणस्त्वम्? जलधेः संसारसमुद्रात् पराङ्मुखोऽपि, अन्यो यस्तारकः परं तारयति, स तु जलाश्रयसन्मुखो भवति। त्वं जन्मजलधेः विपराङ्मुखः। अत्र संशयं कृत्वा, संशयपरिहारं करोति कविः-उत्तरार्धं यथा-युक्तं हि [2]पार्थिवभवस्य सतः, तवैव चित्रं विभो! यदसि कर्मविपाक शून्यः। हे विभो! हे स्वामिन्! [2]पार्थिवस्य सतस्तवैव युक्तम्। कोऽर्थः। पार्थिवो राजा। तस्य भवः अवतार, एतावता राजेन्द्रः, महान्तो राजानो भविन्त, ते स्वेच्छया लीलया परांस्तारयन्ति। द्वितीयपक्षे हे विभो! पार्थिवस्य घटावतारः सतस्तवैव युक्तम्। पृथिव्यां भवः पार्थिवो घटः, तस्य भवः अवतारः पार्थिवभवस्तस्य पार्थिवभवस्य घटावतारस्य घटरुपिणः यथा घटं हृदये निधाय सरित्-समुद्र-सरोवर-जलाश्रयास्तीर्यन्ते। सोऽपि घटः जलात् पराङ्मुखः, परमेतदेव चित्रं, यत् च (घटः) कर्मविपाकशून्यो न भवति, कर्म करणं

१. निजपृष्ठिलग्नान्-मूले तथा कुशलीयायां वृत्तौ। २. 'अत्र मूले' पार्थिवनिपस्य इति पाठः, वृत्तौ तु 'पार्थिव भव' इति यत्, तत् तु जन्मन अपेक्षया उक्तं स्यात्) कनककुशलवृत्तौ-समासस्त्वेवं-पार्थिवान् नितरां पाति इति पार्थिव निपः।

'विपाक:' पचनम् (चः कर्म-करणे)। ताभ्यां रहितो न भवति घटः। [1]अत्र व्यतिरेकालङ्कार:।।२९।।

३०. **विश्वेश्वरोऽपि जिन-पालक[2]! दुर्गतस्त्वं,**

**किं वाक्षर-प्रकृतिरप्यलिपिस्त्वमीश!।**

**अज्ञानवत्यपि सदैव कथंचिदेव,**

**ज्ञानं त्वयि स्फुरति विश्वविकाशहेतुः।।३०।।**

**सौ.मं.-** हे [2]जिन! पालक! त्वम्। विश्वेश्वरोऽपि दुर्गत:-दरिद्रः। कथं? विश्वं जगत् तस्य ईश्वरो विश्वेश्वरः, यो विश्वेश्वर: स दुर्गत: कथम्? यो दुर्गत: स विश्वेश्वर: कथम्। अत्रापि विरोध:। विरोधं कृत्वा विरोधपरिहारमाह। हे जिन! हे नाथ! जिना: सामान्य केवलिनः, स्तान्, पाति रक्षति 'जिनपः'। तस्य सम्बोधनं क्रियते जिनप। त्वं विश्वेश्वरोपि जगदीश्वरोऽपि अलकदुर्गत: केशपाशरहित: (अलका: केशा: तै: दुर्गत:-केशरहित:।) जिनानां दीक्षानन्तरं केशा न भवन्ति। हे ईश! हे स्वामिन्! अथवा त्वम्। 'अक्षरप्रकृतिरपि अलिपि:। 'कथम्?' अक्षरमयी (वर्णमयी) प्रकृतिर्यस्य स अक्षरप्रकृति:। न क्षरति न चलतीति (अक्षरा) प्रकृतिर्यस्य स अक्षरप्रकृति:। स अलिपि:, कथम्? य: अलिपि: स अक्षरप्रकृति: कथम्? अत्रापि परस्परं विरोध:[3]। अथ विरोधपरिहार:। किंलक्षणस्तवम्? अक्षरप्रकृति:। न क्षरतीति प्रकृतिर्यस्य स अक्षरप्रकृति:। एतावता कर्मबन्धरहित:, हे प्रभो! 'त्वयि अज्ञानवत्यपि' कथञ्चित् केन प्रकारेण सदा सर्वदा एव निश्चयेन ज्ञानं स्फुरति। यो (अज्ञानं अस्ति अस्य स) अज्ञानवान्, तस्य ज्ञानं कुत: स्फुरति? विश्वविकाशहेतु: (यो ज्ञानवान्, तस्याज्ञानता कुत:।), अत्रापि परस्परं विरोध:। अथ विरोधपरिहार:। हे देव! त्ययि ज्ञानं स्फुरति। किं लक्षणं ज्ञानम्? विश्वविकाशहेतु: विश्वस्य विकाशहेतु: विश्वप्रबोधकरणम्। किं लक्षणे त्वयि? अज्ञान् अवति अपि अज्ञान् मूर्खान्, अवति रक्षंति, अवन् अज्ञान् अवन्। तस्मिन् अज्ञान् अवति, मूर्खजनपरित्राणसमर्थ: (र्थे) ।।३०।।

३१. **प्राग्भारसंभृतनभांसि रजांसि रोषा-**

**दुत्थापितानि कमठेन शठेन यानि।**

---

१. त्वं तु हे नाथ! कर्माणि च तेषां विकारश्च-ताभ्यां रहितो असि अतोऽत्र उपमानस्य निपस्यापेक्षया उपमेयस्य विभोराधिक्यं। २. अत्र 'जनपालक' इति पाठः प्रसिद्धः, किंतु प्रतौ मूले टीकायां च 'जिनपालक' शब्दो वर्तते, अत आदृत:। ३. 'नाम तु अक्षरैर्वर्णै लिख्यते-अत: 'अक्षराणां प्रकृतिमत्त्वे अलिपिमत्त्वं' विरोध:।

**छायापि तैस्तव न नाथ! हता हताशो-**

**ग्रस्तस् त्वमीभिरयमेव परं दुरात्मा।।३१।।**

**सौ.मं.**-हे प्रभो! शठेन कमठेन रोषात् यानि रजांसि उत्थापितानि मिथः एकत्रीकृतानि प्रकटीकृतानि। किंलक्षणानि रजांसि? प्राग्भारसम्भृतनभांसि। प्राग्भारेण प्रकर्षेण सम्भृतं नभो यैस्तानि प्राग्भारसम्भृतनभांसि। हे नाथ! हे स्वामिन्! तैः रजोभिः ते तव च्छायापि न हता। तु पुनः। केवलं अमीभिः अयमेव दुरात्माः हतः ग्रस्तः। किं लक्षणोऽयं?-हताशः निष्फलप्रयासः। हता आशा यस्य स हताशः।।३१।।

३२. **यद् गर्जदूर्जितघनौघमदभ्रभीमं,**

**भ्रश्यत्तडिन्मुसलमांसलघोरधारम्।**

**दैत्येन मुक्तमथ दुस्तरवारि दध्रे,**

**तेनैव तस्य जिन! दुस्तरवारिकृत्यम्।।३२।।**

**सौ.मं.**-हे प्रभो! हे स्वामिन्!। अथ पश्चात् पापेन कमठेन यद् दुस्तरवारि मुक्तम्, हे जिन! तेनैव वारिणा पानीयेन तस्य कमठस्य दुस्तरवारिकृत्यं-दुष्टतरवारिकृत्यं दध्रे, धातूनामनेकार्थत्वाच्चक्रे, तेनैव पापेन स दुरात्मा हतः। किं लक्षणं दुस्तरवारि? गर्जदूर्जितघंनौघः शब्दायमानबलिष्ठमेघवृन्दम्। अस्य पदस्य समासः-[1]गर्जदूर्जितश्चासौ घनौघश्च गर्जदूर्जितघनौघः। गर्जदूर्जितघनौघः यत्र तत् गर्जदूर्जितघनौघम्। पुनः किंलक्षणं। किं दुस्तरवारि? अदभ्रभीमम् (अत्यर्थं भीमं, अतीव) रौद्रम्। पुनरपि किं लक्षणं दुस्तरवारि? भ्रश्यन्ती तडिद् यत्र तद् भ्रश्यत्तडित्। पुनरपि किंलक्षणं वारि? मुश(स) लमांसलघोरधारम्। मुश (स) लमांसलघोरधारं, मुश(स)लप्रमाणधारम् ।।३२।।

३३. **ध्वस्तोर्ध्वकेशविकृताकृतिमर्त्यमुण्ड-**

**प्रालम्बभृद्-भयदवक्त्रविनिर्यदग्निः।**

**प्रेतव्रजः प्रतिभवन्तमपीरितो यः,**

**सोऽस्याभवत् प्रतिभवं भवदुःखहेतुः।।३३।।**

---

१. 'अत्र' घनानां ओघः-घनौघः 'इति समासं कृत्वा गर्जन् चासौ ऊर्जितश्च'-गर्जदूर्जितः समासः कार्यः, तदनतरम्-टीकोक्तः समासः कार्यः।

**सौ.मं.**-हे प्रभो! तेन कमठेन यः प्रेतव्रजः प्रेतसमूहः भवन्तं प्रति ईरितः प्रेरितः मुक्तः, स प्रेतव्रजः, अस्य कमठस्य, भवं भवं प्रति प्रतिभवं, भवदुःखहेतुः संसारपरम्परायाः कारणं बभूव। किंलक्षणः प्रेतव्रजः? [1]स्तब्धो निश्चली, ये ऊर्ध्वकेशाः, विकृताकृतयो बीभत्साकाराः, मर्त्यमुण्डानि मनुष्यमस्तकानि, तेषां प्रालम्बं हारं बिभर्तीति- [1]स्तब्धोर्ध्वकेशविकृताकृतिमर्त्यमुण्डप्रालम्बभृत्। अनम्रकेशबीभत्साकार-मनुष्यमस्तकहारं दधत्। पुनः किंलक्षणः प्रेतव्रजः? भयदवक्त्रविनिर्यदग्निः। भयं ददातीति भयदम्। भयदं च तद् वक्त्रं च भयदवक्त्रम्। भयदवक्त्राद् विनिर्यद् निर्गच्छद् अग्निर्यत्र स भयदवक्त्रविनिर्यदग्निः।।३३।।

**३४. धन्यास्त एव भुवनाधिप! ये त्रि सन्ध्य-**
**माराधयन्ति विधिवद् विधुतान्यकृत्याः।**
**भक्त्योल्लसत्पुलकपक्ष्मलदेहदेशाः,**
**पादद्वयं तव विभो! भुवि जन्मभाजः।।३४।।**

**सौ.मं.**- हे प्रभो! हे भुवनाधिप! ये जन्मभाजः प्राणिनः, विधिना तव पादद्वयं आराधयन्ति। हे प्रभो! भुवि पृथिव्यां त एव प्राणिनो धन्याः उत्तमाः। किं लक्षणाः जन्मभाजः? विधुतान्यकृत्याः। विधुतं त्यक्तं अन्यकृत्यं यैस्ते विधुतान्यकृत्याः परित्यक्तान्यकार्याः। पुनः किंलक्षणाः जन्मभाजः? भक्त्योल्लसत्पुलकपक्ष्मलदेहदेशाः। भक्त्या उल्लसद् (पुलकेन) रोमाञ्चेन पक्ष्मलः [2]स्निग्धो देहदेशो येषां ते भक्त्योल्लसत्पुलकपक्ष्मलदेहदेशाः।।३४।।

**३५. अस्मिन्नपारभववारिनिधौ मुनीश!,**
**मन्ये न मे श्रवणगोचरतां गतोऽसि।**

१. अत्र प्रसिद्धवृत्तितः समासः एवं ज्ञेयः-ध्वस्तोर्ध्वश्चकेशश्च विकृताकृतिश्च मर्त्यमुण्डप्रालम्बभृच्च भयदश्च वक्त्रविनिर्यदग्निश्च-इति। मूले 'ध्वस्त' पाठः, वृत्तौ तु- **स्तब्ध** इति पाठो निश्चलार्थे टीकायां तु 'स्तब्धोर्ध्वकेश०' इति सङ्केतपदं समस्तपदमपि विद्यते- २. 'पक्ष्मल' इत्यस्यार्थस्तु 'पक्ष्मवान्' इति। किन्त्वत्र स्निग्धपर्यायस्तु चिन्त्यः।

**आकर्णिते तु तव गोत्रपवित्रमन्त्रे,**

**किं वा विपद्विषधरी सविधं समेति? ।।३५।।**

**सौ.मं.**- हे मुनीश! अहं एवं मन्ये। अस्मिन् अपारे भववारिनिधौ संसारसमुद्रे त्वं श्रवणगोचरतां कर्णविषयतां न गतोऽसि न प्राप्तोऽसि। मया त्वं कर्णे न श्रुत:, (आकर्णिते तु इति उत्तरार्धं) तु पुन:। हे प्रभो! तव गोत्रपवित्रमन्त्रे तव नामपवित्रमन्त्रे, आकर्णिते सति विपद्विषधरी कष्टभुजङ्गी, सविधं समीपं, किं समेति? अपि तु न समेति। को भाव:-हे प्रभो! यदि चेन्मया कर्णे श्रुतोऽभवत् (भवति तदा मम एतानि कष्टानि नायान्ति।)-अनुमानेन ज्ञायते।।३५।।

३६. **जन्मान्तरेऽपि तव पादयुगं न देव!,**

**मन्ये मया महितमीहितदानदक्षम्।**

**तेनेह जन्मनि मुनीश! पराभवानां,**

**जातो निकेतनमहं मथिताशयानाम्।।३६।।**

**सौ.मं.**-हे प्रभो! अहं एवं मन्ये। हे देव! हे स्वामिन्! मया जन्मान्तरेऽपि तव पादयुगं तव चरणयुगलं, न महितं न पूजितं। किंलक्षणं पादयुगम्? ईहितदानदक्षं मनोवाञ्छितदानचतुरम्। ईहितदाने दक्षं ईहितदानदक्षम्। पूर्वार्धं व्याख्यातम् (उत्तरार्धं यथा 'तेन' इति) हे मुनीश! तेन कारणेन, इह जन्मनि इह भवे, पराभवानां कष्टानां, निकेतनं जातोऽस्मि पराभवानां गृहं जातोऽस्मि। किंलक्षणानां पराभवानां? मथिताऽशयानां पीडितचित्तानां। मथित: (पीडित:) आशयो (चित्तं) यैस्ते मथिताशया:, तेषां मथिताऽऽशयानाम्।।३६।।

३७. **नूनं न मोहतिमिरावृतलोचनेन,**

**पूर्वं विभो! सकृदपि प्रविलोकितोऽसि।**

**मर्माविधो विधुरयन्ति हि मामनर्था:,**

**प्रोद्यत्प्रबन्धगतय: कथमन्यथैते? ।।३७।।**

---

१. मोहतिमिरेण 'इत्येकवचनमावश्यकं, तदप्यत्र बहुवचनं-मोहनीयस्य भेद-प्रभेद सूचनार्थम्।'

**सौ.मं.** - हे विभो! हे स्वामिन्! नूनं निश्चितं पूर्वं प्रथमं सकृदपि एकवारमपि, मया त्वं न प्रविलोकितोऽसि। किंलक्षणेन मया? तिमिरावृतलोचनेन पापान्धकाराच्छादितनेत्रेण। (मोह एव तिमिरं-मोहतिमिरं, मोह) [1]तिमिरैरावृते लोचने यस्य स (मोह) तिमिरावृतलोचनः, तेन (मोह) तिमिरावृतलोचनेन। हि निश्चितम्। अन्यथा एते अनर्थाः मां कथं विधुरयन्ति, कथं पीडामुत्पादयन्ति। किंलक्षणाः अनर्थाः? मर्माविधः मर्मभेदकाः। मर्माणि विध्यन्तीति मर्माविधः। अत्र पर सूत्रं (पा.६.२.११६) न हि-वृति-वृषि-व्यधि-रुचि-सहि-तनिषु क्वौ, '(सिद्धान्तकौमुदी)-[2]प्रादिकारणमेव दीर्धः, [2]स्वमते ह्रस्वदीर्घता, इयं व्याकरणनिष्पत्तिः। पुनः किंलक्षणाः अनर्थाः प्रोद्यत्प्रबन्धगतयः उल्लसत्प्रबन्धव्यापाराः। एतावन्तोऽनर्थाः विद्यन्ते येषां सङ्ख्यापि कर्तुं न शक्यते ।।३७।।

**३८. आकर्णितोऽपि महितोऽपि निरीक्षितोऽपि,**
**नूनं न चेतसि मया विधृतोऽसि भक्त्या।**
**जतोऽस्मि तेन जनबान्धव! दुःख पात्रं,**
**यस्मात् क्रियाः प्रतिफलन्ति न भावशून्याः ।।३८।।**

**सौ.मं.** हे प्रभो! मया त्वं आकर्णितोऽपि कर्णाभ्यां श्रुतोऽपि हे प्रभो! मया त्वं महितोऽपि, हे प्रभो! भया त्वं निरीक्षितोऽपि लोचनाभ्यां दृष्टोऽपि, नूनं निश्चितं, मया त्वं भक्त्या (चेतसि) चित्ते न विधृतोऽसि। हे जनबान्धव! हे स्वामिन्! तेन कारणेन अहं दुःखपात्रं जातोऽस्मि। युक्तोऽयमर्थः। यस्मात् कारणाद् भावशून्याः भावरहिताः क्रिया न प्रतिफलन्ति ।।३८।।

**३९. त्वं नाथ! दुःखिजनवत्सल! हे शरण्य!,**
**कारुण्यपुण्यवसते! वशिनां वरेण्य!।**
**भक्त्या नते मयि महेश! दयां विधाय,**
**दुःखाङ्कुरोद्दलनतत्परतां विधेहि ।।३९।।**

---

१. क्विबन्तेषु एषु पदेषु पूर्वपदस्य दीर्घः इति सिद्धान्तकौमुदीपाठः, मर्माणि विध्यति इति मर्मवित्।
२. सि.हे.३.२.८५ गति-कारकस्य नहि-वृति-वृषि-व्यधिरुचि-सहि-तनौ क्वौ.....। वृत्तिगतमुदा-हरणं उपातत्....श्वापित् मर्मावित्...।

**सौ.मं.** - हे स्वामिन्! हे नाथ! हे दु:खिजनवत्सल! दु:खिजनानां वत्सल:, तस्य सम्बोधनं क्रियते। हे दु:खिजनवत्सल! हे शरण्य! शरणे साधु: शरण्य:, तस्य सम्बोधनं क्रियते-हे शरण्य!। हे कारुण्यपुण्यवसते! (करुणाया: भाव: कारुण्यं, कारुण्यं च पुण्यं च (कारुण्य-पुण्यं) कारुण्य-पुण्ययो: वसति:-कारुण्यपुण्यवसति:, तस्य संबोधनं क्रियते -कारुण्य-पुण्यवसते!) करुणाधर्मभावनिवास! हे वशिनां शरण्य। हे जितेन्द्रियश्रेष्ठ! हे जिन! हे परमेश्वर! मयि विषये दयां विधाय दु:खाङ्कुरोद्दलनतत्परतां विधेहि। किं लक्षणे मयि? भक्त्या नते भक्त्या नम्रीभूते ।।३९।।

४०. **नि:संख्यसारशरणं शरणं शरण्य-**

**मासाद्य सादितरिपुप्रथितावदातम्।**

**त्वत्पादपङ्कजमपि प्रणिधानवन्ध्यो,**

**वध्योऽस्मि चेद् भुवनपावन! हा हतोऽस्मि ।।४०।।**

**सौ.मं.**-हे भुवनपावन! हे विश्वपवित्रीकरण! त्वत्पादपङ्कजमपि त्वच्चरणकमलमपि, शरणं आसाद्य प्राप्य, चेत् प्रणिधानवन्ध्य: नमस्काररहित:, यदा वध्योऽस्मि निष्फलोऽस्मि। हा इति खेदे हतोऽस्मि। किंलक्षणं त्वत्पादपङ्कजं? नि:सङ्ख्यसारशरणं (निर्गता सङ्ख्या यस्मात् स 'नि:सङ्ख्य:', सङ्ख्यारहित:, 'सारो' बलं, तस्य शरणं गृहम्[१] सङ्ख्यातीत पराक्रमगृहं, पुन: किं लक्षणं त्वत्पादपङ्कजम्? शरण्यम्। शरणे साधु शरण्यं, शरणयोग्यम् पुनरपि किंलक्षणं त्वत्पादपङ्कजम्? सादितारिपु, सादिता: खेदं प्रापिता:, रिपव: कामक्रोधादयो येन तत् सादितरिपु। पुनरपि किंलक्षणं त्वत्पादपङ्कजम्? शरण्यम्। शरणे साधु शरण्यं, शरणयोग्यम्! पुनरपि किंलक्षणं त्वत्पादपङ्कजम्? प्रथितावदातं प्रथितप्रभावम् ।।४०।।

४१. **देवेन्द्रवन्द्य विदिताखिलवस्तुसार!**

**संसारतारक! विभो! भुवनाधिनाथ!।**

**त्रायस्व देव! करुणाहृद! मां पुनीहि,**

**सीदन्तमद्य भयदव्यसनाम्बुराशे:।।४१।।**

१. शरणं रक्षकं-शरणं रक्षणे गेहे...(हैमे.३-८२५) इति कनककुशलवृत्ति:।

**सौ.मं.**-हे देवेन्द्रवन्द्य! हे विदिताखिलवस्तुसार! विदितः ज्ञातः अखिलवस्तूनां सारो (रहस्यं) येन स विदिताखिलवस्तुसारः, तस्य सम्बोधनं क्रियते-हे विदिताखिलवस्तुसार! हे संसारतारक! हे विभो! हे स्वामिन्! हे भुवनाधिनाथ! हे विश्वनायक! हे देव! करुणाह्रद! दयानिधे! प्रसीद प्रसादं कुरु। मां त्रायस्व रक्ष! किंलक्षणं माम्? भयदव्यसनाम्बुराशेः सीदन्तम्। भयदायककष्टसमुद्रात् सीदन्तं पराभूयमानम् ।।४१।।

४२. **यद्यस्ति नाथ! भवदङ्घ्रिसरोरुहाणां,**
**भक्ते : फलं किमपि संततिसंचितायाः।**
**तन्मे त्वदेकशरणस्य शरण्य! भूयाः,**
**स्वामी त्वमेव भुवनेऽत्र भवान्तरेऽपि ।।४२।।**

**सौ.मं.**- हे नाथ! यदि चेद् भवदंह्रिसरोरुहाणां भवच्चरणकमलानां, भक्तेः किमपि फलमस्ति। किंलक्षणयाः भक्तेः? सन्ततिसञ्चितायाः। सन्तत्या परम्परया सञ्चिता सन्ततिसञ्चिता, तस्याः सन्ततिसञ्चितायाः। एतावता भक्तिबाहुल्यम्। हे शरण्य! शरणे साधो। तत् तस्मात् कारणात्, मे मम अत्र भुवने इहलोके, भवान्तरेऽपि अन्यजन्मनि त्वमेव स्वामी भूयाः। किंलक्षणस्य मम? त्वदेकशरणस्य। त्वमेवैकं शरणं यस्य स त्वदेकशरणः तस्य त्वदेकशरणस्य ।।४२।।

४३-४४ **इत्थं समाहितधियो विधिवज्जिनेन्द्र!,**
**सान्द्रोल्लसत्पुलककञ्चुकिताङ्गभागाः।**
**त्वद्बिम्बनिर्मलमुखाम्बुजबद्धलक्ष्या,**
**ये संस्तवं तव विभो! रचयन्ति भव्याः ।।४३।।**
**जननयनकुमुदचन्द्र!,**
[1] **प्रभासुराः स्वर्गसंपदो भुक्त्वा,**
**ते विगलितमलनिचया,**
**अचिरान्मोक्षं प्रपद्यन्ते ।।४४।।**

१. प्रभास्वराः 'इति पाठः सर्वत्र, प्रसिद्धः वृत्तावपि तथैव विवृतः यथा जननयनकुमुदेषु चन्द्रो-जननयनकुमुदचन्द्रः, तत् सम्बोधनम्-जन...चन्द्र, तत्र 'प्रभास्वराः' परं 'संपदः' इत्यस्य विशेषणत्वेन व्याख्यातम्।

**सौ.मं.-** हे जिनेन्द्र! हे विभो! ये भव्याः उत्तमा, इत्थं अमुना प्रकारेण, विधिवत् शास्त्रप्रकारेण, तव संस्तवं रचयन्ति कुर्वन्ति। किंलक्षणाः भव्याः? समाहितधियः-सम्यक् प्रकारेण आहिता उत्पन्ना धीर्येषां ते समाहितधियः। पुनः किंलक्षणाः भव्याः? सान्द्रोल्लसत्पुलककञ्चुकिताङ्गभागाः सान्द्राः स्निग्धाः (बहुलाः) उल्लसन्तो ये पुलकाः रोमाञ्चाः, तैः कञ्चुकिताः कञ्चकीभूताः अङ्गभागाः अङ्गप्रदेशाः येषां ते-सान्द्रोल्लसत्-पुलककञ्चुकिताङ्गभागाः। पुनरपि किंलक्षणाः भव्याः? त्वद्बिम्बनिर्मलमुखाब्बुज-बद्धलक्षाः। त्वदीयदेहनिर्मलमुखकमलदत्तदृष्ट्यः ।।४३।।

हे प्रभो! ये तव संस्तवनं रचयन्ति, ते प्राणिनः स्वर्गसम्पदः स्वर्गलोकसमृद्धीः, भुक्त्वा पालयित्वा अचिरात् स्तोककालेनापि मोक्षं प्रपद्यन्ति प्राप्नुवन्ति। किंलक्षणास्ते? जननयनकुमुदचन्द्रप्रभासुराः (जनानां नयनानि जननयनानि, जननयनानि एव कुमुदानि जननयनकुमुदानि, जननयनकुमुदानां चन्द्रवत् प्रभासुराः-जननयनकुमुदचन्द्रप्रभासुराः) जनलोचनकुमुदानां चन्द्रसमानाः। यथा चन्द्रे दृष्टे सति कुमुदानि विकसन्ति। अस्मिन् कविना स्वनामसूचितं कुमुदचन्द्र इति, तस्य कृतिरियम्। पुनः किंलक्षणास्ते? विगलितमलनिचयाः विगलितः मलानां निचयो येषु ते विगलितमल निचयाः पापरहिता इत्यर्थः।।४४।।

**।। इति श्री कल्याणमन्दिरस्य सौभाग्यमञ्जरीति वृत्तिः समाप्ता ।।**

---

**१. एकादशटीकाः**

१. श्री कनककुशलगाणि-१६५२, २.श्रीमाणिक्यचन्द्रसूरि (....), ३. श्रीहर्षकीर्तिसूरि (१६६८), ४. श्रीरत्नचंद्रगणि (.....), ५. श्री समयसुन्दरगणि (१६९५), ६. श्री हेमविजय (.....), ७. श्रीजिनविजय (१७१०), ८.श्रीदेवतिलकमुनि ऊकेशगच्छ। ९. श्रीगुणसागरमुनि १०. श्रीगुणसेन (रत्न) मुनि, ११. श्री चारित्रवर्धनगणि

२. १६७८ वर्षे प्रणीते श्रीप्रद्युम्नचरित्रे सप्तदशसर्गान्ते तत्प्रणेतृश्रीरत्नचन्द्रगणयो निजगुरुवर्यं स्वयं च परिचाययन्ति तथाहि-

श्रीशान्तिचन्द्रवरवाचकदुग्धसिन्धु-लब्धप्रतिष्ठवरवाचकरत्नचन्द्रः,

श्री विष्णुपुत्रचरितं ललितं चकार, सर्गोऽत्र सप्तदशमान इहाऽऽप ऋद्धिम्।।१७९।।

इति श्रीदिल्लीदेशे फत्तेपुरस्थैः पातिशाहि श्री अकबरैः,

श्रीगुरुदर्शनार्थसमाहूतभट्टारकश्रीपू.श्रीहीरविजयसूरीश्वरैः सह विहारकृताम्........... महोपाध्यायश्रीपू.श्री.सकलचन्द्रगणिशिष्य-महोपाध्यायश्रीशान्तिचन्द्रगणीनां शिष्यमुख्योपाध्याय-श्रीरत्नचन्द्रगणिविरचिते श्रीभक्तामरस्तव-**श्रीकल्याणमन्दिरस्तव**-श्रीदेवाः प्रभोः- स्तव श्रीमद्धर्मस्तव-श्रीऋषभ-वीर-स्तव-कृपारसकोश-अध्यात्मकल्पद्रुम-श्रीनैषधमहाकाव्य-श्रीरघुवंश-महाकाव्य-वृत्तिनवभगिनीनामनूजे भ्रातरि श्रीप्रद्युम्नचरिते महाकाव्ये...सप्तदश सर्गः संपूर्णः।

३. पाटण-हे.जै.ज्ञा. ह.प्र.नी पुष्पिक। सं.१८७० वर्षे भाद्रपदकृष्णनवम्यां श्रीमद्बृहत्खरतरगच्छे श्रीजिनभद्रसूरिशाखायां वा श्रीश्रीज्ञानवल्लभगणिवराणां शिष्य पं.प्र.श्रीश्रीपुण्यकमलमुनिवराणां शिष्य पं.प्र.श्रीपद्महंसमुनिना सह शिष्यैः श्रीब्रह्मसरग्रामे। श्रीरस्तु। भद्रं भूयात्। वाच्यमाना चिरं नन्दतु। कल्याणमस्तु।

# विभाग : २
# अर्वाचीनकृतयः

## खण्ड : २ यशोप्रज्ञादर्शनम्

(लय-विनय! विधियतां रे....)

भव्य! सेव्यतां रे, श्री यशोविजय-मुनीशम्।
सम्यगास्वाद्यतां रे, सद्गुणपानमनीशम् ।।१।।

विनयपवित्रं, नम्रतायुक्तम्, विवेकगुणपरिपूतम्।
वन्दे ज्ञानभूषणपरिस्कृतं, वादिविजयिनमद्भुतम् ।।२।।

आगमे काव्ये न्याये प्रकरणे स्तवे मतिगंभीरम्।
न्यायविशारदबिरुदधरं तं, जिनशासने बहुधीरम् ।।३।।

**श्रीवाचकयश**ः सद्गुणगानं, कुर्वे स्मारं स्मारं।
"**श्रेयः**" परमपदं हि समीहे, "**दर्शन**" गुणविस्तारं ।।४।।

# परमज्योतिः पञ्चविंशतिका

**- मूलकाराः महोपाध्यायश्रीयशोविजयपादाः**

**- वार्त्तिककाराः *आचार्यः श्रीविजयकल्याणबोधिसूरिः**

ननु च दीपादिरूपमेव ज्योतिर्नः प्रसिद्धम्, लोकस्य च, न तु भवद्भिर्महता प्रबन्धेन व्यावर्ण्यमानपरमज्योतिः, स्वप्नेऽप्यनीक्षितत्वात्, तत् किमत्र तत्त्वमिति चेत्? अत्रोत्तरयन्ति-

**दीपादि पुद्गलापेक्षं, समलं ज्योतिरक्षजम्।**
**निर्मलं केवलं ज्योतिर्-निरपेक्षमतीन्द्रियम्** ।।४।।

पुद्गलाः प्रकृते तैलवर्त्यादिरूपाः, तदपेक्षं हि दीपादिरूपं ज्योतिर्भवति, तत्क्षये तत्क्षयस्यान्यथाऽनुपपत्तेः। किञ्चान्धप्रदीपन्यायात् केचिच् चक्षुषोः ज्योतिर्भावं व्याचक्षते, किन्तु तदपि स-मलम्, तिमिरादिरोगमलसम्भवेन तन्मालिन्यदर्शनात्। उपलक्षणमिदम्, तेन दीपादिज्योतिषः पवनादिगोचरत्वमत्यन्तपरिमितक्षेत्रप्रकाशकत्वं चापि बोध्यम्, एवं चक्षुषः समीपवर्त्तिनो निरावृतस्य वस्तुनोऽर्वाभागमात्रप्रकाशकत्वमपि विलोक्यम्। इत्थञ्च स्वल्पतरमत्र ज्योतिष्ट्वम्, अधिकतरं त्वन्धकारत्वमिति सूक्ष्ममीक्षणीयम्। तथा च सति लोकप्रसिद्धमेव तत्तज् ज्योतिः। न तु तत्त्वज्ञप्रसिद्धमिति सिद्धम्।

यत् तु प्रागुक्तनीत्या बाह्यवस्तुनिरपेक्षम्, आत्मस्वभावभूतत्वेनातीन्द्रियम्, सर्वविजातीयकलङ्कनिर्मुक्ततया केवलम्, अत एव निर्मलञ्च, तदेव परमार्थज्योतिः, तथाविधस्य ज्योतिरन्वर्थोपेतत्वात्।

श्रेयानत एतदर्थः पुरुषार्थः, इतराभियोगस्य तमोमात्रपर्यवसानादित्यत्राऽऽशयः।

(क्रमशः)

* पू.आ.श्री विजयभुवनभानुसूरिसमुदायवर्तिः ।

# वृत्तं यशोविजयवाचकपुङ्गवानाम्

- *मुनिश्री सम्यग्दर्शनविजयगणि

(परमश्रद्धेयवाचकवर्याणामनुपमं चरितं पञ्चमाङ्काद् यत् प्रारब्धं, तत्र भारतवर्षे गूर्जरदेशे-कनोडाग्रामशोभावर्णननामप्रथमस्तबके शिशिरवसन्तग्रीष्मवर्षर्तुवर्णनं कृत्वाऽधुना पूज्यपादनयविजय जसवन्तयोः समागम नाम द्वितीयस्तवकं प्रस्तूयते)

इत्येवं गाथापाठकरण-गोचरीचर्याऽऽनयनादिभिश्च पुनः पुनः तद्बालकस्य जसवन्तस्य तत्राऽगमनं दृष्ट्वा विद्वद्जनेषु प्रौढता प्राप्ता श्रीनयविजयवाचकवर्यास्तस्य विनयाद्यभ्यन्तरगुणैः, बुद्धि-प्रतिभादिबाह्यगुणैश्चाकर्षिताः। पुनश्चान्यदा श्री नयविजय-वाचकैः बाल्येऽप्यबालपराक्रमोऽस्त्यसौ इत्येकेन प्रसङ्गेन ज्ञातम्।

तथाहि-जसवन्तः स्वजननीं प्रति परमभक्तिभागाऽऽसीत्। एकदा वर्षर्त्तुषु तज्जनन्या प्रातरन्नपानादिकं न गृहीतम्। तज्ज्ञात्वाऽनेन बालेन पृष्टा सा यथा मातर! कथं त्वयाऽन्नपानादिकं न भुक्तम्?। मात्रोक्तं वत्स! मम भक्तामरश्रवणस्य नियमः। अद्य मया तन्न श्रुतम्। यतोऽद्य बहि र्मुशलधारया वृष्टिर्पतति, ततो बहि र्निर्गन्तुमहमसमर्था। तदा बालेनाऽपि अबालबुद्धिना जसवन्तेनोक्तं मातर्! किमियदेव कारणं?।

तर्हि-एतदहं श्रावयिष्यामि तदा तु त्वं भक्ष्यसि न वा?। माता वदति वत्स! सुतरां, किन्तु भक्तामरस्तोत्रं त्वया कदा पठितं? बालेनोक्तं मातर! त्वत्सार्धमहं प्रतिदिनं गुरुदेवान्तिकं भक्तामरश्रवणार्थं समागतवान् ततो जानामि। तत्स्तोत्रं वारंवारं श्रुत्वा स्वनामवत् कण्ठस्थं जातम्। जननि! त्वं श्रुणु-अहं वदामि। किन्तु तच्छ्रुत्वाऽपि मातुर्मनः न विश्वस्तम्, बालेन पुनर्पुनः प्रोक्ता जननी कौतुहलेन तच्छ्रोतुम् सावधानी भूता। जसवन्तेन तु भक्तामरस्तोत्रं वक्तुं प्रारब्धम्,

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्त्तिः।

यदा जशवन्त: एकं-एकं पद्यं वदति तदा तदा माता तच्छ्रुत्वा परम प्रमोदभाक्-सञ्जाता। यथा सुशिष्य: विनयादिना गुरुं प्रसाद्य, गुरुणा प्रदत्तं चतुर्दशदोष्-विप्रमुक्तं सूत्रं जानीयात्। ज्ञात्वा निर्दुष्टं सूत्रं वदेत्, तथैव जसवन्त: संपूर्णं भक्तामरं निर्दुष्टमवदत्। तदा मात्राऽपि ज्ञातं, यत्स्वपुत्रस्येदृशं बद्धिप्रागल्भ्यं, यत: न कदापि मयूरस्य पिच्छानि रज्यन्ते, चन्द्रे धवलिमा क्रियते। नामृते शर्करया माधुर्यं स्थाप्यते, शारदां नैव पाठ्यते। नाऽऽम्रेषु तोरणानि बध्यन्ते। न सूर्येसु तेज: स्थाप्यते। तद्वत् प्रतिभाशालीषु प्रतिभा न केनाऽपि स्थाप्यते। यत: सा सहजा।

अत्रास्माकं मनसि प्रश्न: संभवेत्। जसवन्तस्य सूत्रवक्तव्यतायां ये चतुर्दशदोषा प्रोक्तास्ते दोषा: के? कीदृशं दोषभृत्सूत्रं भवति? अत्र उच्यते-

यथा-१. व्याविद्धं २. व्यत्याम्रेडितं ३. हीनाक्षरं ४. अत्यक्षरम् ५. पदहीनम् ६. विनयहीनं ७. घोषहीनं ८. योगहीनं ९. सुष्ठुदत्तं १०. दुष्ठुप्रतीच्छितं ११. अकाले कृतं १२. काले न कृतं १३. अस्वाध्यायसमये स्वाध्याय: १४. स्वाध्यायसमयेऽस्वाध्याय:।

तत्र प्रथमं तावत् **व्याविद्धम्** = सूत्रोच्चारसमयेऽव्यवस्थितं, यथा रत्नमालायां रत्नस्थापनावसरे लघुदीर्घादिक्रमतोऽबद्धा माला न शोभते तद्वत् सूत्रोच्चारेऽपि क्रमविपर्ययो भवति, स दोष:।

द्वितीयस्तु **व्यत्याम्रेडित**:=यथा सामान्यजातिका स्त्री अन्यान्यगृहेभ्य: अन्यान्य-वस्तुजातानि याचित्वा क्षीरं निर्मापयति। तद्वत् अत्राऽपि अन्यशास्त्रपदानां सम्मीलनं कृत्वा मूलशास्त्रस्वरुपं विपरितप्राय: करोति।

तृतीय: पुन: **हीनाक्षर**: = अल्पाक्षरेण सूत्रमुच्चार्यते। न तु संपूर्णमुच्यते।

चतुर्थश्च **अत्यक्षरं** = अन्यान्याक्षराणां वर्धनेन प्रभूताक्षररुपं सूत्रं यदा क्रियते।

पञ्चमं **पदहीनं** = सूत्रोच्चारे रभसापदमेकमऽपि न्यूनमुच्चारितं स्यात् स।

षष्ठं **विनयहीनं** = सूत्रोच्चारमपि सविनयं करबद्धादिसुविधिस्वरुपविनयेन पठितं भवति। ततस्तद्रहितं सूत्रं तत्।

सप्तमं **घोषहीनं** = उदात्ताऽनुदात्तस्वरितादि-यथार्थधोषेण सूत्रं वक्तव्यमस्ति तद्रहितम् यत् तद्। इति।

अष्टमं **योगहीनं** = योगोद्वहनादिना सूत्रं गृह्यते न तु यथा तथा मनस्फुरणया। अत्राऽपि जसवन्तेन प्रतिदिनं सुविधिवन्दनपूर्वकं गुरुवदनकमलेन पतन्तं स्वीकृतमस्ति।

नवममुच्यते **सुष्ठु दत्तं** = सुष्ठुशब्देन ‘अधिक: इति वाच्यार्थ: प्राचीनमहर्षीणां संमत:।

योग्यतारहितस्य प्रभूतज्ञानप्रदानेन सुष्ठु दत्तमित्यर्थः क्रियते। जसवन्तस्तु सुयोग्यत्वात् तद् रहितं सूत्रं तेन प्रोक्तम्।

दशमं **दुट्ठु प्रतिच्छिन्नं** = दुष्टचित्तेन सूत्रग्रहणम्।

तत्तु जसवन्तेऽसंभवः। यतः श्रवणमात्रेण संपूर्णं सूत्रं कण्ठस्थं न भवति।

एकादशं **अकाले कृतः स्वाध्यायः**=निषिद्धसमये स्वाध्यायो न कर्तव्यः। इति भगवद्वचनं संपूर्णं पालीतं जसवन्तेन।

द्वादशं **काले न कृतः स्वाध्यायः** = योग्य समये = विहितसमये स्वाध्यायः कर्तव्यः तत् समये यदि न क्रियते तदा प्रायश्चित्तेन बध्यते आत्मा।

त्रयोदशं वर्ण्यते **अस्वाध्यायिके स्वाध्यायितम्**=अस्वाध्यायप्रायोग्ये समये स्वाध्यायकरणं, तद् अस्वाध्यायिके स्वाध्यायितमित्युच्यते। रूधिरामिषादिसंप्रयुक्ता वसतिरस्वाध्यायिकं तत्र यदि स्वाध्यायः क्रियते, तत्।

चतुर्दशं **स्वाध्यायिके न स्वाध्यायितम्**=स्वाध्यायप्रायोग्ये स्थाने यदि स्वाध्यायः न क्रियते।

इत्येवं चतुर्दशदोषरहितं भक्तामरस्तोत्रं श्रुत्वा तन्माता प्रमुदिताऽभवदेव तत्र न कोऽपि संशयः।

(अग्रे अनुवर्तिष्यते)

जगन्मध्ये यावन्तो यावन्तः सद्गुणाः सन्ति,
ते ते सर्वे यस्मिन् भवन्ति,
यावन्तश्च दोषास्सन्ति, तन्मध्यादेकोपि दोषो यस्य न भवति,
स देवः। अस्माकं 'अरिहंतदेव' ईदृशोऽस्ति।

# विभाग : २
# अर्वाचीनकृतयः

## खण्ड : 3 सूरिरामचन्द्रदीक्षाशताब्दीभावाञ्जलिः

**(राग-देशाख)**

राम! ते शरणं मम, भवजलनिधितारम्।
क्रोधो लोभो भयं गुरो!, माम् पीडयति वारम् ॥१॥

ततः ते शरणं मम, न ह्यन्यो विचारः।
त्वं वत्सलमाता मम, पिता गुणधारः ॥२॥

धनकणकाञ्चनबान्धवाः, नहि तारयितारः।
त्वं हि मोक्षसुखावहो, भविनां हितकारः ॥३॥

भानोः कमलमुल्लसेत्, चन्द्राद् यथा वार्धिः।
चन्दनात् शीतलगुणः, चिन्तामणे र्निधिः ॥४॥

तद्वत् त्वत्तो गुण उल्लसेन्, मे परमसारः।
याचे **सम्यग्दर्शनम्**, देहि **श्रेयस्कारम्** ॥५॥

# श्री प्रेमशतकम्

(उत्तरार्धम्)

- *आचार्यश्रीविजय मुक्तिप्रभसूरिः

तीर्थेऽचिन्त्ये प्रथितमहिमा-श्लिष्टतीर्थाधिराजं,
नुत्वा स्तुत्वा, स्तुतिगुणगणैरर्घ्यपुष्पैरनर्घैः।
पूज्यं प्रेम्णा, विविधविधितः, पूजयित्वा जिनेशं,
तिष्ठन्नेवं, प्रभुपदकजे, प्रार्थयत् स्वेष्टमित्थम् ॥५१॥
हे! तीर्थेश!, प्रथितयशसां, पुञ्ज! प्रश्नो ममाग्रे;
द्वावध्वानौ, क्व मम गमनं, संयमे संसृतौ वा।
को वा प्रश्नः, परमपुरुषा, येन याता स पन्थाः;
पन्थानं तं, निखिलविरतेः, सत्वरोऽहं गमिष्ये ॥५२॥
वीर्यं प्राप्तुं विरतिविषये, तप्तवान् सत्तपः स,
नानाभेदं, स्वपरहितकृत्, कर्ममर्मप्रभेदि।
तीर्थेऽनिष्टक्षयकृदवसत्, तत्र चारित्रपात्रः;
स्वप्रायोग्यं, परमगुरुमन्वेषयन् मोक्षकाङ्क्षी ॥५३॥
संदेशस्तं. परम इति संदत्तवान् कोऽपि तावत्-
त्वत्प्रायोग्योऽनघगुरुगुरुर्, दाननामा मुनीशः।
घोघाग्रामे, निखिलगुणभाक्, शास्ति तत् तत्र तूर्णं,
निर्गच्छ त्वं वरगुरुजने संभवी संगमस् ते ॥५४॥
गत्वा तत्र स्वकभवभयोद्धारकं तं मुनीन्द्रं,
मत्वा तं हि स्वकगुरुपदे संनिधाय स्वचित्ते।

* पू.आ.श्री विजयरामचन्द्रसूरिसाम्राज्यवर्तिः।

तत्सांनिध्येऽध्ययनकुशलो, धर्ममार्गे प्रवृत्तस्,
तत्रागच्छद् व्यतिकरमिदं, तत् पिताऽऽकर्ण्य तावत् ।।५५।।
आगन्तुं स्वावसथमथ संप्रेरितोऽनैकशोऽपि,
सज्जीभूतो, न खलु स यदा तं गृहीत्वाऽप्यकामम्।
आगात् तूर्णं निजपुरमथो, तत्पिता वत्सलत्वात्,
प्राप्ते योगे, स च पुनरगात्, दानसाधोः समीपम् ।।५६।।
ज्ञात्वाऽगच्छत्, पुनरपि पिता, तं गृहीत्वा गृहं तत्,
संक्रुद्धः सन्निति कथितवान् नैव गन्तव्यमेतम्।
प्रेम प्राप्तुं पितुरतिशयं सद्मवासे स्थितः स,
स्वल्पे काले पुनरपि गुरोर्गन्तुकामोऽन्तिकञ्च ।।५७।।
प्राप्ते काले पुनरपि गृहं त्यक्तवान् प्रेमचन्द्रो-
घोघाग्रामाच् चरणचरणात् क्रोशमष्टादशं वै।
सिद्धिक्षेत्रं, गुरुवरपुरो, गन्तुकामः प्रकाम-
मेकाकी सश्लथितवपुषा, सञ्चरन् प्राप्तवाँस् तम् ।।५८।।
दीक्षाभिक्षां, गुरुवर! वरां, देहि मे प्रार्थयत् स,
योग्योऽयं वै, जगति भविता, सर्वनेतेति मत्वा।
दत्ता दीक्षा, परमगुरुणा, तत्र तद्योग्यकाले,
शैक्षस्येदं, विजयसहितं, नाम प्रेम व्यधायि ।।५९।।
वर्षे सप्तव्रतनिधिबुधे, कार्तिके कृष्णपक्षे,
षष्ठीघस्रे, परिधृतयतिश्रेष्ठवेशो विशेषः।
कर्मग्रन्थप्रमुखप्रवरान्, गूढग्रन्थान् विवेद,
तूर्णं सर्वागमसुरपथे, सूर्यवत् संदिदीपे ।।६०।।
पंन्यासादिप्रवरपदवीधारको दानसाधुश्-
छायाङ्काऽष्टग्रहशशिमिते वत्सरे वत्सरादौ।
छायापुर्यां, निजगुरुकरात्, पञ्चमीवासरादा-
वाचार्यस्याग्रिमपदधरो, दानसूरिर्बभूव ।।६१।।
शब्दं यस्यैकमपि न यदा, कोऽपि जानाति गूढं,
ग्रन्थं कर्मप्रकृतिग्रहनं ज्ञातवान् यः स्वबुद्ध्या।
मेधामेतामतिनिरुपमां, वीक्ष्य शिष्यस्य यस्य,
सिद्धान्तोदध्यनुपमपदं तं ददौ दानसूरिः ।।६२।।

देशाद्देशं, विहरति सहाचार्यवर्यैर्-विनेयो,
धर्म्यं ध्यानं, परमुपदिशन्, प्राणिनश्चोद्धरन् यः।
गुर्वाज्ञैका, मनसि स मुनिर्मन्यमानः प्रमेति
गुर्वाज्ञातो, विहरति कदाचिद् विभिन्नप्रदेशम् ॥६३॥
ऊर्जे षष्ठ्यां, षडुदधिनिधि, स्यन्दसंवत्सरेऽग्रे
दर्भावत्यां, गणिपदमभूत्, सोत्सवं प्रेमसाधोः,
पंन्यासाख्यं, पदमपि पुनः पञ्चवर्षे व्यतीते,
प्राप्तं प्रेमप्रवरगणिना, तत्तिथौ जैनपुर्याम् ॥६४॥
मध्ये तावन्नवरसनिधिश्वेतवाज्यङ्कितेऽब्दे,
तेजस्वी स्वप्रथितप्रतिभाप्रेरितक्षोणिलोकः।
शिष्यः श्रीमद्विजययुतसद् – रामनामाभिरामः,
प्राप्तः प्रेमश्रमणप्रवरैर्-देशनादानदक्षः ॥६५॥
वर्षे पञ्चाष्टनव[1]युवने, प्राविशद् मोहमय्यां,
सङ्घाग्रीयाग्रहपरिगतो दानसूरिः स्वशिष्यैः।
श्रुत्वा रामश्रमणप्रवरात्, शुद्धधर्मोपदेशात्,
त्यक्त्वा मोहं, मतिमुपगता, मोहमय्यप्यथेत्थम् ॥६६॥
वर्षावासत्रितयमकरोन्मोहमय्यां हि तस्यां,
दीक्षारोधे विलसति सति, प्रेमपंन्यासवर्यः।
श्रीरामाख्यप्रवचनपटुप्राज्ञशिष्योपदेशात्,
सज्जीचक्रे, विषयरसतोऽलिप्तचित्तान् स्वशिष्यान् ॥६७॥
वर्षे सप्ताष्टनव[1]युवने, कार्तिके कृष्णपक्षे,
दानाचार्यैः क्रमगतपदं, प्रेमशिष्याय दत्तम्।
एवं रामाभिधगणिवरे, तत्तृतीयातिथौ हि
पंन्यासाख्यं, पदमपि वरं, मोहमय्यां तथैव ॥६८॥
धृत्वा रामाभिधमुनिगणिं, पाठकः प्रेमनामा,
गुर्वाज्ञातो, गिरिवरमगादाशु शत्रुञ्जयाख्यम्।
चातुर्मासं, निज-नयनयो रोगतोऽकारि तत्र,
मुम्बापुर्यां, परमगुरुणा, दानसूरीश्वरेण ॥६९॥

(क्रमशः)

१. १९८५ वर्षे युवनः चन्द्रार्थकोऽस्ति-अभि. चिन्ता. शेष. १४

# श्रीरामचन्द्रीय महाकाव्यम्
## अथ षष्ठ: सर्ग:

- *पन्यासप्रवरश्रीमोक्षरतिविजयगणि

।। अनुष्टुप् ।।

इत: समस्तदेशस्य, भारतस्य महीयस:।
द्विट्स्वायत्तीकृतस्यास्य, बद्धकक्ष: समुद्धृतौ ।।१।।

तत्पुरस्यैव वास्तव्यो, **गान्धीति** विश्वविश्रुत:।
मोहनदासनामाभूज्,-जनताहृदयेश्वर: ।।युग्मम्।। ।।२।।

प्रसरन्तीं पुरि स्वैरं, सुरभिं पुष्पजामिव।
बलिदानकथां लब्ध्वा, पौरा: पिप्रियिरेऽखिला: ।।३।।

प्राज्ञंमन्य: परं गान्धी, तत्कर्म विरुरुत्सते।
**प्रबुद्धे विश्वविश्वे किं, नान्धीभवति कौशिक: ?** ।।४।।

स्वसाप्ताहिकपत्रेऽसौ, **नवजीवन**नामनि।
लिलेख बिलसत्कं स्वं, प्रादुष्कुर्वन्निवाशयम् ।।५।।

कुर्वञ् श्रीभद्रकालीयं, बलिदाननिमीलनम्।
पादेन प्राहरत [1]कुक्षौ, देवलानां मुनिस् त्विति ।।युग्मम्।। ।।६।।

इतश्च [2]कश्चिदुद्योग,-पतिस् तत्रान्तरे पुरे।
वातुलान् बहुलाञ् श्वानो, निष्ठुरं समहारयत् ।।७।।

---

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्त्तिः ।

१. पादेन प्रहरणम्=आजीविकाविनाश: २. यन्त्रोद्योगपति:

जैनाभासस्य तस्यैतद्,-धिंस्रं कृत्यं तिरोऽकरोत्।
श्रीरामः काममेतेन, जज्ञे कोलाहलो जने ।।८।।

तत्कृत्य-तत्प्रतीकारौ, गान्धी श्रुत्वा जनाननात्।
बह्वमन्यत तत्कृत्यं, **हहा ज्ञानविपर्ययः** ।।९।।

द्वावप्याकर्ण्य वृत्तान्तौ, क्षुब्धोऽभूत् सकलो जनः।
**शफरीस्फुरिते नाब्धेः, क्षुब्धता जातु जायते** ।।१०।।

कामं हिंसाविरोधीति, श्रीगान्धी नः प्रियः सदा।
विपर्यासोऽभवत् कस्मा, -दकस्मादस्य सन्मतेः ।।११।।

**न कोऽपि मर्तुमीहेत, सर्वोऽपीहेत जीवितुम्।**
**[1]आजृम्भजितमाजन्तु, जन्मिनामीदृशी दशा** ।।१२।।

योऽदोष-बल-शरण-प्राणिप्राणाञ् जिहीर्षति।
स्पष्टं राक्षस एवासौ, मनुष्याकृतिमानपि ।।१३।।

तुच्छापराधमपि यः, प्राणैरेव वियोजयेत्।
दयीति कथमुच्येत, सोऽल्पज्ञः स्वार्थतत्परः ।।१४।।

दयावानिति विख्यातश्-चेद् गान्धी बुद्धिमानपि।
प्रशंसति जन्तुघातं, कष्टं नष्टं हहा जगत् ।।१५।।

वरं व्याधो वराकोऽसौ, यो हि प्रकटनिर्दयः।
परं यथा व्रती वक्ति, न गान्धी दयिवेषभृत् ।।१६।।

विचारः प्राप विस्तार-मयं पुरः पुरीनृणाम्।
श्रुतश्रीरामवाणीनां, चैत्ये धूपसुगन्धवद्।। ।।सप्तभिः कुलकम्।।१७।।

गान्धी लोकेऽवलोक्य स्वा,-मेवं च वचनीयताम्।
अघोषयत् स्वपत्रेऽरं, जनरञ्जनदीपनम् ।।१८।।

स्पष्टीकरिष्यतेऽस्माभिर्-वृतान्तद्वयमान्यता।
स्वकीये सप्तदशभिः, पत्रे लेखैः क्रमादिति।। ।।युग्मम्।।१९।।

---

१. आसुरेन्द्रम्।

प्रारेभे श्वानहिंसाया, बलिदानस्य चौचितीम्।
समर्थयितुमात्मीय, -सन्धानुसारतः स तु ।।२०।।

इतः सत्त्ववतां मौलि, -मणीयमान आर्हतः।
अहिंसाहृदयाश्वासः, श्रीरामः सौवपर्षदि ।।२१।।

प्रकाशमेति लेखः स, यस्मिन् दिने तदैव तम्।
युक्तिप्रयुक्तिभिः प्राज्ञ, -प्रवरो व्युरुणत्तराम् ।।युग्मम्।।२२।।

अहिंसाविषये ह्येव, -महिंसाप्रिययोर् द्वयोः।
विवादे प्रस्तुतेऽत्यन्तं, चित्रीयन्ते पुरीजनाः ।।२३।।

द्वाभ्यां दर्शितयोर् हिंसा, ऽहिंसास्वरूपयोर् बुधः।
सत्यं लेभे जनः, क्षीरं, हंसवत् क्षीरनीरयोः ।।२४।।

मुनिवाणीषु सम्यक्त्व, -मस्तीति सत्यमीयिवान्।
बहुर्जनः क्रमाज्ज्योतिरिव दीपः प्रदीपतः ।।२५।।

हीयमानां स्वकीर्तिं यत्, कृतमुन्नयितुं जने।
तेनैव प्रत्युतातीव, हीनामालोक्य तां सभीः[१] ।।२६।।

गान्धी तुर्येण लेखेन, लेखावलीं न्यमीलयत्।
अयं हि विजयो राम, -विजयस्य जनैर् मतः ।।युग्मम्।।२७।।

गान्धिभक्तेषु सर्वेषु, भीमः कलकलोऽभवत्।
किमिदं सत्यमथवा, किं तदितीव चिन्तया ।।२८।।

गान्धिवादं बुधाः केचित्, समर्थयितुमाययुः।
व्याख्यानास्थानिकायां श्री, -[२]सामर्थ्येयस्य वाग्मिनः ।।२९।।

दूरमेव स्थितं तावद्, गान्धिवादसमर्थनम्।
वाग्मिवाचावबुद्धास् ते, पद्मानीवार्करोचिषा ।।३०।।

गान्धिभक्ता इतः केचित्, स्वपक्षस्थितिमीदृशीम्।
विभाव्याऽयुर् मुनेः पार्श्वं, नीतिशास्त्र-कृतश्रमाः ।।३१।।

उपायमन्यमप्रेक्ष्य, प्रेक्षावन्तः कथञ्चन।
दण्डोपायं समुद्गम्य, मुनिराजं बभाषिरे ।।३२।।

१. सभयः २. समर्थमातुर्नन्दनस्य।

# विभाग : २
# अर्वाचीनकृतयः

## खण्ड : ४ प्रकीर्णककृतयः

(वसन्ततिलका)

सत्सन्धिवर्णसहितै [1]वरणैरजेयम्;
खण्डैश्चतुर्भिरयनैश्च[2] सुखप्रवेशम्।
[3]सद्वृत्तवृत्तविपुलं शुभधर्मसद्म;
निःश्रेयसं वरपुरं प्रविशन्तु सन्तः! ॥१॥

काव्यादिनर्त्तकजनैः, [4]परमोदकारं;
सल्लेखसंतति सरः-सुखदं सुरम्यं।
चारित्रचैत्यततिचित्तचमत्कृतं तं;
निःश्रेयसं वरपुरं प्रविशन्तु भव्याः ॥२॥

सभ्यात्मजीवनधनं, गुणरत्नपूर्ण-
मध्यात्म भावस[5]-फलं, वरवृक्षशोभम्।
कारुण्यकाननकलाकमलौघकम्रम्;
निःश्रेयसं वरपुरं, प्रविशन्तु धन्याः ॥३॥

-श्री....

१. कोट्टः 'किल्लो' इति भाषायाम्। २. अयनं-मार्गः
३. सद्वृत्तानि-सच्छन्दांसि-तान्येव वृत्तानि-चरित्राणि तैर्विपुलं यत् तद्।
४. अन्यप्रीतिकरम्। ५. फलसहितं ७. कमलम्।

# आगमस्यामृतम्

- *आचार्यःश्रीविजय कल्याणबोधिसूरिः

अनादिकालादेव मोक्षगोचरा विभिन्ना अभिप्रायाः प्रथिताः सन्ति। महानन्दोऽमृतं, सिद्धिः, कैवल्यमपुनर्भवो, मुक्तिरपवर्गः, सर्वदुःखक्षयो, निर्याणं, निर्वाणं, महोदयोऽक्षय-मित्यादीनि मोक्षस्यैवाभिधान्तराणि। तन्त्रान्तरेषु मोक्षदशैव तथता, परमात्मा, गुणरहितता, पशुत्वविगमः, भूतान्तः, दुःखविगमश्चेत्यादिपर्यायैरभिधीयते। न ह्यभिधानमात्र भेदादभिधेयभेदो घटाकोटिमाटीकते, तथा सति जलपानीययोरपि भेदप्रसक्तेः, तदभेदे चाविगानात्। अतो यतनीयमस्याभिधेयस्य स्वरूपस्य पर्यालोचने। प्रस्तूयतेऽत्र तदेव पर्यालोचनमागमामृतरूपेण...

**संति निव्वाणमाहितम् (द्वितीयागमश्रीसूत्रकृताङ्गम्)**

ज्ञानिभिः शान्तिरेव निर्वाणतयाऽभिहिताऽस्तीत्यभिप्रायः। शान्तिर्नाम क्रोधमद-मायालोभकाममत्सरादिदोषाणामात्यन्तिकः प्रशमः। न ह्येभ्योऽपि परस्तत्त्वतः संसार इति भावनीयम्, अत एव वदन्ति प्राज्ञाः-**कषायमुक्तिः किल मुक्तिरेव**-इति। क्रोधादिदोषा एवाऽऽच्छादयन्ति परमज्ञानाऽऽनन्दात्मकमात्मस्वरूपम्, प्रवर्त्तयन्ति प्रसह्याकार्येषु, विलुम्पन्ति विवेकलोचनम्, भ्रंशयन्ति सन्मार्गात्, ततश्च यात्यात्मा शतमुखं विनिपातम्। न हि मुक्तिप्रतिपक्षः सुखलेशप्रदानेऽपि प्रत्यलः, वस्तुतो मुक्तिसुखयोरनर्थान्तरत्वादिति सूक्ष्ममीक्षणीयम्।

ननु मनोज्ञभोज्यादितोऽप्यवाप्यत एव सुखम्, न चैतन् मुक्तरूपमिति चेत्? अत एव नैतत् सुखरूपमपि परमार्थत इति प्रतिपद्यताम्, तदाभासमात्रत्वात्, तदतिक्रमोपलब्धेः, उक्तञ्च वासनामात्रमेवैतत्, सुखं दुःखं च देहिनाम्। तथा ह्युद्वेजयन्त्येते भोगा रोगा इवापदि-इति (इष्टोपदेशे)। अत एव दृष्टचरमिदं लोके, यत् पुत्रमृत्य्वाद्यापदि मनोज्ञा अपि विषया दुःखमेवोत्पादयन्ति। अतः सुखार्थिना मुमुक्षुणा वा सर्वात्मना शान्तिलाभार्थं यतनीयम्, तस्यैव मुक्तलाभात्मकतया सुखलाभस्वरूपत्वादिति शम्।

* पू.आ.श्री विजयभुवनभानुसूरिसमुदायवर्तिः।

# गृद्धिः

- *श्रीकमलः

गृद्धिर् नाम तीव्रभौतिकसुखेच्छा, तत् सुखं प्रति प्रबलतमा रतिः, नवं नवं सुखमास्वादितुमिच्छा, वैषयिकसुखलाम्पट्यश्च।

सा गृद्धिर् द्विविधा भवति। तत्र प्रथमा-अभीष्टेच्छा रूपा, द्वितीया आसक्तिरूपा च। प्रथमा तु एकवारं निरन्तरं वैषयिक इच्छास्वरूपा। द्वितीया तु निरन्तरं पुनः पुनः सरसं शुभ्रं प्रभूतं नवं नवं सुखं प्राप्तुं तीव्रेच्छारूपा।

सा गृद्धिर् जीवानां नैकपापप्रवर्धिनी, मम मदीयश्च परो नैव प्राप्नोतु इति भावतया यदि कोऽपि तत्र बाधकस्तदा स्वेच्छापूर्त्यर्थं बहुजीवसंहारो क्रियते जनेन। न वर्तते तत्र कदापि दयालेशः। न च श्रूयते हृदये जीवेभ्यः प्रति स्नेहवार्ताऽपि। नैरन्तर्येण स्वस्वार्थमेव कल्प्यते। न तु मनसि अन्यार्थं, शुभविचारोऽपि प्रादुर्भवति। मम अहश्चैव स्पष्टतया दृष्टिथं समायाति। ना याति स्मरणपथं स्वोपरिकृतोऽन्योपकारः। स्वोपकारकारिणं दृष्ट्वा खेदः अवाप्यते। न विचार्यते परसुखलेशवार्ताऽपि। स्वनिकटवर्तिनं जनं दुःखग्रस्तं दृष्ट्वाऽपि तदर्थं न शुच्यते। स्वजनस्यापि स्नेहो विस्मर्यते। इत्यादयः नैकपापप्रविचारप्रसारकारिमनोवृत्त्योन्मादविषवल्लीवृन्दवर्धनाध्यवसायधाराधोरणीधारिणो भवन्ति प्राणिन गृद्ध्याधीनतागताः।

प्रभूतदोषोद्भवनधरासदृशी सा गृद्धिर्, दुर्गमदुर्गतिदुःखदुरितपापजननी, महत्तमानि त्रीणि दोषानि मुख्यतया समुपार्जयन्ति। तत्र प्रथमं निर्लज्जता, द्वितीयं निर्विवेकिता, तृतीयं शठता।

प्रादुर्भूत सुखसमागमैकतल्लीनमानसोजीवः सर्वप्रकारैर् लज्जां विस्मरति। यथा

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्तिः ।

ललनासुखलोलुपः, दुःखकृत् स्वापमानकृत् कार्यमपि सहर्षं करोति। धनसमृद्धिप्राप्त्यर्थं स्वस्वाम्याज्ञायाः करणार्थं हीनं तुच्छं शब्दं श्रुत्वाऽपि स्वकुलगर्वकार्यं विस्मृत्यापि लेशमपि क्रोधं न करोति। पुनश्च तैरेव निर्दिष्टं कार्यं कर्तुं समुल्लसति, सुतरामानन्दयति, प्राप्तापमानात् तु शिक्षाऽस्तीति सुतरां लक्षयति। स्वापराधं कल्पयति। इत्येवं च स्पर्शन-रसन-घ्राणन-चक्षुः-श्रवणादिपञ्चेन्द्रियजन्यपौद्गलिकसुखगृद्धिपूर्त्यर्थं सर्वमनर्थं गृह्णाति। सर्वमकार्यं करोति। यदि कदाचित् कुत्रचित् सिद्धिं न प्राप्नोति तदा विवेकमपि त्यजति। तदा तु किं करोतीति प्रश्नोद्भवे उत्तरयति यत्। तदा स किं करोतिति। किन्तु किं न करोतीति विचारणीयमस्माभिः।

तदाऽसौ धनेच्छुः केनाऽपि सार्धं स्वसम्बन्धं बध्नाति। अतिनिकृष्टमपि कार्यं करोति। न विचारयति स्वकुलमार्गं। न चिन्तयति स्वजन-सम्बन्धि-ज्ञातेर्जनक-जननीनां च विरोधम्। परनारीप्रसमागम-सप्तव्यसन-मृषावाद-हिंसा-परधनग्रहणादिनामपि सेवनं करोति। तद्सर्वं सुखगृद्धितया निर्विवेकिताया प्रचारपराक्रम इति ज्ञातव्यम्।

एतादृशमनाचाराचरणं कृत्वाऽहं "तत् तत् तद् कारणेन करोमि नाऽहं कदाचन एतादृशाचारकारीति स्वाऽऽकारसंवरणं कृत्वां सज्जनोस्म्यहम् सुष्ठुतया विचारणा-पर्यालोचनादिभिः कार्यकार्यहम् अथवा नाऽहमेतादृशाऽधर्माचारचारीत्यादिभिः स्वकृत-दुष्कृतपापाचारनिह्नवेन शठताजननी गृद्धिरेवाऽस्ति।

इत्येवं प्रकारेण गृद्धिः पापजननी एव ज्ञेया।

अथवा गृह्यते अनया अशुभकर्ममर्मापदः -इति गृद्धिः।

अथवा गृह्यते अनयाऽशुभसङ्कल्पविकल्पावकर इति गृद्धिः।

अथवा यस्या निबन्धनेन गृह्यतेऽप्रशमभावजनिताऽसौख्यम् इति गृद्धिः।

अथवा ग्रस्यते अनया स्वात्मगुणवैभवः इति गृद्धिः।

अथवा ग्रस्यते अनेन स्वबुद्धि-प्रतिभा-चातुर्यादिकम् इति गृद्धिः।

इत्यवं गृद्धेः स्वरूपं विज्ञाय वैषयिकसुखाभिष्वङ्गं प्रति निर्वेदभावो जननीयः। वैराग्यभावः प्रवर्धनीयः। स्वात्मोद्धाराय प्रयासः कर्तव्यः। संसारात् विमुक्तिभावः प्राप्तव्यः। इति शम्।

मोहं निहत्य, मोहमारकं शासनं प्रस्थाप्य,
यो मोक्षं गच्छेत्,
स 'अरिहंत' उच्यते,

# विभाग : २
# अर्वाचीनकृतयः

## खण्ड : ४ प्रकीर्णककृतयः

(वसन्ततिलका)

सत्सन्धिवर्णसहितै [1]वरणैरजेयम्;
खण्डैश्चतुर्भिरयनैश्च[2] सुखप्रवेशम्।
[3]सद्वृत्तवृत्तविपुलं शुभधर्मसद्म;
निःश्रेयसं वरपुरं प्रविशन्तु सन्तः! ।।१।।

काव्यादिनर्त्तकजनैः, [4]परमोदकारं;
सल्लेखसंतति सरः-सुखदं सुरम्यं।
चारित्रचैत्यततिचित्तचमत्कृतं तं;
निःश्रेयसं वरपुरं प्रविशन्तु भव्याः ।।२।।

सभ्यात्मजीवनधनं, गुणरत्नपूर्ण-
मध्यात्म भावस[5]-फलं, वरवृक्षशोभम्।
कारुण्यकाननकलाकमलौघकम्रम्;
निःश्रेयसं वरपुरं, प्रविशन्तु धन्याः ।।३।।

–श्री....

१. कोट्टः 'किल्लो' इति भाषायाम्। २. अयनं-मार्गः
३. सद्वृत्तानि-सच्छन्दांसि-तान्येव वृत्तानि-चरित्राणि तैर्विपुलं यत् तद्।
४. अन्यप्रीतिकरम्। ५. फलसहितं ७. कमलम्।

चारित्रात् सर्वजीवौघान्, स्वात्मवत् मन्यते सुधीः।
जीवरक्षाव्रतं तस्माच्, चारित्रात् स्यान्न किं भवे ।।१५।।

चारित्रात् सत्य-सन्धश्चाऽ, सत्यानां परिपन्थकः।
विश्वास्यः स्याद् ध्रुवं साधुश्, चारित्रात् स्यान्न किं भवे ।।१६।।

न चौर्यमाचरेत् त्यागी, मणिलेष्टुषु साम्यदृक्।
तृणायाऽस्य, निधिस्सर्वः, चारित्रात् स्यान्नकिं भवे ।।१७।।

ब्रह्मणि वर्तते यस्माद्-ब्रह्म च परित्यजन्।
मुच्यते विषयैर्जीवश्, चारित्रात् स्यान्न किं भवे ।।१८।।

लेश्या मूर्च्छाविनिर्मुक्ता, यस्य गृहे वनेऽप्यहो!।
परिग्रहग्रहान्-मुक्तः, चारित्रात् स्यान्न किं भवे ।।१९।।

द्रव्य-क्षेत्रादि-सद्भावैर्निशाऽभोजिव्रतं धरेत्।
तीर्णं जन्म निरीहेन, चारित्रात् स्यान्न किं भवे ।।२०।।

चारित्राददुद्गता नित्यं, कल्पद्रवः स्वयं सदा।
चिंतामणिः स्वयं लब्धश्, चारित्रात् स्यान्न किं भवे ।।२१।।

चारित्राद् स्वीयसौधे स्यात्, सुरधेनुः सुखावहा।
चारित्रात् स्वर्गसंपत्तिश्, चारित्रात् स्यान्न किं भवे? ।।२२।।

चारित्राद् ज्ञानसंसिद्धिः, श्रीसम्यग्दर्शनं तथा।
त्यागस्तपश्च चारित्राच्, चारित्रात् स्यान्न किं भवे? ।।२३।।

चारित्रात् हृदि सद्भावश्, चारित्रान् निर्मलं मनः।
चारित्रात् पावनं जन्म, चारित्रात् स्यान्न किं भवे ।।२४।।

चारित्राच् चित्तनैर्मल्यम्, विरक्ति श्च भवेद् भवे।
विद्या-सिद्धिश्च यस्मात् स्याच्, चारित्रात् स्यान्न किं भवे? ।।२५।।

चारित्रात् सर्वथा सौख्यम्, चारित्रात् सर्वथा हितम्।
चारित्रात् सर्वसन्मानं, चारित्रात् स्यान्न किं भवे? ।।२६।।

(शिखरिणी)

मया दृब्धा माला, सुरभिसुमनःश्रेणि सुभगा;
शुभा नव्या रम्या, परमविमला भावरूचिरा।
विभिन्नैः सद्वर्णैः, नयनरतिदा "**दर्शन**"प्रदा;
गुणाकीर्णा "**श्रेयस्**"-कररचनया, स्यात् सुखप्रदा ।।२७।।

## षष्ठीविभक्तिसंवलिता-श्रीचारित्रसप्तविंशिका-६

(वसन्ततिलका)

ऐन्द्राः स्तुवन्ति भुवनाधिपपार्श्वनाथं,
दुःखापहं, दुरितवल्लिवनैकपार्श्वम्।
भक्त्या नतेषु परिपूरितचिन्तितार्थम्,
हे! पार्श्वदेव! जयताज् जगदेकनेतः? ।।१।।

(अनुष्टुप्)

यस्य सांनिध्यमात्रेण रङ्कोऽपि भूपतिर् भवेत्।
तस्य प्राप्तिर् न किं कुर्याच्, चारित्रस्य बलं महत् ।।२।।

यस्य प्रभावसंपर्काद्, धन्यंमन्या नराः सदा।
लोकं तृणाय मन्यते, चारित्रस्य बलं महत् ।।३।।

यस्य सद्दर्शनान् नित्यं, पुण्यबन्धो भवेन्नृणाम्।
पापतापाद् पुनर् मुक्तिः, चारित्रस्य बलं महत् ।।४।।

यस्य ज्ञानं समाधानं, दत्ते सर्वत्र सर्वदा।
सिद्धिर् ध्यानवतस् तस्य, चारित्रस्य बलं महत् ।।५।।

यस्य क्रिया द्युसद्वल्ली, सर्ववाञ्छितसंप्रदा ।
यतःस्याद् सुविशुद्धात्मा, चारित्रस्य बलं महत् ।।६।।

देव-देवस्य यत् सौख्यम्, राजराजेश्वरस्य च।
ततोधिकं निरीहस्य, चारित्रस्य सुखं महत् ।।७।।

यस्य नास्ति धनं धान्यं, पुत्रः दारा जनन्यपि।
तथाप्यवनताः भूपाश्चारित्रस्य सुखं महत् ।।८।।

यस्य सन्मानलाभाय, नाभिकाङ्क्षा कदाप्यहो।
सर्वथा राग-मुक्तस्य, चारित्रस्य सुखं महत् ।।९।।

यस्य प्रभावप्राबल्याद्, दुर्भगः सुभगो भवेत्।
आत्महितकृतस् तस्य, चारित्रस्य सुखं महत् ।।१०।।

यस्य हस्तङ्गताः सर्वा, देव-मानवसंपदाः।
अध्यात्मभाव-युक्तस्य, चारित्रस्य सुखं महत् ।।११।।

चारित्रस्य परा कीर्तिः, शक्तिर् दीप्तिः परा द्युतिः।
ईदृक् स्थितिः न कस्यापि, चारित्रस्य फलम् महत् ।।१२।।

यस्य शुभ्र-प्रसारेणं, गुणरश्मिं भजेज्जनः।
मदप्रभावमुक्तस्य, चारित्रस्य फलं महत् ।।१३।।

यस्य प्रीतिर्भवं घोरम्, रयादेव विनश्यति।
विश्वे सर्वत्र मुख्यस्य, चारित्रस्य फलं महत्। ।।१४।।

यस्य रागो भवाऽऽवेगं, निर्मूलयति सत्वरम्।
जिनाज्ञारङ्गरक्तस्य, चारित्रस्य फलं महत् ।।१५।।

यस्य स्वभाव-मार्तण्डो-ऽज्ञानतमच्छिदे परम्।
ज्ञानज्योति-प्रवाहस्य, चारित्रस्य फलं महत् ।।१६।।

यस्यैकाध्यवसायं यो, सकृद् वारं स्पृशेद् यदि।
नूनं शिवाध्वगामी स्यात्, चारित्रस्य फलं महत् ।।१७।।

यस्य स्पृहां प्रकुर्वन्ति, देव-दानव-मानवाः।
सौख्यं दुःखाय मन्यन्ते, चारित्रस्य फलं महत् ।।१८।।

यस्य गुणा धरेद् भव्यो, हृदि दोषविनाशिनः।
शुद्धभाववतस् तस्य, चारित्रस्य फलं महत् ।।१९।।

सदा दृढानुरागेण, सेवन्ते यं नरोत्तमाः।
प्राप्नुवन्त्युत्तमं स्थानं, चारित्रस्य फलं महत् ।।२०।।

वन्दनं यस्य सौख्यायाऽर्चा च मुक्तिफला मता।
शरणं भवरक्षायै, चारित्रस्य फलं महत् ।।२१।।

विनयो यस्य स्यान्मूलम्, पुष्प मस्ति समर्पणम्।
सम्यक्त्वं निर्मलं वारि, चारित्रस्य शुभं महत् ।।२२।।

वैराग्यं यस्य बीजं स्या-दङ्कुरो धर्मभावना।
श्रोतुमिच्छा च पर्णानि, चारित्रस्य शुभं महत् ।।२३।।

करुणाभावः सत्स्कन्धः, शाखा यस्य सहिष्णुता।
प्रशाखा समता स्पष्टा, चारित्रस्य शुभं महत् ।।२४।।

सदाचारः, सौरभश्च, सद्धर्मद्रुः सतां मतः।
शिवं शस्यं फलं यस्य, चारित्रस्य शुभं महत् ।।२५।।

गुणसंभारयुक्तस्य, मुक्तस्य पापभारत :।
शरणाद् यस्य सिद्धिः स्याच्, चारित्रस्य शुभं महत् ।।२६।।

(शिखरिणी)

मया चारित्राह्वा, गुणसुरभिभिः पुष्पनिकरैः,
शुभा दृब्धा माला, भवभयहरी, भावरुचिरा।
यदा धत्ते धन्यः, परमरतिदां '**दर्शन**' गुणां,
तदा '**श्रेयः**' स्वास्थ्यं, भवति सुलभं साऽस्त्वविचला ।।२७।।

* * *

## सप्तमीविभक्तिसंवलिता-श्रीचारित्रसप्तविंशिका-१०

(वसन्ततिलका)

ऐँन्द्रैर् वरैर्सुरगिरौ,जिनजन्मकाले;
पूजा कृता विविधभक्तितरङ्गपूर्णा।
कोटीरकोटीसुलसन्मणिशुभ्रकोटिः;
स पार्श्वदेव! जयताद् गुणकोटिरम्य! ।।१।।

(अनुष्टुप्)

चारित्रे हि स्थिताऽहिंसा, द्रव्यभाव समन्विता।
त्रिविधैस्त्रिविधभेदैश्, चारित्रे गुणराशयः ।।२।।

चारित्रे प्रवराक्षान्तिर्, जीवमात्रेषु सर्वथा।
स्वापराधे तु नम्रादृक्, चारित्रे गुणराशयः ।।३।।

छेदनं भेदनं चेत् स्यात्, सत्कृतिश्च तिरस्कृतिः।
समत्वं स्यात् सुचारित्रे, चारित्रे गुणराशयः ।।४।।

चारित्रे मार्दवं प्रष्ठं, नम्रताभावभूषितम्।
औचित्यधारके नित्यं, चारित्रे गुणराशयः ।।५।।

चारित्रे क्रोधजेतारः, क्रोडीकुर्वन्ति सद्गुणान्।
प्राप्नुवन्ति शमानन्दं, चारित्रे गुणराशयः ।।६।।

आर्जवं कोमलो भावश्-, चारित्रे संस्थितः सदा।
सारल्यमण्डितं चेतश्-चारित्रे गुणराशयः ।।७।।

आर्जवं सर्वथा श्रेष्ठं, सद्गुणाऽऽकर्षकं वरम्।
यस्मिन्नैव शुभोदर्कश्, चारित्रे गुणराशयः ।।८।।

निर्मोहः स्याद् तु चारित्रे, आशाकण्डुरुगौषधिः।
हस्तंगता शिवश्रीः स्यात्, चारित्रे गुणराशयः ॥९॥

लोभ-शत्रुविजेत्री या, निर्मुक्ति र्यत्र संवसेत्।
चारित्रे तत्र का चिन्ता, चारित्रे गुण राशयः ॥१०॥

चारित्रे सत्तपः स्थानं, बाह्यान्तरै र्गुणैः परैः।
क्लिष्टकर्माष्टसंनाशे, चारित्रे गुणराशयः ॥११॥

माङ्गल्यभूस्तपो यस्मिन्, चारित्रे वर्धते भृशम्।
मुक्तिकनी भवेद् वश्या, चारित्रे गुणराशयः ॥१२॥

यतना यत्र सम्यक् स्याद्, स संयमः प्रकीर्तितः।
द्रव्यादि-नियमैः पुष्टाश्, चारित्रे गुणराशयः ॥१३॥

सप्तदशादि-भेदैर् यश्, चारित्रे पुष्टिमाप्नुयात्।
प्रज्ञप्तयोगसंशुद्धश्, चारित्रे गुणराशयः ॥१४॥

चारित्रे वर्तते सत्यं, चतुर्भेदसमन्वितम्।
सदोपयुक्तवाक्योगश्, चारित्रे गुणराशयः ॥१५॥

भाषा-समितिसन्निष्ठे, चारित्रे सत्यभाषणं।
हितं मितं प्रियं तथ्यं, चारित्रे गुणराशयः ॥१६॥

शुचिता भावशौचं तु, चारित्रे निर्मलं मनः।
विषयाशक्तिनिर्मुक्तं, चारित्रे गुणराशयः ॥१७॥

वस्त्रे गात्रे मलीनेऽपि, नैर्मल्यभावकारिका।
चारित्रे भावशुद्धिर् हि, चारित्रे गुणराशयः ॥१८॥

आकिञ्चन्यं तु चारित्रे, मनःप्रसत्तिकारणम्।
धनादिममतात्यागाद्, चारित्रे गुणराशयः ॥१९॥

चारित्रे वस्त्र-पात्रेषु, शरीरे भोजने तथा।
परिवारे निरीहत्वं, चारित्रे गुणराशयः ॥२०॥

चारित्रे ब्रह्मचर्यं यद्, वैमुख्यं विषयादिषु।
स्वात्मनि स्थाप्यते स्वात्मा, चारित्रे गुणराशयः ॥२१॥

स्त्री-पशु-पण्डकैर् मुक्ता, चारित्रे वसतिर् वरा।
ब्रह्मगुप्तिषु गुप्तात्मा, चारित्रे गुणराशयः ॥२२॥

अर्हत्प्रोक्तो दशधाऽयं, धर्मः क्वापि न दृश्यते।
तत्-प्राप्तिरऽपि चारित्रे, चारित्रे गुणराशयः ॥२३॥

चारित्रे धृति कान्तिश्च, चारित्रे शक्ति-सञ्चयः।
कीर्तिर् वसेच्च चारित्रे, चारित्रे गुणराशयः ॥२४॥

चारित्रे निर्भयो भावश्, चारित्रे पापवर्जनम्।
चारित्रे पुण्य-संभारश्, चारित्रे गुणराशयः ॥२५॥

एकैव मे स्पृहा चित्ते, चारित्रे जीवितं भवेत्।
मनः संतुष्टिश् चारित्रे, चारित्रे गुणराशयः ॥२६॥

(शिखरिणी)

हतं पापं सर्वं चरणगुणप्रीत्याशुभधिया;
गतं दैन्यं दुःखं, चरणधनलाभादऽरतिदं।
भृतं पुण्यं पूर्णं, चरणसुखलेशेन सुशुभम्;
वृतं "**श्रेयः**" स्पष्टं, परमपदसद्"**दर्शन**"करम् ॥२७॥

* * *

### संबोधनविभक्तिसन्दृब्धा-श्रीचारित्रसप्तविंशिका-११

(वसन्ततिलका)

ऐन्द्रा भजन्ति सहसा, समुदग्रकीर्तिं,
यं पार्श्वनाथममलं, कृत-कृत्य-भावैः।
वामासुतं तमनवद्यं सकलार्थसिद्ध्यै,
सद्यः प्रणौमि विधिना, शुभयोगयुक्तः ॥१॥

(अनुष्टुप्)

सद्गुण-राज-राजेश! सन्मित्र! गुणराजिनाम्।
भवोष्मतप्त [१]श्रीखण्ड!, चारित्र! कुरु मे हितम् ॥२॥

भव्य-कैरव-पर्वेन्दो! रत्नसानो! गुणोच्चये।
समुद्र! गुणगांभीर्ये, चारित्र! कुरु मे हितम् ॥३॥

प्रासाद! गुणलिप्सुनामाराम! सुखरागिणाम्।
वल्लभ! समतावद्राश्, चारित्र! कुरू मे हितम् ॥४॥

१. चन्दनं

महार्थः! दुःखयुक्तानाम्, सार्थवाह! भवाम्बुधौ।
तट! विनयसिन्धूनाम्, चारित्र! कुरु मे हितम् ॥५॥

कर्मदग्धानाममम्भोद! यद्, दुःस्थानाश्च द्युसन्मणे!।
शारद-चन्द्र-सद्वर्ण!, चारित्र! कुरु मे हितम् ॥६॥

दोषकर्दम संशुध्दौ, स्वच्छवारिजलाशय!।
स्फटिकवद् विमलात्मन्!, चारित्र! कुरु मे हितम् ॥७॥

दृढव्रत! सुशीलोप-शान्त-प्रशान्त सन्मते!।
निर्जितरागद्वेषारे!, चारित्र! कुरु मे हितम् ॥८॥

निर्गतमोहमिथ्यात्वदुर्वारशक्तिसञ्चय!
ज्ञेयोपादेयहेयज्ञ!, चारित्र! कुरु मे हितम् ॥९॥

विनिहत-महामोह!, सुनिश्चितपदस्थित!।
सुविज्ञातजगद्धर्म! चारित्र! कुरु मे हितम् ॥१०॥

महावैराग्यसन्मार्गप्रस्थाने प्रोल्लसन्मनाः!।
प्रत्यनीक! कुशीलानां, चारित्र! कुरु मे हितम् ॥११॥

स्त्रीभक्तदेशराजन्य-विकथासुपराङ्मुख!।
सदाधर्मकथासक्त!, चारित्र! कुरु मे हितम् ॥१२॥

धृताऽत्यंतदयाभाव!, ज्ञान-विज्ञान-सञ्चय!।
स्व-परदर्शनज्ञेश!, चारित्र! कुरु मे हितम् ॥१३॥

अहर्निशक्षमाद्यैश्च, भूषणैः पर्यलङ्कृत!।
तपः कार्ये सदोद्यक्त!, चारित्र! कुरु मे हितम् ॥१४॥

गुप्ति-समिति-सल्लक्ष्या-नाचारभाव-वर्जक!।
तनुनिस्पृह-मानस!, चारित्र! कुरु मे हितम् ॥१५॥

अष्टादश सहस्त्र सच्छीशीलांगरथमारूढ!।
अत्यंतगुरुपारतन्त्र्य!, चारित्र! कुरु मे हितम् ॥१६॥

आराधक! स्वशक्त्यैवै-कान्तेनाविराधक!।
सल्लेश्य! सन्मतोल्लासीन्!, चारित्र! कुरु मे हितम् ॥१७॥

सप्तदशविधैःश्रैष्ठैः-संयमैः परिवारित!।
उत्सर्गमार्गरोचिष्णो!, चारित्र! कुरु मे हितम् ॥१८॥

तत्त्वज्ञानैकतल्लीन!, शत्रमित्रेषुतुल्यधी!।
विप्रमुक्त! भयस्थानैश्, चारित्र! कुरु मे हितम् ॥१९॥

मदाष्टकविनिर्मुक्त!, सुखेऽपि रागवर्जितः।
धीर! बहुश्रुताऽऽसक्त!, चारित्र! कुरु मे हितम् ॥२०॥

संयतिप्रतिपक्षधि!, धर्ममार्गोपदेशक!।
मर्यादायांसुमेरो! च, चारित्र! कुरु मे हितम् ॥२१॥

सौम्यलेशिन्! सुदाक्षिण्य!, सदाचारैक-व्यापृत!।
दृढव्रतिन्! दयालो! हे!, चारित्र! कुरु मे हितम् ॥२२॥

प्रतिक्रमण-सत्क्रियाऽऽलोचना-वन्दनादिनाम्।
मांडलिभावदर्शिन्! भो!, चारित्र! कुरु मे हितम् ॥२३॥

षट्कायारंभ निर्मुक्त!, सर्वाशातन-वारक!।
द्रव्य-क्षेत्रादिसद्दर्शि!, चारित्र! कुरु मे हितम् ॥२४॥

गौरवत्रयनिर्मुक्तो-पसर्गादिजयक्षम!।
स्वर्शरीरे निरपेक्ष!, चारित्र! कुरु मे हितम् ॥२५॥

दान-शील-तपो-भावैः, स्वात्मरक्षण लक्ष्यभृत्!।
विशिष्टलब्धिसंयुक्त !, चारित्र! कुरु मे हितम् ॥२६॥

(शिखरिणी)

नताः देवाः सर्वे चरण-चरणं भावनिरताः
मता तुच्छासंपत्, सुरसदनजा वन्दनरसैः।
अनल्पं सौख्यं यद्यतिव्रतेभवं साम्यरसजम्।
प्रणौमि ''**श्रेयस्**'' तं परमरमणं ''**दर्शन**'' करम् ॥२७॥

❀ ❀ ❀

# स्वरूपसुधा

**- मूलकाराः पूर्वाचार्याः श्रीजयशेखरसूरयः**
**वार्त्तिककाराः *प्रियम्**

**इष्टाऽन्न-ऽपान-ऽवसना-ऽऽभरणा-ऽङ्गराग,**
**-स्त्रीभिः सुखं स्फुरति यत् किल कृत्रिमं तत्।**
**आत्मस्वरूपमनिमित्तमनन्यहार्यं,**
**तस्यास्ति यत् सुखमकृत्रिममेतदेव ।।१।। (वसन्ततिलका)**

नन्वस्तु कृत्रिममपि तत् सौख्यम्, तत्त्वात्, अभिमतसौख्यवत्, कस्तत्र दोष इति चेत्? सनिमित्तताऽन्यहार्यता चेति गृहाण। नैमित्तिकं हि तत् सौख्यम्, अतो निमित्ताभावे तस्याप्यभावः, किञ्च दारिद्र्य-रोग-रिपु-मरणादिप्रत्यूहहार्यमपि तद्, अतस्तत्त्वतो न किञ्चिदेतत्। स्यादेतत् यावन्निमित्तसद्भावः, यावच्च तन्न हृतम्, तावदानन्दयत्वेतदिति चेत्? न, असम्भवात्, नश्वरत्वेनैव चिन्तादिदुःखसचिवतया वस्तुतस्तत्त्वानतिक्रमात्, उक्तञ्च-

**चिन्ता गते भवति साध्वसमन्तिकस्थे।**
**मुक्ते तु तप्तिरधिका रमितेऽप्यतृप्तिः।**
**द्वेषोऽन्यभाजि वशवर्त्तिनि दग्धमानः,**
**प्राप्तिः सुखस्य दयिते न कथञ्चिदस्ति- ।।१।।**

इति (आचारवृत्तौ)। अत आत्मस्वरूपाधीने सहजसुख एव यतनीयम्, तन्मात्रत्वात् सुखपदार्थस्येति हृदयम्।

ननु किमिदमात्मस्वरूपमुच्यत इति चेद्? अत्राह -

---

* पू.आ.श्री विजयभुवनभानुसूरिसमुदायवर्तिः ।

**यतः स्मृतः स्याज्जगतां स योग- क्षेमाय तज्जल्पत लोकनाथम्।**

**देवाधिदेवं च यदन्यदेवान्, करोत्यधः प्राप्य परं पदं सः ।।२।।**

न हि योगक्षेमकृतोऽन्यः कोऽपि नाथपदाभिधेयः, नापि स्मृतिमात्र-साधितस्मर्तृसाध्यादतोऽपि परः कोऽपि तत्साधनप्रत्यल इति भावनीयम्। न च क्रीडनपदार्थानुपपत्ते र्देवत्वमेवास्य दुर्घटमिति वाच्यम्, स्वरूपरमणताख्यस्य तस्यात्रोप-पत्तेः, न च प्रसिद्धमेव तदस्त्विति वाच्यम्, अस्यैवोपपन्नतरत्वात्, इतरस्य तत्त्वतो विडम्बनरूपत्वेन क्रीडात्वातिक्रमादिति निपुणं निभालनीयम्। तस्मात्-

**नातः परं ध्येयमिहास्ति किञ्चिन्-नातः परं ज्ञेयमपि प्रसिद्धम्।**

**नातः परं दैवतमस्ति किञ्चिन्-नातः परं तीर्थमपि प्रतीमः ।।३।।**

ध्यानफलानुसारेण हि ध्येयेतरव्यवस्थितिः। तत्सत्फलं हि ध्यानगोचर-गुणसम्पदनुसारि, न चातोऽपि परः सद्गुणसाम्राज्यसम्राट् कोऽपीत्यत इदमात्मस्वरूपमेव परं ध्येयम्, उक्तञ्च-

**जगत्यनुध्यानबलेन शश्वत्, कृतार्थयत्सु प्रसभं भवत्सु।**

**किमाश्रितोऽन्यैः शरणं त्वदन्यः, स्वमांसदानेन वृथा कृपालुः ।।०।।**

इति अयोगव्यवच्छेदद्वात्रिंशिकायाम्।

एवमेव ज्ञेयत्वादावप्यवबोध्यम्। फलस्यैव तत्र तत्र नियामकत्वात्।

ननु च ध्येयत्वादित्वात्मनि सङ्गच्छते तीर्थत्वं तु तत्र कुत इति चेत्? अत्राह-

**नवं नवं तीर्थमिदं वदन्तो, मुग्धाशयास्ते भुवने भ्रमन्ति।**

**येषां न विज्ञातमिदं स्वरूपं, सर्वाऽपि भूरात्मविदां हि तीर्थम्।।४।।**

तत्त्वत आत्मविज्ञानस्यैव तीर्थभूतत्वात्, तीर्यतेऽनेन भवसागर इति तन्निरुक्तेस् तत्रैव समन्वययोगात्, बाह्यस्य निमित्तमात्रत्वादित्याकूतम्।

अतोऽत्रैव यत्नः श्रेयानित्यवधारयति-

**ध्याता यथा मृत् कनकत्वमेति, [१]पिचुः पटत्वं परिकर्मितो वा।**

**सुसंस्कृतः सिद्धरसाभिधाश्च, [२]सूतस्तथाऽऽत्मा परमात्मभावम् ।।५।।**

तस्यापि ध्यानपरिकर्मसंस्कारबलेन तत्परिणतियोगादिति भावः। भवति हि ध्यानादिना तद्विज्ञानम्, आत्मज्ञानफलं ध्यानम्-इत्युक्तेः, ततोऽपि समरसाऽऽपत्त्या परमात्मतत्त्वसिद्धिरिति विधान्तरेण व्याख्याति-

१. कर्प्पासः २. पारदः ३. मिथो भ्रातृभावं भजन्त इत्याशयः।

**मिथो मदाध्मातमनांसि तावद्, द्रुह्यन्ति सर्वाण्यपि दर्शनानि।**

**यावन्न विज्ञातमिदं स्वरूपं, दृष्टात्मतत्त्वानि तु सीदरन्ति ।।६।।**

स्वरूपाज्ञानैकप्रभवत्वेन दोषाणां तत्प्रतिपक्षनाश्यत्वानपायात्। अभिहितश्च-

**ममैव देवो देवः स्यात्, तव नैवेति केवलम्।**

**मत्सरस्फूर्जितं सर्वमज्ञानानां विजृम्भितम्।।**

यथावस्थितविज्ञात-तत्स्वरूपास्तु किं क्वचिद्,

विवदन्ते महात्मानस्-तत्त्वविश्रान्तदृष्टयः? ।। ।। इति (योगसारे)।

यत एवम्, ततः

**विद्याऽनवद्या सहिताऽमुना या, शेषा अविद्या भवचारपद्याः।**

**विचित्रशास्त्रान्धतमिस्रमूढा, अध्यात्मवन्ध्याः कुगतौ पतन्ति ।।७।।**

आत्मज्ञानस्यैव मुक्तिदत्वेन तद्विकलस्येतरज्ञानस्य भवावारपारपरपारप्रापणेऽत्यन्तमसमर्थत्वात्, अन्वाह्-

ज्ञाते ह्यात्मनि नो भूयो, ज्ञातव्यमवशिष्यते।

अज्ञाते पुनरेतस्मिन् ज्ञानमन्यन्निरर्थकम्- इति (अध्यात्मसारे)।

अन्यत्रापि-अन्यशास्त्र-प्रवृत्तिर्यतेश्चेत्? उष्ट्रकुङ्कुमभारवद् व्यर्थः प्रयासः-इति (उपनिषत्सु)।

विधान्तरेणास्यैवानुभावमनुभावयति-

**गेयाश्च कैरप्यपरैर्विगेयाः, सर्वेऽपि भावा भुवनप्रसिद्धाः।**

**अस्य स्वरूपं पुनराप्तक्ष्यं, दूष्यं न केनाऽपि सचेतनेन ।।८।।**

सचेतनस्यास्थानदूषणाऽऽपादनायोगात्। निर्दूषणत्वमेवास्य प्रकारान्तेण प्रकटयति-

**कृशीशसेवाव्यवस्य पाशु-पाल्याम्बुधिक्ष्माक्रमणाद्युपायाः।**

**सर्वेऽपि सन्दिग्धफला नराणां, स्वल्पाऽपि सेवाऽस्य पुनर्न मोघा ।।९।।**

तत्त्वतोऽस्य सेवाभिलाषस्याप्यमोघत्वानपायात्। न ह्यतोऽन्यथा प्रेक्षावतामत्र तदभिलाषाद्युपपद्यत इति। तथा चोच्यते।

बहिस्तुष्यति मूढात्मा, पिहितज्योतिरन्तरे।

तुष्यत्यन्तः प्रबुद्धात्मा, बहिर्व्यावृत्तकौतुकः ।। ।। इति (समाधितन्त्रे)

ननु किन्नाम तोषनिबन्धनमिति चेत्? किं नेति पृच्छ्यताम्। ननु कथमेतदेवमिति चेत्? अत्राह-

**कल्पद्रुम-स्वर्मणि-कामधेनु-सच्छङ्खमुख्या ददते कदापि।**

**किञ्चित् क्वचित् कस्यचिदिष्टवस्तु, न सर्वदोऽस्मादपरः प्रतीतः ।।९।।**

अतोऽधरीकृतकल्पद्रुमादावत्रैव यत्नः श्रेयान् श्रेयस्कामिनामिति तात्पर्यम्। सुखार्थं ह्यर्थ्यतेऽर्थिभिर्धनादिकं सुरतरुप्रभृतिभ्यः, तच्चेत् सर्वोत्कृष्टकाष्ठाप्राप्तमात्मस्वरूपत एव लभ्यते, तदा सूपपन्नमेव तत्सर्वदत्वमिति सूक्ष्ममीक्षणीयम्।

एवञ्च

**तन्वन्ति चाटूनि सृजन्ति दास्यं, धनाशया तद्धनिनामधीराः।**

**यद्येकमेकाग्रममुं भजन्ते, न दुर्लभं तत् त्रिजगत्प्रभुत्वम् ।।१०।।**

धिया राजन्त इति धीरा इति व्युत्पत्त्यर्थविकलतयाऽधीरा एव ते, येऽस्थानाभियोगेन क्लिश्यन्ति, स्थानाभियोगस्यैव धीरलक्ष्मत्वादिति हृदयम्। न चात्मस्वरूपस्यैव स्थानभाव इति दुःश्रद्धेयमिति वाच्यम्, तद्गोचराभियोगस्योत्कृष्टतोऽन्तर्मुहूर्त्तमात्रादेव कालात् कैवल्यप्रदत्वात्, सेयं सुरासुरनरेश्वरतामिति सूक्तम्, न दुर्लभं तत् त्रिजगत्प्रभुत्वम् इति। पर्यवसितमाह-

**अयं महामङ्गलमेष मन्त्रो, महोत्सवोऽयं सुकृताङ्गमेषः।**

**अयं हि चिन्तामणिरेष रक्षौ-षधं नृणां बन्धुरबन्धुरेषः ।।११।।**

अयमात्मैव महामङ्गलम्, मां गालयति भवादिति निरुक्तियोगाच्छेषाशेष-मङ्गलातिशयित्वात्। किञ्चैष एव मन्त्रः, मननकृतस् त्राणकर्मणि प्रवणतमत्वात्। अपि चायमेव महोत्सवः, अखण्डानन्दस्यात्रैव प्रवृत्तियोगात्। तथैष सुकृताङ्गम्, अखिलसुकृतप्रधानावयवभूतत्वात्। अपि चायं हि चिन्तामणिः, चिन्तितपूरकतया तत्सदृशचरित्रत्वेन तद्व्यपदेशयोगित्वात्। किञ्चैष रक्षौषधम्, एतद्गुणबले मोहबलस्यावश्यं पराजययोगात्। तथैष नृणामबन्धुरपि तत्त्वतो बन्धुरेव, एकान्तहितकारित्वात्।

अतः

**नीरूपं विश्वरूपं, सकलमकलनं, व्यक्तमव्यक्तमेकं,**

**चानेकं पुण्यपाप-प्रकृतिमतिगतं, योगिलक्ष्यं ह्यलक्ष्यम्।**

**भावाभावस्वभावं, सगुणमपगुणं, नायकं नायकानां,**

**ध्येयानां ध्येयमेकं, प्रणमत परमात्मानमिष्टार्थसिद्ध्यै ।।१२।। (स्रग्धरा)**

न च नीरूपं विश्वरूपमिति व्याहतमिति वाच्यम्, स्याद्वादे व्याहतिविरहात्, व्यक्तदृश्यमानरूपवर्जिततया निजज्ञानाऽऽदर्शप्रतिबिम्बितत्रैलोक्यतया च तत्तद्रूपयोगात्,

अत एव पारमर्षम्-'अर्पितानर्पितसिद्धेः'-इति (तत्त्वार्थसूत्रे) एवमग्रेऽप्यूह्यम्, न तु व्याहत्यारेका विधेया। परमात्मेति स्थानाभियोगयोगितया प्रादुर्भूतविशुद्धस्वस्वरूप आत्मैव, स च तथाविधनिजप्रभावतः स्वभावत एव प्रणतेष्टार्थसिद्धिविधौ प्रभवति, तत्प्रणामश्च भावतस्तत्स्वरूपस्पृहया तदाविर्भावोपायाऽऽदृतिरेव, अतो यतितव्यमस्यां प्रयत्नत इत्यत्रोपदेशसर्वस्वम्। इति **प्रबोधचिन्तामणि**सप्तमाधिकारांशरूपायाः स्वरूपसुधाया वृत्तिः। मिथ्याऽस्तु दुरुक्तं मम। शोधयन्तु बहुश्रुताः।

❀ ❀ ❀

परमात्मा नाम-रागद्वेषाभ्यां परः,
सर्वदा स्वस्वरूपे रममाणः,
यस्य न जन्म, न मरणं, सर्वदा जीवितव्यं,
जीवने चैकस्यापि परपदार्थस्य नैरपेक्ष्यम् सः।

# अस्ति सुखम् संसारे?

- *मुनिश्री प्रियंकरप्रभविजयः

अनाद्यनन्तसंसारे सर्वेऽपि जीवाः सुखमेव इच्छन्ति। दुःखम् नैव, इच्छन्ति।

सुखार्थम् अत्र तत्र सर्वत्र परिभ्रमन्ति, अटन्ति, गच्छन्ति च। सर्वेषाम् जीवानाम् केन्द्रस्थाने सुखम् एव आसीत्, अस्ति भविष्यति च। कदाऽपि दुःखेन केन्द्रस्थानम्, न गृहीतम् गृह्यमाणम्, न ग्रहीष्यति।

एवं प्रकारेण सर्वत्र सुखस्य एव प्रधानता वर्तते।

अस्मिन् विषये-

अनेके दृष्टान्ता दृश्यन्ते।

अनेकाः कथाः कथ्यन्ते।

अनेकानि रुपकाणि च वर्तन्ते।

मयाऽपि विषयेऽस्मिन् गुरूणाम् आशीर्वादान् गृहीत्वा किञ्चित् चिन्तितम् वर्तते तदत्र प्रस्तूयते।

सनातनधर्मेऽपि पौराणिक-काले घटिता एका घटना वर्तते। सा घटना रम्या हास्यदा च वर्तते। सा उच्यतेऽत्र।

एकदा अस्मिन् भूतले देवलोकात् द्वौ देवौ समायातौ। नाम च तयोः-

विष्णुः, महेशश्च।

ताभ्यां चिन्तितम्- "खलु अस्मिन् जगति एकः अहम् एव दुःखी अस्मि। मत्तः न अन्यः कोऽपि अधिकदुःखी" इति विचिन्त्य, तौ द्वावपि इतः ततः विचरतः। कियत्कालः निर्गतः एवम्।

एकदा अटित्वा अटित्वा विष्णुः एकस्मिन् वने समायातः।

* पू.आ.श्री केशरसूरीश्वरजी समुदायवर्तिः।

तस्मिन् एव समये अन्यत्र परिभ्रम्य शिवोऽपि तत्र एव वने समायातः।

विष्णुः - अरे प्रभो! किम् वर्तते?

सर्वम् शोभनम् वा?

शिवः - रे किम् कथयामि....।

मद्वृतान्तम् यदि त्वम् ज्ञाष्यसि तर्हि चकितः भविष्यसि!

अस्मिन् जगति सर्वतः अधिकः दुःखी अहम् एव अस्मि।

विष्णुः - रे प्रभो! मा हस एवम्!

शिवः - रे नैव हास्यम्, एतत् सत्यम्।

विष्णुः - तर्हि कथम् प्रभो!

शिवः - जानीहि वत्स!....जानीहि....!

विष्णुः - प्रभो! शीघ्रम् कथय! अहम् तु न मन्ये।

शिवः - शृणु!

मम द्वौ पुत्रौ स्तः।

(१) एकः गणेशः

(२) अपरश्च कार्तिकेयः।

अथ गणेशवृत्तान्तम् प्रारभ्यते-

सः लम्बोदरः। गजाननः। मूषकयानः। मन्दगमनः। स्थूलकायः।

(एतत् श्रुत्वा विष्णुः मध्ये वदति)

विष्णुः - प्रभो! सत्यम् एतत्।

किन्तु अनेन किं...! येन भवतः दुःखम् भवेत्।

शिवः - शृणु वत्स...! शृणु..., धैर्यम् च धारय।

विष्णुः - आम्! प्रभो! कथय

अधुना अहम् किमपि न वदामि।

(विष्णुः तूष्णीकः जातः शिवश्च वदति)

शिवः - मम अपर पुत्रः कार्तिकेयः। मयूरयानः। कृशकायः। शीघ्र गामी। कार्य कुशलः।

विष्णुः - तथाऽपि का बाधा भवतः प्रभो! एतत् तु सर्वम् अपि शोभनम् एव दृश्यते।

शिवः - विष्णो!....(आक्रोशेन सह)

विष्णुः - आम् प्रभो। आम्!...

शिवः - बाधा अनयो द्वयोः पुत्रयोः न। न तु एनयोः वृत्तान्ते। किन्तु बाधा अथ दृश्यते!

मद्वृत्तान्तम् अनन्तम्....

अहम् पार्वत्या: पति: तथाऽपि उमेश:।

अहम् अमर: तथाऽपि नील-कण्ठ:।

अहम् अभय: तथाऽपि सर्पेण वेष्टितकण्ठ:।

अहम् देवाधिदेव: तथाऽपि भस्म-देह:।

अहम् देवाधिदेव: तथाऽपि मम भार्या मानुषी।

मम भार्या पार्वती अस्ति।

सा च हिमालय-सुता।

सा भवानी अपराऽभिधया।

तस्या: वाहनम् केसरी

इति अस्मदीय: परिवार:, तस्य परिचयश्च।

अथ मम पुत्रस्य गणेशस्य वाहनम् मूषकम् दृष्ट्वा तदनु अहि: प्रधावति।

सः (गणेशः) तु तद्रक्षार्थम् महत्कष्टेन इत: तत: निःसरति। अत: मया एव अहि: निवार्यते।

मम सर्पम् दृष्ट्वा कार्तिकेयस्य गरुडः, तं भक्षयितुं धावति। अत: तस्य सर्पस्य रक्षणाय मयाऽपि परिभ्राम्यते। मम पुत्रम् गजाननम् गणेशम् दृष्ट्वा मम भार्याया: यानं केसरी तं गजाननम् भक्षयितुं प्रधावति। मम शिरसि गङ्गा वर्ततेतमाम्। मम भार्या शोक्य रूपेण ताम् पश्यति। मयि च खिन्ना जाता। अनया रीत्या मम सर्व: परिवार: येन केनाऽपि प्रकारेण दु:खी वर्तते। अहमपि अतीव खिन्न: भूत:। मयाऽपि पीतम् विषम्। तथाऽपि अत्र एव जीवन् अस्मि। इत: अधिकम् किम् कष्टम् वर्तते।

एवं रीत्या अस्मिन् असारे संसारे सर्वेऽपि जीवा: येन केनाऽपि प्रकारेण दु:खिन: एव वर्तन्ते।

अत: दु:खमनुभूय खेदम् मा कुर्वीत। अपित सुखाय प्रयतध्वम्।

।। इति विष्णु-विषाद-वृत्तान्तम् ।।

शिव: - रे भ्रात:! त्वदीयम् सर्वम् शोभनम् वर्तते किम्?

विष्णु:- रे प्रभो! यदि भवादृशाम् अपि शोभनं न वर्तते, तर्हि अस्मादृशाम् किम्?

शिव: - रे! किं भूतं? कथय!

विष्णु:- हे महादेव!

इदं जगत् त्वदीयम्। त्वं एव समर्थ:। सर्वत्र तवैव प्रभुत्वम्।

तथाऽपि शान्ति: न भवत्समीपे। सुखं न भवत्समीपे। हर्ष: न भवत्समीपे।

आनन्द: न भवत्समीपे। केवलं विषाद: एव वर्तते।

शिव: - (मध्ये) रे! यत् कथ्यं स्यात्, तस्य वार्तां कुरु।

मदीयं तु अहं जानामि, तत् त्यज, त्वदीयं एव कथय।

विष्णु: - शृणु, शृणु। प्रभो!

(१) मम शयनं शेषनागस्य उपरि वर्तते। अत: अहं प्रतिदिनम् भयाऽकुल: एव अस्मि।

(२) सोऽपि शेषनाग: समुद्र-मध्ये अस्ति। अत: अधिका भी: वर्तते।

(३) अन्यत् तु सोऽपि समुद्रे तरति। अत: भी: अधिकतरा भवति।

(४) मम यानं गरुल: वर्तते। सोऽपि अहे: शत्रु: अस्ति।

(५) अत: अनेकश:, तयो: द्वयो: मध्ये युद्धं (कलि:) भवति।

(६) एतस्याम् अवस्थायाम् निद्रा पि न समायाति।

(७) पश्चाच्च देह: अपि कार्यम् कर्तुं न शक्नोति।

अत: मम जीवने-

भी:, खेद:, अशान्ति:, श्रम:, क्लम:, तन्द्रा, आलस्यम् इत्यादीनि एव वर्तन्ते।

।। उपसंहार: ।।

एवं अस्मिन् संसारे सर्वेऽपि जीवा: सुखम् इच्छन्ति। तदनु च धावन्ति। किन्तु पुण्यात्मा एव सुखम् आप्नोति। न तु सत्तावान् इति।

धर्माद् एव पुण्यम् भवति।

पुण्याद् एव जीव: सुखी भवति।

तस्मात्-

भो भव्या:! धर्मम् एव कुर्वीत।

धर्मे एव पुरुषार्थं कुर्वीत।

।। शुभम् भूयात् ।।

❀ ❀ ❀

इमौ अर्थकामौ हृदयपूर्वकं त्यक्तुम् यः शिक्षयति, स सुधर्मः।

# श्रीजीरावलापार्श्वप्रभुस्तोत्रम्

- *मुनिश्रीज्ञानभूषणविजयः

जनगणमनसस् त्वं तापसंनाशकोऽसि,
जनगणमनसस् त्वं भावसंवर्धकोऽसि।
जनगणमनसस् त्वं स्वेष्टसंपूरकोऽसि,
जय जय जगति त्वं, पार्श्वजीरावलाख्य! ।।१।।

सुरनरसमुदाया भक्तिनिष्ठैकचित्तैर्-
भुवनजनहितेच्छो-र्नाम यस्य स्मरन्ति।
परमसुखसमृद्धिं, प्राप्नुवन्ति स्वसिद्धिं,
जय जय जगति त्वं, पार्श्वजीरावलाख्य! ।।२।।

कमठ-धरणयोस्तु, स्वोचितं कर्मकर्त्रोर्,
जिन! तव हृदये या, वर्तते तुल्यवृत्तिः।
मम हृदि जयतात् सा, साम्यसाम्राज्यराज्ञी,
जय जय जगति त्वं, पार्श्वजीरावलाख्य! ।।३।।

वसति चरणपद्मे, यस्य दिव्यविभूती-
रसति वदनपद्मे यस्य धर्मालिमाला।
अतति हृदयपद्मे यस्य वात्सल्यसिन्धुर्-
जय जय जगति त्वं, पार्श्वजीरावलाख्य! ।।४।।

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्तिः ।

सकलसुरसुरेन्द्रा, यस्य पादौ नमन्ति,
सकल नरनरेन्द्रा, यस्य वाचं स्मरन्ति।
सकल बुधबुधेन्द्रा, यस्य मार्गे प्रयान्ति,
जय जय जगति त्वं, पार्श्वजीरावलाख्य! ।।५।।

भवजलधिनिमग्नं, सर्पमुद्धृत्य येन,
विबुधवसतिमध्ये, स्थापितो बोधिदानात्।
शिवसरसि जिनेशो, हंसवद् राजते यो,
जय जय जगति त्वं, पार्श्वजीरावलाख्य! ।।६।।

जिनवरप्रतिमानां, स्थापना प्रक्रमेषु,
बहुश्रुतविधिकारा, यस्य नामाऽऽलिखन्ति।
[1]लिखतु स मम चित्तं, तीर्थजीरावलीशो,
जय जय जगति त्वं पार्श्वजीरावलाख्य! ।।७।।

सर्वज्ञधर्मकथिनस्तपगच्छराज्ञः,
**श्रीरामचन्द्र**–मुनिपस्य शुभाशिषा च।
श्रीमद् **महोदय**गणेश्वरपट्टधारि–
**श्रीहेमभूषण**गणेश–वराज्ञया च ।।८।।

सूरीश**कीर्तियश**सो वरनोदनाभिः,
प्रारब्ध आर्हतगृहे परिपूर्त्तिमाप्ते।
जीरावला जिनवरप्रभुपार्श्वदेव!
**'ज्ञानं'** ददातु [2]वरभव्य! [3]मनोज्ञबोध! ।।९।।युग्मम्।।

❀ ❀ ❀

---

१. मारा चित्तने लखो अर्थात् अज्ञानी चित्तने ज्ञानी बनावो एवो लक्ष्यार्थ छे।
२. वरेण दानेन भव्यः=वरभव्यः तत् सम्बोधने।
वराः श्रेष्ठाः भव्याः येन स = वरभव्यः, तत् सम्बोधने वा।
३. मनः जानाति ज्ञायते वा येन स = मनोज्ञः,
मनोज्ञः बोधः यस्य स=मनोज्ञबोधः तत् सम्बोधने।

# श्री हरिभद्रसूरिकृद् ''धर्मबिन्दु''-ग्रन्थरत्नस्य परिचयः

- *मुनिश्री आत्मदर्शनविजयः

''पुरुषविश्वासे वचनविश्वास'' इति वचनात् प्रथमं तावदस्य ग्रन्थरत्नकर्तुः परिचयो दीयते, ग्रन्थस्यादेयतानिमितत्त्वादिति।

तत्र श्रीजैनशासन भोङ्गणेऽस्तमिते केवलज्ञानसूर्ये, पूर्वगतश्रुतज्ञानचन्द्रे च विरहिते श्री वीरनिर्वाणाद-क्षाङ्गानन्तांगुष्ठसंख्यकवर्षे (वीर१०५५) वैक्रमीये चेषुकरीगिरिवर्षे (वि.५८५) श्रीजिनभद्रसूरेः (श्रीजिनभट्टाचार्यस्य) निखिलशास्त्रार्थधुराधौरीणाः श्रीहरिभद्रसूरयः पट्टदीपका अभवन्।

यद्यपि श्रीवीरशासनान्वये श्रीहरिभद्रसूरिनाम्ना मुख्यवृत्त्या नवसूरयोऽभवन्। तथाप्यत्र भवविरहाङ्क-याकिनीमहत्तराधर्मसूनवः श्रीहरिभद्रसूरीश्वरा एवास्य श्रीधर्मबिन्दु-शास्त्रस्य कर्तारोऽभिप्रेताः।

**श्रीहरिभद्राचार्याणां प्रबन्धश्लेषः।**

चित्रकूटपर्वते (चित्तोडगढापरपर्याये) पुरा श्रीजितशत्रुराज्ञो हरिभद्रनामा पुरोहितश्चतुर्दशविद्याविददम्यज्ञानमददृप्त आसीत्। तेन प्राप्तमिथ्याज्ञानाभिमानेन ''ज्ञानपूर्णत्वान् मम पोट्टं मा स्फुटेद्'' इति दुर्धिया स्वोदरे सुवर्णपट्टको बद्धः; ''अस्मिन् जंबूद्वीपे मम कोऽपि प्रतिवादी नास्ति'' इति जंबूवृक्षलता धृता; भूमौ यत्र कुत्रापि कोऽपि नूत्नप्रतिवादी यदि श्रुतिपथमागच्छेत्, तर्हि तत्समीपं वादार्थं गमनाय हल-निःश्रेणिरूपोपकरण-विशेषावपि धृत्वा निष्प्रतिवादिमात्रं जगत् कर्तुं तिष्ठति स्म।

ब्राह्मणकुलजातत्वेन ''श्रमणब्राह्मणानां जातिवैरम्'' इतिवचनात् तस्य जिनमत-देवविषयः प्रचण्डद्वेषो वर्त्तते स्म। तेनैकदा राजभवनगमनावसरे ''हस्तिना ताड्यमानोऽपि न

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्तिः।

गच्छेज् जिनमंदिरे'' इति वाग्बद्धोऽपि प्रत्यक्षमत्र द्विपप्रतीपपातनादनिच्छयापि स्वत्राणाय प्रविश्य जिनमंदिरे जिनबिंबावलोकनेन उदगीष्ट स्म,

''वपुरेव तवाचष्टे, स्पष्टं मिष्टान्नभोजनम्।
नहि कोटरसंस्थेऽग्नौ तरु-र्भवति शाड्वलः ।।१।।इति।।

जिनमतद्वेषकलुषितसर्वदर्शनाभ्यासपरिकर्मिततार्किकमति-प्रज्ञाप्रागल्भ्य-शक्ति-युक्ते पुरोहितत्वेऽपि कर्दमे रत्नमिव तस्य भाविभद्रताक्षिप्तशुद्धतत्वजिज्ञासा-प्रयुक्तो-ऽभिग्रहविशेष आसीत्, यथाहि ''येनाभिहितं किमपि यद्यहं नावबुध्येय, तर्हि तच्छिशष्यो भवेयम्'' इति।

एतत् प्रतिज्ञानिर्वाहदृढत्वमेव तस्य जिनशासनप्राप्तिनिमित्तं जातम् ,तद् वृत्तान्तश्चैवम्-कदापि राजसभायाः प्रत्यावृत्तेन पूज्यसाध्वीगणप्रतिश्रयाधो गच्छता हरिभद्र--पुरोहितेन ''**चक्कीदुगं हरिपणगं, पणगं चक्कीण केसवो चक्की। केशव चक्की केसव, दुचक्की केसी अ चक्की।।१।।** महत्तरापरावर्तमानाया-अवसर्पिणी-जातद्वादशचक्रवर्तिनववासुदेवक्रम-निर्देशकाऽऽवश्यकनिर्युक्तिगतगाथायाः श्रवणेन स्थिरचित्त-कायाभ्यां तदर्थ उह्यते। यावत् तदर्थानवगमेन न किमपि निर्णीयते, तावत् प्रतिश्रयमध्ये प्रविश्य हरिभद्रो महत्तरां सविनयं पृच्छति,

''किमियं चक्की चकचकायते ?''

तदोपलब्धराजमान्यपण्डितंमन्याऽऽकृत्या महत्तरया सामान्यपदेनैव कृतायां तद्-व्याख्यायां पुरोहितवरः स्वप्रतिज्ञानिर्वाहार्थं बालभावेन तस्यै स्वशिष्यत्वं विज्ञप्तवान्।

जिनोपदिष्टसाध्वीगणमर्यादाविज्ञा महत्तरा मधुरालापकैस्तं प्रबोधयामास,

''हे महाभाग! नास्माभिः पुरुषान् प्रत्युपदेशो दीयते, न च ते शिष्यीक्रियन्ते। एतत्सर्वाधिकारोऽस्माकमाचार्याणामेव वर्तते। ते च सविधोपाश्रये तिष्ठन्ति। तेषां सन्निधावेव विशेषार्थबोधं गृहीत्वा शिष्यत्वं च प्रतिपद्यस्व।''

समीपोपाश्रयस्थश्रीजिनभद्रसूरयोऽपि भाविशासनप्रभावकप्रतिभासंपन्नं तं पात्रं विज्ञाय ''चक्कीदुगं हरिपणगं'' वृत्तविशेषार्थमात्रमुक्त्वा सर्वद्वादशाङ्गीनिःस्यन्दग्राहणार्थमष्ट प्रवचनमातृकापदादारभ्य यावच्चरणकरणसित्तरीरुप-ग्रहणाऽऽसेवनाशिक्षाद्वयमप्युपदिष्ट-वन्तः। तैलबिन्दुरिव सूरे-र्वचनं स्वच्छजलरूपद्विजवरमतौ प्रसृतम्। क्रमेण च सत्यसंन्धः श्रीहरिभद्रपुरोहितः सर्वसंयमं लात्वा मुनिहरिभद्रो बभूव।

तदनन्तरं तैरेव महाभागै-र्जिनमूर्त्यवलोकन उच्चारितम्-

''**वपुरेव तवाचष्टे, भगवन्! वीतरागताम् ।**

**नहि कोटरसंस्थेऽग्नौ, तरु-र्भवति शाड्वलः ।।१।।''** इति

गुरुदत्तेन सम्यग्श्रद्धारुपतत्त्वप्रीतिकरजलेन तस्य सर्वकलुषितमिथ्याज्ञानं शुद्धं जातम्। गुरुनिश्रायां श्रुतज्ञानसर्वस्वमभ्यस्यन्नानुपूर्व्यावश्यकनिर्युक्तिगतबोधदं वृत्तमपि विज्ञाय गुरुकृपाबलादन्तिमपूर्वधरश्रीसत्यमित्रान्वयावशिष्टपूर्वश्रुतरहस्यं यावत् स्वकुशाग्रीयमत्या ते पूज्या प्रबुद्धवन्तः।

एवं जिनागमरहस्यमवाप्य तैरेव-जिनाग्रे कदाचित् साश्रु पूत्कृतम्,

''कत्थं अम्हारिसा [1]पाणी?, दूसमा दोस दूसिआ ।
हा! अणाहा, कहं हुंता?, न हुंतो जइ जिणागमो? ।।इति।।

।। संबोधप्रकरण ८०२।।

आगमज्ञानपरिणतत्वेन तेषां गुरुभिस्ते जिनशासनस्य तृतीयपदे प्रतिष्ठापिताः, स्वपट्टे च स्थापिताः। मुनिहरिभद्र, आचार्यश्रीहरिभद्रसूरयोऽभवन्।

तेषां पूज्यानां द्वौ भागिनेयौ हंस-परमहंसौ शिष्यौ बभूवतुः। ताभ्यामपि पूज्यापादाग्रे न्यायालङ्कार-तर्क-षड्दर्शनप्रभृतिशास्त्राध्ययनं कृतमासीत्। अपितु बौद्धदर्शनस्य विशेषाध्ययनकरणे तयोर्मतिः प्रकर्षेणोल्लसति। तेन दक्षिणप्रान्तगतसुगतमठे स्थित्वा-ध्ययनार्थं ताभ्यां गुरुवर्यो विज्ञप्तः। परंतु तत्र किमपि भाव्यनर्थं मत्वा गुरुभिर्नानुज्ञातौ। द्वि-त्रायावद गुरुनिषेधेऽपि प्रबलेच्छया ताभ्यां दक्षिणदिशां प्रति विहार आदृतः।

गुप्तवेषेण प्राप्तमठप्रवेशाभ्यां ताभ्यां सुगतमताध्ययनं प्रकृतम्। क्रमेण बौद्धा-नामकाट्ययुक्तिनां स्यादवादमुद्रया खण्डनं पत्रेष्ववतारितम्। केनापि निमित्तेन भिक्षुभिरेतदज्ञायि,

''कोऽपि जैनश्रमणो वेशान्तरेण मठे स्थित्वाऽस्माकं सिद्धान्तान् दूषयितुं प्रवृत्तो वर्तते। अतस्तस्यान्वेषणं कार्यम्।'' इति तदुपायरूपेण तैरध्येतॄणां गमनागमनमार्गे श्रीजिनप्रतिमाऽऽलेखिता।

हंस-परमहंसमुनिभ्यां तन्मार्गगमनवेलायामौत्पातिकीबुद्ध्या जिनप्रतिमायां त्रिरेखा आलिख्य कल्पितबौद्धप्रतिमोपरि पादन्यासं कृत्वा गमनं कृतम्।

जैनश्रमणत्वेन प्रत्यायिताभ्यां ताभ्याम् ''अतः परं तत्र स्थितिरश्रेयस्करीति'' मत्वा पलायनं कृतम्। बौद्धैरपि नृपपार्श्वात् तयोः पृष्ठे सैनिकाः प्रेषिताः। द्वावपि मुनी सहस्रमल्लत्वेन सैनिकैः सह सुष्ठु युध्येते स्म; अपितु दैवयोगाद् हंसः परासुर्जातः। परमहंसस्तु बौद्धदषण-खण्डनपत्राणि गृहीत्वा महाकष्टेन गुरोः पादमूलमागत्य पत्रैः सह मिथ्यादुष्कृतं दत्वा

१. जीवा सं.प्र.५१३।

स्वप्राणान् तत्याज।

स्वप्रियशिष्ययोरेवमकाले विरहं प्राप्य प्रचण्डकोपवैश्वानराविष्टः सूरीश्वरः स्वाकर्षणविद्यया चतुश्चत्वारिंशदधिकचतुर्दशशतबौद्धान् सूरसेननृपसभायां वादार्थं खमार्गेणाकृष्टवान्। निर्णीतं च तत्र "योऽस्मिन् वादे पराजेष्यते स तप्ततैलकटाहे क्षेप्स्यते।" केनापि माध्यमेन तदनिष्टानुबन्धिकृत्यं श्रीजिनभद्राचार्यैं गुरुभिर् ज्ञातम्। तन्निवारणार्थं च कषायविपाकप्रबोधकं गुणसेनाऽग्निशर्मणोरेकपक्षिवैरनिबद्धं नवभवसंबन्धसंदृब्धं वृत्तत्रयं प्रेषितम्। तच्चैवम्,

"गुणसेन-अग्गिसम्मा, सिंहाणंदाय तह पिआ पुत्ता।
सिहि-जालिणी माइ-सुओ, धण-धणसिरिमो अ पइ-भज्जा।।१।।
जय-विजया य सहोयर, धरणो-लच्छिय तह पई भज्जा।
सेण विसेणा पित्तअ, उत्तर जंमंमि सत्तमए ।।२।।
गुणचंद वाणमंतर, समराइच्च गिरिसेण पाणो अ।
एगस्स तओ मुक्खोऽणंतो बिअस्स संसारो ।।३।। इति।

तत्प्रभावेण स्वकृततीव्रकषायनिमित्तचतुश्चत्वारिंशदधिकचतुर्दशशतबौद्धघ्न-वृत्तिजकर्मशोधनार्थं जातपश्चात्तापाः श्रीहरिभद्रसूरयश्चतुश्चत्वारिंशदधिकचतुर्दशशत-ग्रन्थरत्ननिर्माणसङ्कल्पं चक्रुः। तेषु प्रथमं तैरिदमेव गुणसेनाग्निशर्मासंबंधसंदृब्धं नवभववृत्तान्तं विस्तरेण रुपेण "समराइच्चकहाऽ" भिधेन धर्मकथानुयोगरुपेणव्यरचि

यद्यपि तेषां पूज्यानां ग्रन्थरचनासङ्ख्यानिर्णयविषये त्रीणि मतान्तराणि प्राप्यन्ते; यथा,

(१) षड्दर्शनसमुच्चयशास्त्रस्य टीकाकृत्-श्रीगुणरत्नसूरभिस्तत्र श्रीहरिभद्र-सूरयश्चतुर्दशशतग्रन्थानां कर्तार इति निर्दिष्टम्, अतो (१४००) सङ्ख्यकाः।

(२) श्रीराजशेखरसूरिभिः स्वरचितचतुर्विंशतिप्रबंधग्रन्थरत्ने श्रीहरिभद्र-सूरयश्चत्वारिंशदधिकचतुर्दशशतग्रन्थानां कर्तार इति दर्शितम्, अतो (१४४०) सङ्ख्यकाः।

(३) श्री रत्नशेखरसूरिभिश्च श्री श्राद्धप्रतिक्रमणसूत्रोपरि-वन्दारुवृतौ श्रीहरिभद्र-सूरयश्चतुश्चत्वारिंशदधिकचतुर्दशशतग्रन्थानां कर्तार इति दर्शितम्, अतो (१४४४) सङ्ख्यकाः

तथापि जघन्यपदेन चतुर्दशशतग्रन्थानां कर्तृत्वं तु सर्वेषां सम्मतमेव, न च तस्मिन् कोऽपि विवादो वर्तते।

एतेषां ग्रन्थरत्नानां प्रांते तैः स्वाभिज्ञा "विरहः" शब्देनैव द्योतिता, तत्र च क्वचिदनु

भवशब्दात् क्वचिदनु मदनशब्दात् क्वाचिदनु पापशब्दात् क्वचिद् वानु दुःखशब्दात् प्रयुक्तो दृश्यते। यथा,

(१) ‘‘कृत्वा प्रकरणमेतद् यदवाप्तं किञ्चिदिह मया कुशलं।
भवविरहबीजमनघं लभतां भव्यो जनस्तेन ।।१।।’’ इति श्रीशास्त्रवार्ता-समुच्चयस्याष्टमस्तबके।

(२) ‘‘सुत्तं वंदे **मयणविरहं** तस्स णाहं वि वीरं।।’’ इति श्रीवीरस्तवे।

(३) अष्टकाख्यप्रकरणं, कृत्वा यत् पुण्यार्जितम्।
विरहस्तेन पापस्य, भवन्तु सुखिनो जनाः ।।१।।’’ इति श्रीमदष्टकप्रकरणे।
विरहशब्दप्रयोगकरणाशयस्त्वेवमुह्यते, यदुत किं तेषां सर्वज्ञ-विशिष्टज्ञानिविरहोऽत्यन्तं पीडयति। यदिवा स्वपराभ्यां तैर्भव-मदन-पाप-दुःखानां नाशः प्रार्थितोऽस्ति। अथवा तु प्रिय शिष्यरूपयोर्हंसपरमहंसयोर्विरहदुःखं व्यक्तीकृतमपि भवेत्।
उक्तञ्च प्रभावकचरित्रे श्रीचन्द्रप्रभसूरिभिः,

‘‘अतिशयहृदयाभिरम्यशिष्यद्वयविरहोर्मिभरेण तप्तदेहः।
निजकृतिमिह संव्यधात् समस्तां, विरहपदेन युतां सतां स मुख्यः ।।१।।’’

रात्रावपि तेषां ग्रन्थरचनाकार्यस्य, निर्विघ्नप्रवृत्त्यर्थं **लल्लिग**श्राद्धेन तदुपाश्रयभित्तौ दीप्तिमन्तं रत्नं प्रतिष्ठितं येन तमस्यपि लेखनं स्यात्। कार्पासवणिक्पार्श्वे च तैः स्वरचितग्रन्थानामादर्शाः प्रगुणीकृताः।

एतत् शास्त्ररचनाकार्यं स्वायुष्यपर्यंतं कृतं श्रूयते यावच्चत्वारिंशदधिक-चतुर्दशशतग्रन्थरचनासमाप्तिरपि समजनि। अवशिष्टचतुर्ग्रन्थकरणाय स्वायुष्यस्य पर्याप्तिं ज्ञात्वा तैः **‘‘संसारदावानल’’** स्तुतयो ग्रन्थरूपेणादृताः। अपितु चतुर्थस्तुतेः प्रथमपादप्रान्ते तैः स्वप्राणा मुक्ताः, अतस्तत्पूर्तीकर्तुं शासनाधिष्ठायकदेवताभिस्त-दाशयमवधिना ज्ञात्वा सकलसङ्घैः ‘‘झङ्काराराावसारा’’ इत्यादि शब्दरचनापूर्वक-मुच्चनादैः समर्थितम्। एतदनुकरणं चाद्यावधि भव्यैरावश्यकेषु क्रियते।

स्वकृतिषु पूज्यैर्न कुत्रापि सुगतादिदर्शनद्वेषो जिनमते च दृष्टिरागेण पक्षपातः कृतो दृश्यते। केवलं न्यायमार्गेणैव सत्यपक्षः स्वीकृतो निश्चीयते। उक्तञ्च,

**‘‘पक्षपातो न मे वीरे, न द्वेषः कपिलादिषु।**
**युक्तिमद् वचनं यस्य, तस्य कार्यः परिग्रहः ।।१।।’’** इति लोकतत्त्वनिर्णये।

तथा स्वात्मोत्कर्षे प्रथमनिमित्तभूतां याकिनीमहत्तरां प्रति कृतज्ञतां प्रकटयद्भिस्तैः

कृतिषु स्वाभिधानमपि "याकिनीधर्मपुत्र" इति रुपेण निर्दिष्टम्। यथा,

**"महत्तराया याकिन्या धर्मपुत्रेण चिन्तिता। आचार्यहरिभद्रेण" इति।**

यद्यपि तेषां शिष्यपरिवारपुण्यं नाभूत्, तथापि स्वरचितग्रन्था एव शिष्यरूपेण श्रीवीरशासनस्याऽनवच्छिन्नशुद्धाचारमार्गरक्षामद्यावधि कुर्वन्ति। केवलं दुःषमकाल-प्रभावान् म्लेच्छाक्रमणपृथिवीविलयजलप्लवाग्निप्लोषप्रभृत्युपद्रवैः-तन्मध्यात् पञ्चाशत् षष्ठिवा ग्रन्थाः प्राप्यन्ते। तन्नामानि तु यथा,

(१) श्रीदशवैकालिकसूत्र-लघु-बृहद्वृत्त्यौ, श्रीनंदीसूत्रलघुवृत्तिः, श्रीमदोघनिर्युक्ति-वृत्तिः, श्रीमदावश्यकसूत्रबृहद्वृत्तिः, श्रीमदनुयोगद्वारसूत्रलघुवृत्ति, श्रीपिण्डनिर्युक्ति-वृत्तिः, श्रीप्रज्ञापनाप्रदेशव्याख्यालघुवृत्तिः, श्रीजम्बुद्वीपप्रज्ञप्तिटीका, श्रीजीवा-भिगमलघुवृत्तिः, चैत्यवंदनवृत्तिः, श्रीव्यवहारकल्प, श्रीमहानिशीथसूत्रमूलः (उद्धृत) श्रीललितविस्तरा बृहद्वृत्तिप्रभृतय आगमविषयककृतयः।

(२) श्रीपञ्चवस्तुक-योगबिंदु-योगदृष्टिसमुच्चय-न्यायप्रवेशसूत्राऽनेकान्तजयपताका-शास्त्रवार्तासमुच्चयादिस्वोपज्ञवृत्तयः।

(३) श्रीपञ्चसूत्र-न्यायावतार-ध्यानशतक-तत्त्वार्थाधिगमाख्याऽन्यकर्तृकवृत्तयः।

(४) श्रीजंबूद्वीपसंग्रहणी-अष्टकप्रकरण-षोडशक-पञ्चाशक-श्रावकधर्मविधि-धर्म-बिन्दु-योगविंशिका-योगशतक-देवेन्द्रनरकेन्द्र-वेदबाह्यनिराकरण-न्यायवि-निश्चय-षड्दर्शनसमुच्चय-धर्मसङ्ग्रहणी-षड्दर्शनी-ज्ञानादित्याऽनेकान्तप्रवेशा-ऽनेकान्तेप्रघट्ट-सम्यक्त्वसप्ततिकोपदेशपद-लोकतत्त्वनिर्णय-यतिदिनकृत्य-लग्नशुद्धि-सर्वज्ञसिद्धि-संबोधप्रकरण-प्रतिष्ठाकल्प-द्विजवदनचपेटा-क्षमावल्लि-बीज-ज्ञानपञ्चकविवरण-वीरस्तव-संसारदावानलस्तुति-ब्रह्मसिद्धांतसमुच्चय-नानाचित्रप्रकरणग्रन्थः।

(५) श्रीधूर्ताख्यान-मुनिपतिचरित्र-सिरिसमराईच्चकहा-वीराङ्गदकथा-यशोधरचरित्र-प्रमुखानि चरित्राणि चेति।

एतदन्येऽपि ग्रन्थाःअकर्तृकसंज्ञामुपलभ्यन्ते, येषां विषयवैशद्यता-वचनसौष्ठवा-ऽर्थगांभीर्यत्वलक्षणानि दृष्ट्वा ते भवविरहाङ्क-याकिनीमहत्तरा-सूनुपूज्यवरैरेव दृब्धा इति लक्ष्यन्ते, यथा **श्रीब्रह्मसिद्धांतसमुच्चय**ग्रन्थरत्नमकर्तृकप्राप्तमपि तेषामेव कृतिरिति बहुश्रुतैः स्वीकृतम्।

पूज्यपादानां ग्रन्थोपरि बहुभिः सूरीश्वरमुनिभिर्वृत्तिपञ्जिका-टिप्पणकादीनि रचितानि सन्ति। यथा,

श्रीमुनिचन्द्रसूरि-श्रीवादिदेवसूरि-श्रीहेमचन्द्रसूरि-श्रीमलयगिरिसूरि-श्रीमदभय-

देवसूरि–श्रीमद्द्योतनसूरि–श्रीजिनेश्वरसूरि–श्रीमानदेवसूरि–श्रीसुमतिसुन्दरसूरि–श्रीप्रभानन्दसूरि–श्रीप्रद्युम्नसूरि–श्रीप्रभाचन्द्रसूरि–श्रीगुणरत्नसूरि–श्रीकुलमण्डनसूरि–श्रीविजयलक्ष्मीसूरि–श्रीराजशेखरसूरि–श्रीरत्नशेखरसूरि–महोपाध्यायश्रीधर्मसागरगणि–महोपाध्याय श्रीसमयसुंदरगणि–महोपाध्यायश्रीयशोविजयगणि–महोपाध्यायश्रीविनयविजयगणि–प्रभृतिभिः।

अथ प्रस्तुतग्रन्थरत्नं "श्रीधर्मबिन्दु" प्रकरणमपि पूज्यपादैः श्रीतत्त्वार्थाधिगमसूत्र–प्रमाणमीमांसा–पातञ्जलयोगसूत्रप्रमुखवत् सूत्रात्मकपद्धत्या रचितमस्ति। अस्मिंस्तैः श्रुतसागरमध्याद् धर्मवचनविप्रुष उद्धृत्य गुम्फिताः सन्ति। बिन्दुभूतधर्मसूत्रेष्वप्यर्थ–पारावारगाम्भीर्यं संदृब्धं विद्यते।

यद्यपि पूर्वं श्रीवर्धमानसूरिभी रचिता प्राचीनटीकोपलभ्यते, तथापि सा संक्षिप्तरुपाऽतिगहनत्वाच्च वैक्रमीयमङ्गलमुनिरुद्रसङ्ख्यवर्षे (वि.११७८) श्रीवीरप्रभोश्चत्वारिंशत्तमपट्टविभूषण–बृहद्गच्छीयश्रीयशोभद्रसूरीश्वरशिष्य–श्रीमुनिचन्द्रसूरिभिः किञ्चिद्–विस्तारेणैदंयुगीनामल्पमतिभव्यानां सुबोध्या वृत्तिः कृता। अस्य धर्मबिन्दुग्रन्थरत्नस्य विषयोऽष्टभिरध्ययनैर्–विभक्तोऽस्ति। तच्च यथा,

(१) सामान्यगृहस्थधर्मविधौ :– सामान्यसद्गृहस्थधर्मस्य वर्णनं कृतम्। तदन्तर्गतम्, धर्मस्य व्याख्या, अन्यायोपार्जितद्रव्यस्य फलम्, पञ्चत्रिंशन्मार्गानुसारिजीवगुणवर्णनं कृतमस्ति। सामान्यगृहस्थधर्मयुक्तजीव एव विशेषेण सद्गृहस्थ–धर्मार्हो जायते।

(२) देशनाविधौ :– विशेषसद्गृहस्थधर्मग्राहणाय धर्मोपदेशकैः सद्गृहस्थं प्रति किंरुपा देशना देयेति विवेचितम्। तदन्तर्गतम्, धर्मवृक्षस्य बीजभूता गुणाः, आक्षेपणी–विक्षेपणी–संवेगजननी – निर्वेदजननीरुपधर्मकथाचतुष्टयम्, मीमांसा प्रभृतिविषया दर्शिताः।

(३) विशेषगृहस्थधर्मविधौ :– विशेषगृहस्थधर्मस्य स्वरुपम्, योग्यजीवस्य तद्दान–विधिः, तथा तस्य निरतिचारपालनायोपदेश उपायाश्च कथिताः। तदन्तर्गतम्, सम्यग्दर्शनस्वरुपम्, यति–धर्मार्हजीवस्याणुव्रतदाने धर्माचार्यस्य दोषापत्तिः, द्वादशश्राद्धव्रतानां सातिचारं स्वरूपवर्णनं सूचितम्।

(४) यतिविधौ :– विशेषगृहस्थधर्मस्थितजीवो यतिधर्माय कल्पते। अत

एवास्मिन्नाधिकारे यतेर्लक्षणानि, यतिधर्मदातृ-ग्राहकयोर्गुणवर्णनम्, यतिधर्मोपस्थितस्य परीक्षा, मुमुक्षुजीवस्य स्वजनत्यागविषये दृष्टान्तश्च दिग्दर्शिताः।

(५) यतिधर्मविधौ :- प्रथमं यतिधर्मनिर्वाहस्य दुष्करतामभिधाय सापेक्ष-यतिधर्मस्य स्वरूपं दर्शितम्। तदन्तर्गतम्, त्रिभेदभिन्न भिक्षा, यतिधर्मानर्हा अष्टादश जीवाः, भावसंलेखनायाश्च स्वरूपमभिहितम्। प्रान्ते च निरपेक्षयतिधर्मस्य स्वरूपं प्रख्यातम्।

(६) यतिधर्मविशेषविधौ :- सापेक्षनिरपेक्षयतिधर्माभ्यां योग्यजीवस्य लक्षणं दर्शितम्। तदनन्तरं त्रीणि ज्ञानानि, द्रव्यस्तवस्य प्रयोजनम्, सर्वत्रोचित्यपालनस्य महत्त्वम्, भावयतेश्च परिणामशुद्धिरुपदिष्टा।

(७) धर्मफलविधौ :- धर्मस्यानन्तर-परंपरफलप्रदर्शनं,तस्य च प्रशंसा कृता।

(८) विशेषधर्मफलविधौ :- विशुद्धधर्मप्रभावेण तीर्थङ्करपदप्राप्तिर्भवतीति निरुपितम्। तत्पश्चात् क्षपकश्रेणेः स्वरुपम्, रागद्वेषमोह-रूपभावशत्रूणां स्वरूपम्, सिद्धजीवानां सुखवर्णनम्, मोक्षस्वरूपं च दर्शयित्वा समाप्तिः कृता।

एतद्ग्रन्थकर्तु-धर्मबिन्दुग्रन्थरत्नस्य परिचयं प्राप्य भव्या निःश्रेयसपदमाप्नुयुरित्येतावदेवाशास्महे।

यत्र भावस्य प्रधान्यं,
द्रव्यस्य शुद्धत्वञ्च,
तज्जैनशासनम्।

# मरीचिकृतस्योऽत्सूत्रस्य विचारः

- *मुनिश्री पद्मकीर्तिविजयः

वयं प्रतिवर्षं कल्पसूत्रं श्रुण्मः, यस्मिन् वर्धमानस्वामिनश्चरित्रे सप्तविंशतिभवा वर्णिताः। तन्मध्ये तृतीये भवे तस्य वर्धमानस्वामिनो जीवो भरतचक्रिणः सूनुर्मरीचिनामा अभवत्। स मरीचिः श्री आदिजिनस्य देशनां श्रुत्वा यौवने वैराग्यं प्राप्तः, तदनन्तरं स प्रव्रजितः, एकादशाङ्गानि च पठितानि। कालान्तरे ग्रीष्मकालजन्यदुःखेन पराभूतः त्रिदण्डिकवेशं रचितवान्, देशनायां च जिज्ञासुभ्यो विरतिधर्ममेव हि उपदिशति। यदि कश्चित् प्रव्रजिषुर्भवेत् तदा स भगवतः समीपे प्रेषयति स्म। तावत् तस्य सम्यग्दर्शनं निश्चलमभवत्। किन्तु एकदा स मरीचीः रोगेण समाक्रान्तो जातः, तदा तेन प्रबोध्य जिनस्य पार्श्वे प्रेषितैः साधुभिः तस्य वैयावृत्यादिकृत्यं न कृतं तेन तस्य वैयावृत्यकार–कैकशिष्यस्य इच्छा बभूव। कालान्तरे स नीरोगी बभूव, अन्यदा च तस्य समीपे एकः कपिल नामा राजपुत्र आगतः, मरीचिना तस्मै साधुधर्मस्य उपदेशं ददे, येन स वैराग्यं प्राप्तवान्। वैराग्यं प्राप्तं तं ज्ञात्वा मरीचिना प्रोक्तं, ''याहि कपिल! साधूनां पार्श्वे, साधुधर्मं च स्वीकुरु।'' तदा कपिलेन पृष्टं– ''किं भवतां पार्श्वे सर्वथा धर्मो नास्ति?''। तदा मरीचिना 'इत्थं पि इहयंपि' इत्याद्युत्सूत्रं वचनमुक्तं। तेन वचनेन एककोटाकोटीसागरोपमस्थितिमान् संसारोऽर्जितः, एतावत्तु अस्माभिः श्रुतमेव।

ननु मरीचिवचनं केन प्रकारेण उत्सूत्रं स्यात्? यद् यदा मरीचिना त्रिदण्डीकवेषो रचितः, तदा तेन सम्यग्दर्शनपूर्वको द्वादशव्रतरुपः श्रावकधर्मः स्वीकृतः। ततः तस्य समीपे

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्तिः ।

श्राद्धधर्मोऽस्त्येव। 'कपिला इत्थंमपि इहयंपि' इत्यत्र इत्थं पदेन भगवता पार्श्वे धर्मोऽस्ति स मुख्यवृत्या सिद्धः, 'इहयंपि' पदेन, मम पार्श्वे गौणवृत्या धर्मः सिद्धः, ततः तेन गृहस्थधर्मं साक्षीकृत्य उक्तं यतो ममपार्श्वे अपि धर्मोऽस्ति, तस्मात् न मरीचिना उत्सूत्रमुक्तमिति। तन्न युक्तमाभाति, यतो मरीचिना कपिलाय साधुधर्मस्यैवोपदेशो दत्तः, कपिलोऽपि साधुधर्मस्येवोपदेशं श्रुत्वा वैराग्यवासितान्तःकरणोऽभूत्, न तु श्रावकधर्मस्योपदेशम्। ततो मरीचिना साधूनां पार्श्वे साधुधर्मस्याङ्गीकरणाय कपिल उक्तः, तस्मात् कपिलेन यदा साधुधर्मसंबन्धी वै प्रश्नः पृष्टः, "यदुत किं युष्मत्पार्श्वे सर्वथा साधुधर्मो नास्ति?" तदा मरीचिना श्रावकधर्मं साक्षीकृत्य प्रत्युत्तरो दत्तो "यदुत कपिला इत्थमपि इहयंपि", इत्यत्र साधुधर्मस्य प्रश्नं प्रति श्रावकधर्ममुद्दिश्योत्तरो दत्तः, तदुत्सूत्रम्। मरीचिना अनया रीत्या उत्सूत्रप्ररूपणा कृता।

❀ ❀ ❀

यत्र, जीवानां स्थातुमिष्टम्
तत्र स्थातुं, योऽवरोधकः
स संसारः ।

# बहुरत्ना वसुन्धरा

- *मुनिश्रीदर्शनरक्षितविजयः

गूर्जरदेशे वट्टपल्लीनगर्यामेको हसमुखजैन इति नाम्ना रीक्षायानचालको वसति। पर्युषणा महापर्वणि साधर्मिकवात्सल्यस्य परोपकारस्य च महिमानमश्रुणोत्।

यदि सकला धर्मा एकतुलायां तोलिताः अपरतुलायां तु साधर्मिकभक्तिस्तर्हि साधर्मिकभक्ति एव विशेष्यते।

इति जिनवचनं श्रुत्वा तस्य मनसि साधर्मिकानां वात्सल्यं परोपकारश्च कर्तुमिच्छा संजाता। परं तस्यार्थिकस्थितिस्तादृशी नाऽऽसीत्। जैनशासने तादृशो नियमो नास्ति यद् धनवानेव साधर्मिक भक्तिं कुर्यात्, अधनिको न कुर्यात् । शास्त्रेष्वपि श्रूयते पुण्यश्रावकेन स्वल्पेऽपि धने 'स्वयमुपोषितं कृत्वा प्रतिदिनमेकसाधर्मिकस्य वात्सल्यं चकार।

पूज्यगुरुभगवतां मार्गदर्शनेन तस्य साधर्मिकवात्सल्यं परोपकारश्च कर्तुमुपायो मिलितः। तेन रीक्षायानस्य पश्चादेवं लिखितं पत्रं संयोजितम्। तद्यथा-यः कोऽपि वृद्धोऽशक्तो, जरायुक्तो, दिव्यांगो वा भवेत्, तस्य मद्रीक्षायाने मूल्यं विना यात्रा कारयिष्यते'। अनया रीत्या तेन महानुभावेन प्रतिदिनं द्वौ, त्रयश्चत्वारो वा जनाः स्थानात् स्थाने मूल्यं विना नीयते। एकमासमध्ये शताधिकजनेषु परोपकारं कृत्वा स्वात्मानं धन्यमन्यो हसमुखजैनः, स्वात्मनि तोषमनुभवति स्म।

ईदृशी परमोपकारिणी साधर्मिकवात्सल्यभावना परोपकारपरायणता च सर्वेषु जायते तर्हि कोऽपि जनो दुःखेन पीडितो न भवेत्।

❀ ❀ ❀

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्तिः ।

# आत्महितोपदेशः

- *मुनिश्रीदर्शनरक्षितविजयः

**शरणतो भयः**

हे आत्मन्,

त्वमनादिकालतः संसारचक्रे परिभ्रमणं करोषि। पुरातनानि शरीराणि त्यजसि। नवीनानि शरीराणि च धरसि। पुरातनशरीराणां त्यजनकाले दुःखमनुभवसि नवीनशरीराणाञ्च ग्रहणकाले सुखमनुभवसि। किंतु त्वं विचारय, यस्य शरणे त्वमागतोऽसि तत् शरीरं नाशवत् जराजर्जरितं रोगाकरश्चाऽविश्वसनीयश्चास्ति। यस्य शरणे त्वमागतोऽसि, तस्माद् भयोऽस्ति।

"अतस्ते शरणतो भयः"

ईदृशस्य शरीरस्य दुष्टा महाव्यसनरताः पञ्चपुत्राः सन्ति। जन्मतस्ते सर्वे नपुंसकास्सन्ति। यदाऽस्य शरीरस्योत्पत्तिर्भवति, तदान्तमुहूर्तमध्ये पञ्चानां जन्म भवति। प्रथमसुतो रसनेन्द्रियः, द्वितीयः श्रोत्रेन्द्रियः, तृतीयश्चक्षुरिन्द्रियः, चतुर्थो घ्राणेन्द्रियः, पंचमस्स्पर्शेन्द्रियः, ते सर्वे एकहेलया वृद्धिं प्राप्ता युवावस्थां प्राप्नुवन्ति। तैः पञ्चभि र्भवतः शरीरोऽतिविराजते। तत्पञ्चभि रहितः जनोंऽधो, बधिरो, विखुर्मूकः पङ्गुरिति दुष्टनामभिः सम्बोध्यते।

युवावस्थायां ते सर्वे स्वच्छन्दा उन्मत्ता अतीवचपलस्वभावाः प्रति समयमित-स्ततश्चरन्तो दृश्यन्ते। तेषु प्रथमो रसनेन्द्रियो रसास्वादलाम्पट्येन भक्ष्याभक्ष्ययोः पेयापेययो-र्भेदमज्ञात्वा मांसमदिरानंतकायादिन्यखाद्यानि खादति। प्रतिदिनं नानाविधवस्तुखादने तस्य शक्तिर्वर्धते शरीरस्य शक्तिः क्षयति। द्वितीयसुतो घ्राणेन्द्रियः कर्णाभ्यां विविधानि पुरातनानि नवीनानि च चित्रपटगीतानि श्रुणोति। परेषां दोषा निन्दावचनानि च श्रुत्वाः संतुष्टो जायते। स्वीयदोषाः कोऽपि गायति तदा क्रोधाध्मातस्तं प्रहर्तुं धावति, निष्फलतां प्राप्तो गृहे भण्डनं

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्तिः ।

करोति। तृतीयसुतश्चक्षुरिन्द्रियो नूतनानि चित्रपटानि रुपवद्ललनारुपाणि च दृष्ट्वातीववासनावशो जायते तत्प्रति मनसि दुष्टविचारान् कल्पयति। ''ईदृशीं रुपवतीं कनीं प्राप्याहं कदा संसारे सुखी भवानि, तां विना मे जीवितं निष्फलं जातमिति''। प्रतिदिनं नवनवतरुणीदर्शनेन अक्ष्णाऽनन्धोऽपि कामान्धो वसति। चतुर्थसुतो घ्राणेन्द्रियः पुष्पाणां सुमधुरं गन्धमाघ्राय मनसि तृप्तो जायते, मत्तभ्रमर इव प्रतिक्षणमटति। पञ्चमः सुतः स्पर्शेन्द्रियः सुकुमारस्पर्शे समासक्तो मदोन्मत्तगज इव स्वशरीरे विविधप्रकारानौषधान् सौन्दर्यप्रसाधनाश्च लिम्पति।

शरीरस्यैते पञ्च पुत्रा विविधान् भोगान् भुक्त्वा शरीरं जर्जरीकुर्वन्ति। अमीभिः पञ्चभिः पालितं शरीरं त्वमाश्रयसि, यत् तव महामूर्खत्वमस्ति। यत् स्वयं नाशवद् भवति तद् कथं शाश्वतं स्थानं दास्यति।

हे आत्मन्! यस्य शरणं त्वं गतोऽसि, तत् शरीरं स्वयं भयवदस्ति, अतस्तव शरणतो महाभयइति विचिन्त्याऽभयपदप्रदायकं शरणागतवत्सलं देवगुरुधर्ममाश्रय, स एव शरणागतवत्सलो यः स्वशरणागतान् जनान् शाश्वतस्थानं प्रापयति।

❀ ❀ ❀

कर्म हरति स महाहरिः।
किन्तु दुःखं हरति, स हरि उच्यते

# स सज्जनः

- *मुनिश्रीप्रशमरक्षितविजयः

**संतोषं वहते परर्द्धिषु।**

स्वपुण्यानुसारेण लब्धे धनादिके पर्याप्तभावः, प्राप्ताद् वा धनादिकादधिकतस्य-लब्धुमनीहा स संतोषः। अखिलैरपि जगद्वर्त्तिभिर्जनैर्ज्ञायते, यत् पूर्वभवे शुभाचीर्णाचारजन्यात् पुण्यप्रभावाद् हि शुभं वस्तु प्राप्यते, यस्य समीपे धनादिकमितरजनादधिकरं वर्तते, तेन पूर्वभवे किञ्चित् जानताऽजानता पुण्यकार्यं प्रभूततरं कृतं स्याद्, तन् निश्चितं, अतः परर्द्धिषु स्वेर्ष्यादिकरणमस्थाने तिष्ठति। अर्थान्न युज्यते। परञ्च धर्मादिकार्येषु विशेषेण प्रवृत्तिमता भाव्यम्। विनायासेन विना प्रवृत्या वा पुण्यफलं य इच्छति, स स्वेर्ष्यादिभावं वितनोति।

विवेकिसज्जनस्तु केवलं परर्द्धिषु संतोषं एव वहत इति न, परं च स्वर्द्धिष्वपि संतोषं वहते, स्वदि्र्धसंतुष्टो जनः परर्द्धिषु मुखं न प्रक्षिपति। यतः '**संतोषं वहते परर्द्धिषु इति** गाथायां लिखितं यत्, तत् स्वेर्ष्यादिभावस्याभावस्य सूचनार्थम्।

**पराबाधासु धत्ते शुचम्।**

परसुखेन दुर्जनाः दुःखिता भवन्ति।

परदुःखेन सज्जना दुःखिताः भवन्ति।

सज्जना न केवलं शारीरिकमानसिकाऽऽर्थिकदुःखाम्बुधौ पतितान् वा पततो वा जन्तून् विलोक्य स्वदुःखदुःखितजनवत् शोचितारो भवन्ति परन्तु येन येन दुःखेन जनः पराभूतः स्यात्, तत् तद् दुःखमपनोदितुमपि शक्त्यनुसारेण प्रयतन्ते। परेषां दुःखानि तु

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्तिः।

स्वदु:खवत् मन्यन्ते। स्वदु:खापनोदाय जगद्वर्तिन: सर्वेऽपि जना: प्रयतन्ते, परं परदु:खापनोदाय तु केवलं सज्जना एव प्रवर्तन्ते। अत एव ते विश्वे विरला एव सज्जना: प्राप्यन्ते।

## स्वश्लाघां न करोति।

आत्मप्रशंसा दुष्टकार्ये नैव भवति। तत् तु सर्वेऽपि जानन्ति, दुष्टकार्यकृत् जगति "नामचीन" इति प्रसिद्धो जायते, परं साऽपि च शोभनकार्यैरेव भवति, तदपि सर्वे जानन्ति, शोभनकार्यकृत् जगति "नामाङ्कित" इति प्रसिद्धो जायते। बहुलतया जना: धनादिसाध्यं दानादिकार्यं, शरीरादिसाध्यं च परार्थादिकार्यं कुर्वन्ति, तत् सम्यगपि दृश्यते, किन्तु यत् स्वप्रशंसाकृते कृतं, तन्न शोभास्पदं भवति। किन्तु परार्थकृते कृतमेव शोभास्पदं भवति, अन्यथा केवलं शरीरश्रमजनकमेव भवति। सज्जनैस्तु क्रियमाणं किमपि कार्यं केवलं परदु:खोच्छेदनाय न क्रियते, परं स्वदु:खोच्छेदनार्थमपि क्रियते। य: स्वदु:खोच्छेदनार्थं करोति कार्यम् तस्मिन् स्वप्रशंसात्मकभावो लेशमात्रोऽपि नागच्छति। व्यवहारेऽपि आत्मप्रशंसाकृदात्मा "बडाईमारनार" इति गूर्जरभाषायां निन्द्यवचनेनैव निन्द्यते। आत्मप्रशंसिनां मानहानिस्तु यत्र तत्र सर्वत्रवा दृश्यते। श्रीमद्भि: उमास्वाति-वाचकवरैस्तत्वार्थनाम्नि शास्त्रेऽपि प्रोक्तं-**परात्मनिन्दा-प्रशंसे सदसद्गुणाच्छाद-नोद्भावने च नीचैर्गोत्रस्य** (६/२४) स्वात्मप्रशंसा जीवानां नीचैर्गोत्रस्यापि कारणं प्रदर्शितम्। ततो निश्चितं यत्, प्रशंसनीयं सत्कार्यमवश्यं कर्त्तव्यम्। परं तज्जन्यप्रशंसा नैवापेक्षणीया।

## नोज्झति नयम्।

धनादिप्राप्तियोग्येषु व्यापारेषु ऋजुजनानामवञ्चनात्मकक्रिया स नय:। तथाविधं नयं सज्जनो न जहाति। यतो धनादिप्राप्त्युपायो व्यापारस्तु सावद्यरुपेणैव वर्तते, परन्तु तत्र कृतो नय:, स एव हि धर्मरूपेण स्थित:। अन्यच्च न्यायसंपन्नविभव इत्यादिपदानि श्रीमद्योगशास्त्रप्रमुखग्रन्थेष्वपि दृश्यन्ते। नीतिप्रधानेन लब्धं धनं न कदापि पराङ्मुखतां दत्ते। नीतिशास्त्रेष्वपि प्रोक्तञ्च, नयेन संप्राप्तं धनं, केनाऽपि हृतं, पतितं, विस्मृतं, नष्टं वा द्वादशाब्दान्तेऽपि नूनं प्रत्यागच्छति। अत: सज्जनैर्नीतिप्रधानादिकार्येषु सततमादरणीयम्। जीवनमपि च तथैव जीवितव्यम्।

## नौचित्यमुल्लङ्घयन्ति

केषुचिज्जनेषु भक्तिसत्कारादिभावो नापि स्यादिति भवेत्, परं तु सदौचित्येन तु सर्वत्र वर्त्तितव्यमेव। यत्रौचित्यं, तत्र सर्वेष्टकार्याणां सिद्धि: स्यादेव। ये नरा औचित्यकृत: सन्ति, ते सर्वप्रियङ्करा भवन्ति, तेऽपि विरला एव सन्ति। व्यसनापन्ना अपि सज्जना: पारावारवत् कदापि नौचित्यं विलुपन्ति। लौकिकरामायणमहाभारतादिग्रन्थेष्वपि श्रीमद् रामचन्द्र-युधिष्ठिरप्रमुखमहावीरेषु प्रत्यक्षेण दृश्यत एवौचित्यम्। तैर्महावीरैः। सत्कारोचितानां गुर्वादिजनानां रणाङ्गणेऽपि युद्धादिकार्यात् प्राक् प्रणामादिकार्यं कृतमेव। तत: पतिपत्न्यो:, पितापुत्रयो:, मातापुत्र्यो:, बन्ध्वोश्च परस्परमौचित्येन सदा वर्त्तनीयम्। यदीदं स्यात्, तदा संसारवर्त्तिनो जीवा: स्वर्गवत् सुखमत्रैवानुभवेयु:। अत: काश्चिदपि प्रवृत्तिमौचित्य-प्रधानत्वेन विदध्यात्, अपि तु नौचित्यमुल्लङ्घनीयम्।

## अप्रियमुक्तोऽपि नाक्षमां रचयन्ति

सत्त्ववतां परमार्थत: क्षमैव भूषणमस्ति। यथा यथा सत्त्वं प्रवर्धते, तथा तथा क्षमाधर्मोऽपि प्रवर्धते। सत्त्ववतो हि क्षमादिधर्मस्याधिकारित्वाद्। अत एव **क्षमा वीरस्य भूषण**मिति उक्तिरपि प्रसिद्धिमागता।

ननु अप्रियं वचनं कोऽपि वदेत्, तत् कथं श्रोतुं शक्यते? तथापि यदि केनचिदप्रियं वचनं कथितं कर्णाभ्याञ्च श्रुतं, तत्रापि अक्षमा न कार्या, तदा किं कर्त्तव्यम्?

श्रूयतां, लौकिकदृष्टान्तेन जानीम:-

एकदा भगवान् गौतमबुद्धो न्यायशास्त्रादिनिपुणै: शिष्यै: परिवृत:। तदा अवसरं विज्ञाय परमप्रियशिष्य आनंदभिक्षु: परमविनयेन भगवन्तं बुद्धं विज्ञप्तवान्, भगवान्! विचित्र देशाटन कृते किं म्लेच्छ प्रदेशं गच्छानि? तदा भगवता गौतमबुद्धेन तस्य क्षमाभावदर्शनार्थं योग्यतापरीक्षणाय च मधुरगिरा प्रोक्तं यद्, तत्र स्थितै र्मलेच्छप्रायै र्जनै: साधुजनो-ऽसभ्यगालिप्रमुखवचनै: कदर्थ्यते। अतीवतीव्रचपेटाभिस्ताडयते लकुट-यष्ट्यादिघातै र्हन्यते।

न केवलमेतावत्, परंतु तै: प्राणव्यपरोपणात्मकक्रियाऽपि क्रियते। एतानि सर्वाण्यपि त्वं सोढुं न क्षमेथा इति मन्येऽहम्। अत: अत्रैव स्थातुं योग्योऽसि। तदा आनंदभिक्षुणा प्रोक्तं, हे प्रभो! यदा तेऽसभ्यगाल्यादिवचनानि प्रदास्यन्ति तदाहं विम्रक्ष्यामि यद् केवलं तेऽसभ्यगाल्यादिवचनानि ददति, अपि चपेटाभिस्तु न ताडयन्ति। यदा ते चपेटाभिस्तायिष्यन्ति तदाहं विचारयामि, यद् केवलं तेय पेटाभि एव ताडयन्ति, परंतु

लकुटयष्ट्यादिघातैस्तु लकुटयष्ट्यादिघातैरेव हन्ति, परंतु प्राणव्यपरोपणं तु नैव कुर्वते। कदाचिददतिरोषवशेन प्राणव्यपरोपणक्रियामपि कुर्युः, तदाहं मन्ये, यद् आत्मव्यपरोपणं कर्त्तुं न कोऽपि समर्थः। तस्य भिक्षोः विशुद्धकोटिगतं विचारं परीक्ष्य भगवता गौतमबुद्धेन देशाटनकृते स भिक्षुरनुज्ञापितः।

एवं आनंदभिक्षुवद् नानाविधै र्विचारैरक्षमाऽभावस्तु दूर-दूरतरेण पलायनं याति। किञ्च-अस्मिन् श्लोके वचननिमित्तमात्रेण अक्षमां न रचयन्तीति कथितं, परंतु तुलादण्डन्यायेन मनःकायव्यापारनिमित्तेनाऽपि अक्षमां न रचयन्ति ते तदपि ज्ञेयम्।

क्षमार्थी कदापि अक्षमां-क्रोधादिभावं न करोति, क्षमायास्तु निस्सीमत्वाद्। प्राकृतजनास्तु स्वल्पतरेणापि दुष्टवचननिमित्तमात्रेणाक्षमां विदधति। तल् लक्षणं सज्जनेषु तु न घटन्ते, ते तु बृहत्तरेणापि दुष्टवचनादिनिमित्तेन अक्षमां न रचयन्ति। एवं सज्जनानामष्टगुणाः समासेन कथिताः, सर्वेऽपि जना उक्तगुणान् संप्राप्य नियमात् सज्जनत्वं लभन्तामिति शम्।

❀ ❀ ❀

नमस्कारं कर्तुः धर्त्तुश्चान्तरा यः सेतु र्भवति,
स एव सत्यनमस्कारः।

# बालमुनिवशाष्टकम्

- *मुनिश्री प्रशमरक्षितविजयः

वसन्ततिलका

ये बालकालवयसि प्रविमुक्तसङ्गाः, श्रामण्यसौख्यममसमं गुरुदेवपादाद्।
लब्ध्वा हि संवरवरं परिपालयन्ति, ते धन्यबालमुनयः सततं जयन्तु ॥१॥
न ज्ञातवल्लभतरप्रमदावियोगान्, नास्वादितेन्द्रियगुणान् गुणसन्निधीन् यान्।
भक्त्या वरा बुधजनाः प्रणमन्ति नित्यं, ते धन्यबालमुनयः सततं जयन्तु ॥२॥
स्वाध्यायरक्तहृदया विकथाविरक्ता, नित्यं गुरोश्चरणवारिजलीनभृङ्गाः।
आज्ञाप्रधानमुनिजीवनजीवितारस्-ते धन्यबालमुनयः सततं जयन्तु ॥३॥
नाऽऽस्वादितस्मररसा निजजीवनेऽहो, श्रीजैनशासनरताः समयप्रवीणाः।
संसाधयन्ति यतिधर्ममनारतं ये, ते धन्यबालमुनयः सततं जयन्तु ॥४॥
आजीविकाप्रणयिनीतनयादिकेषु, चिन्ता न काऽपि परिवारजनेषु येषां।
निश्चिन्त-निर्भयमहो जीवनं यदीयं, ते धन्यबालमुनयः सततं जयन्तु ॥५॥
शीतोष्णदंशकपरीषहसंसहेऽपि, जैनेन्द्रशासनमहो लक्ष्ये वहन्तः।
ये पद्मकोमलपदैर्विहरन्ति मार्गे, ते धन्यबालमुनयः सततं जयन्तु ॥६॥
वज्राभिधो मुनिवरो दशपूर्वधारी, श्रीहेमचन्द्रमुनिचन्द्रमुनीशमुख्याः।
योऽवाप केवलरमामतिमुक्तमौनी, ते धन्यबालमुनयः सततं जयन्तु ॥७॥
कालत्रयेऽपिनयनाम्बुजसूर्यतुल्याः, निर्मुक्तभोगरतयो गुणसाधकाश्च।
धर्मेण यै र्धवलिता सततं धरेयम्, ते धन्यबालमुनयः सततं जयन्तु ॥८॥
**मुक्तिप्रभैर्** गुरुवैर् लघुभिर् मयापि, तत्शिष्यक**प्रशमरक्षित**मौनिना च।
लब्धा हि बाल्यसमये निरवद्यदीक्षा, तद्धेतुतोऽष्टकमिदं रचितं मयाऽद्य ॥९॥

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्तिः।

# ऐकाक्षरीय जिनभक्तिकाव्यम्

- *मुनिश्री हीरभूषणविजयः

**भवमुक्तिकाटीका सवलितम्**

ककककेकिकेकाकं, कूकुककाककैककम्।
कोङ्ककाकिङ्किकाङ्किकं, कैकौकः काकूककं कके ।।श्री।।

अथ विचित्रैकाक्षरकं क-व्यञ्जनमात्रं स्वरदशकस्वानुनासिकानुस्वारविसर्गस्यूतं काव्यं व्यावर्ण्यते। तत्र **'चानुष्टुबिति'** द्वात्रिंशदक्षरीये प्रचलिते लघुच्छन्दसि शब्दार्थौ ज्ञेयस्तच्च यथा। **'कके'** त्यादौ **कं** पर्यन्तं वर्णावलिस्वरूपं ज्ञानं, तदेव **'को'** जलदो मेघस्तस्य च **'कं'** जलमम्बु **'ककक'** । **'केकी'** त्यत्र केकाऽस्ति यस्य स इति इन् प्रत्ययस्तत्र केका शिखण्डीस्वरविशेषो, मयूररव इत्यर्थोऽतः केकी मयूरः शिखण्डीत्यर्थः ककककेकि, तस्य च **'केका'** व्यावर्णितरूपा **'कः'** करोतीति कः केकां कारकास्तं ककककेकिकेकाकमिति। ज्ञानवर्षाकारणेन जीवमयूरेभ्यः प्रसन्नतोद्गारहेतुकमिति भावः। तदनु **'कूकुके'** त्यादौ **'कू'** पिशाचिनी दुर्योनिगतोपद्रवकारिदेवताविशेषः, **'कुक'** कुत्सितपक्षिविशेषः, **'काकः'** प्रसिद्धकृष्णपक्षी-वायसश्च च तद्द्वंद्वं कूककाकास्तेषां विचरणसमये **'को'** वेला तदर्थं 'एक' एवानन्योऽसदृशः **'कः'** सहस्ररश्मी भानुरित्यर्थं कूकुककाककैककस्तम्। दुर्जनादिविचरणसमयार्थे प्रतापवान् सूर्य इति भावः प्रस्तुतजनं प्रतापितया विशेषितमत्र।

तदनु **'कोङ्के'** त्यादिना 'कोङकः' कोङ्कणदेशस्तस्य च **'का'** भूमिः पृथ्वी

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्तिः।

समुद्रतटीयप्रदेशः तत्रोद्गतं 'किङ्कि' र्नालिकेरवृक्षफलं वाऽत्र फलं गृह्यते तस्य **'कं'** जलं निर्मलताद्योतकं तद्रूप-'मङ्कं' चिह्नभूतं तत्स्वरूपं वा तदस्ति यस्य स इन् प्रत्ययोऽत्राऽतोऽङ्की **'कं'** वपुरस्ति यस्येति कोङ्ककाकिङ्किककाङ्किककस्तमित्यर्थः। विशेषिते पदेऽत्र प्रस्तुतजनं सुन्दरनिर्मलाऽकृतितया स्तुतमिति दृश्यते। 'कैकौक' इत्यत्र **'क'** आत्मा तस्य चैकोऽनन्यः सदृश 'औको' गृहस्तम्। तथा 'काक्कक'मित्यत्र 'कः' प्रसन्नता मनः समाधिस्तस्य च **'को'** भण्डारो निधिस्तद्रूपः **'कं'** मनोऽस्ति यस्य स तं तथा। एवंभूतं प्रस्तुत जनं त्वां देवं गुरुं वा तमहमित्यध्याहार्यः **'कके'** (कक् स्पृहायां तस्य कर्तर्यात्मनेपदि-प्रथमपुरुषैकवचन रूपम्) वाञ्छे स्पृहयामि तथारूपं क्रियादिसम्बन्ध कार्यः।

इति विशिष्टैकाक्षरकाव्यविवृत्तिः समाप्तिं प्राप्ता इति शं शुभं भवतु।

वृत्तमेकाक्षरे काव्ये, 'भवमुक्ती' च्छुना मया
सर्वः गुरुप्रसादोऽस्मिन् प्रयासः सफलोऽभवत्।।

❀ ❀ ❀

योे देवस्य मार्गे विहरति, तत्र विहर्त्तुश्चार्थकामौ
त्यजति, देव इव भवितुश्च प्रयतते, स सुगुरुः।

# श्री शङ्खेश्वरपार्श्वनाथ पदनवकं

(द्रुतविलम्बितम्)

- *मुनिश्रीहीरभूषणविजयः

अखिलभव्यसरोरुहभास्करः, सकलश्राद्धसमुद्रसुधाकरः।
अघतमोहरशङ्खपुरेश्वरः, स हृदयेश्वरपार्श्वजिनेश्वरः ॥१॥
नरसुरासुरराजसमर्चितोवरसमस्तविभूतिविभूषितः।
प्रकटकामितगौमणिपादपो-मम ददातु शिवङ्करसम्पदः ॥२॥युः॥
धरणराजयुता कमलाऽऽसना; महति शङ्खपुरेश्वरपार्श्वकम्।
प्रणवबीजयुतं च नमस्यतेः, जपतु मन्त्रममूं भविकाऽज्ञया ॥३॥
जगति रोगशुचाऽऽधिकवेदनादुरितदुःखभयाऽऽर्तिदरिद्रता।
हरि-सरीसृप-हस्तिविडम्बना जल-हुताशन-चौर-विलुण्टकाः ॥४॥
अपि च राक्षस-व्यन्तर-शाकिनी-कदुडुकुग्रह-तंत्रपराभवाः।
युदरि-मारिभ-यङ्करसङ्कटं न च भयं मम पार्श्वसमाश्रिते ॥५॥युः॥
धनसमृद्धिघनिप्रतिष्ठितिं, नृपसभादिगतावरसंस्थितिम्।
जनसमग्रवशीकरणस्थितिं स लभते प्रभुपार्श्वमनःस्थितेः ॥६॥
सुलभते वरवल्लभ-वल्लभा, लसदशेषमनोरमभोगकाम्।
सुतविनीतयुतां परिवारितां परिवृणोति स पार्श्वविभुस्तुतेः ॥७॥
अपि तु मूत्र कफादिमहौषधिः-सदणिमागरिमाऽऽदिक-लब्धयः।
वचनकार्यमनोगतसिद्धयः प्रभवतात्प्रभुपार्श्वमुपासिते ॥८॥
अभयमर्थितकामितलब्धयो न भवामि च मोहपराधीनः।
परमतत्त्वविदात्मगुणाधीनो, भवतु मे 'भवमुक्त' पदं ध्रुवम् ॥९॥

**मन्त्र :** ॐ ह्रीँ श्री धरणेन्द्र-पद्मावतीपरिपूजितश्रीशंखेश्वरपार्श्वनाथाय नमः॥

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्तिः ।

श्री शङ्खेश्वरपार्श्वाय नमस्कृत्याऽत्र भक्तितः विवृतिं भवमुक्तोक्ते स्तवे किञ्चिल्लिखाम्यहम्। अथ कलिकालकल्पतरुपरमप्रकटप्रभावविशिष्टाऽसदृशसिद्धि-समृद्धिशान्तिसमाधिदातृश्रीशङ्खेश्वरपुराधीशस्य श्रीपार्श्वनाथस्वामिनः स्तुतिं कुर्वन् कविरिह प्रस्तावे प्रचलितद्रुतविलम्बितच्छन्दसा नामस्थापनानिक्षेपस्थे परमात्मनि स्वात्मभावं प्रकटीकुरुते। ननु भावनिक्षेपो व्यवच्छिद्यते ? न, नेह क्षेत्रे न चाद्यतने काले प्रत्यक्षीभूतभावो भावपरमात्मा प्राकृतजनानां, स च तज्ज्ञानयुक्तयोगिगम्यत्वाद्। अतो जनमनुसन्धातुं भावपरमात्मनाऽस्मत्पार्श्वे श्रेष्ठावलम्बनेषु प्रकटैकाऽवलम्बनमिदं, न च निषिद्धं पूर्वाचार्यैरिदमनुसन्धीयतामेतत्**प्रतिमाशतकादौ**। अतो नामस्थापनास्वरुपगुणकीर्त्तनम-यस्तवोऽयं तदैहिक्यप्रभावदर्शकश्च। अत्राऽलम्।

आह सौम्यः कश्चिदिह दृश्यमानकल्पाऽङ्कुरसमूलोच्छेदवदैहिक्यफलप्राप्तीच्छा भगवतश्चैहिक्यतः पारलौकिकपरमपदपर्यन्तफलप्रापणप्रभावोऽचिन्त्यातिशायी तत्कुत एवम्? सत्यम्। फलमात्रदर्शनमेव चात्र न चोपादेयतैहिक्यफलस्य, तत्राऽपि भीषणेऽद्यतने काले परलोकादिभविष्यत्कालभाविवस्तुदृष्टिरल्पतमा प्राकृतजनानां, तेषां च प्रभुभक्त्यादिविषयाभिमुख्याऽर्थं प्रवृत्तमिदं, **धर्मबिन्दु**नामोपदेशग्रन्थरत्ने सूरिपुन्दरश्री **हरिभद्रसूरयः** समारभन्ते धर्मफलदर्शनेनैव **नमिउणस्तोत्र-चिन्तामणिस्तोत्रा**दावपि तदनुसन्धीयताम् अत्रालम्।।

पुनः कश्चिदुग्रोऽत्राह, सुगृहीतनामधेयैः सकलसमयसारपारगामिभिः प्राक्तनाचार्यैः कृतवन्त्यो बहुशोऽत्यन्ताद्भुताऽलङ्कारच्छन्दोलक्षणावलिभिश्चित्तचमत्कारिण्यः सुसंस्कृताश्च गीर्वाण-प्राकृत-गूर्जरादिगिरायां स्तुत्यः, तदद्यतनकालीनैर्बहुशो विबुधैरपि जिज्ञासुजनैः श्रोतुमपि न पार्यते, तत् पुनः पठितुं, पाठयितुं जपितुं समनुप्रेक्षितुमिति वाणी विचारविलास एव तथाऽपि पण्डितकविंमन्येनाऽऽधुनिकेनाऽनेनाऽनभिज्ञातभावपरमात्म-स्वरूपलेशे, वर्त्तमानकालैकप्रेक्षिणि, विस्मृतप्रायोगूर्जरादिगीःपरम्परावत्यपि, म्लेच्छा-ऽऽङ्ग्लभाषैकपाठिवादिनि, तदनुकारिणि, प्रायो नास्तिकसदृशि, प्राकृतजने किमर्थं व्यर्थं स्वोत्कर्षणदर्शनमेधाप्रदर्शनरुपं, कृष्णमहिषस्य पुरो भागवत्पाठपारायणभूतं, सामान्य-च्छन्दोऽलङ्कारलेशं, प्रारब्धं, संस्कृतस्तोत्रं ? वरमाङ्गलभाषीया काचित्कवितेति।

इह खलूच्यते-नूतनशास्त्रभररचयितृभिः प्राक्तनमहर्षिभिः, सज्जनो गुणग्राहितया स्तुतः, अवधिरितश्च माध्यस्थ्यतया दोषमेव ग्राही, नकारात्मकदृग्, भवादृग् दुर्जनगणः, 'उपमित्यादावपि तादृग्दर्शनात्। तथैव' ये संस्तवं तव विभो रचयन्ति भव्या' इत्यपि वचनं कल्याणमन्दिरस्तोत्रसमापनप्रसङ्गे श्री सिद्धसेनदिवाकरसूरिश्रेष्ठो वक्ति, ततो न दुष्टेयं प्रवृत्तिः। तथा च नैषा प्रवृत्तिः स्वोत्कर्षार्थं परन्तु स्वभक्तिहृदयोर्मिदर्शनायाऽऽत्मकृतज्ञता च

परमात्मनि प्रदर्शनार्थमिति भाव्यम्। सकलगुणनिधेः प्रभोर्गुणकीर्त्तने सुरगुरुरपि स्वसमग्रशक्त्या नालं किम्पुनरेकः कश्चित् मादृशः प्राकृत जनः। श्रूयते च **'क्वाऽहं'** तदनु **'तथापी'** त्यादिना यादृक्शब्दालङ्कारलक्षणभरसम्पादनपटोस्तावत्सार्धत्रिकोटि-श्लोकप्रमाणनूतनस्वयंस्फूर्तशास्त्रसंरचनाकुशलस्य कलिकालसर्वज्ञश्री हेमचन्द्राचार्यस्या-ऽऽर्जवत्त्वं, न च तादृक् नव्यकवेर्गर्वसमुद्वहमविशिष्टनवपश्लोकरचनायां भाव्यम्। प्रवृत्तिश्चेयं विश्वचिन्तामणिधरणेन्द्रपद्मावतीवैरोट्यापरिपूजितस्य, जयाऽजिता, विजयाऽपरिजितान्वि-तस्य, दिशाम्पालैर्ग्रहैर्यक्षैर्विद्यादेवीभिरन्वितस्य, चतुषष्ठि-सुरेन्द्रैश्छत्रचामरैः भासमान-विभूतेः, श्रीशङ्खेश्वरपुराधीशस्यपुरतस्तत्प्रसत्त्यर्थं गीर्वाणगिरि-यामयमुपक्रमः। मातुःपुरस्तदाश्रितस्य बालस्य स्खलद्भाषापि तद्विभूत्यै भवत्येव, किम्पुनर्जगतो मातुः पितुर्भर्तुरीशितुः पुरः। नोचितं च शिष्टजनस्योच्छिष्टतुच्छ-म्लेच्छाऽऽङ्ग्लभाषया नाम-मात्रमपि ग्रहणं किम्पुनर्विचनं, श्रवणमित्यादि। अतोऽत्रालं निरस्तं समस्तं चोग्रमतम्।

अथ श्रीशङ्खेश्वरपार्श्वनाथस्तवननवकं पश्यामोऽ**खिले**त्यादि श्लोकयुग्मेऽखी लेत्यादिना समस्तजीवराशीगतचरमावर्त्तवर्त्तिकर्मलाघवकृताऽपुनर्बन्धकतया सर्वभव्य-जीवसमुदायऽऽत्मककमलगणविकासनसहस्रकिरणोऽप्रकटपरमाऽऽनन्दस्वरूपबद्धकोष-भेदनादानन्दाऽऽमोदभरणप्रफुल्लनाच्च, एवंभूतः स पार्श्वनाथो मे मम 'शिवङ्करसम्पदः' परमकल्याणकारिणी संपदाः सम्पत्तीः 'ददात्वि' ति सर्वत्र सम्बन्धनीयम्।

**'सकले'** त्यादिना जिनवचनश्रद्धालुचतुर्थादिगुणस्थानवर्त्तिभव्यजीवसमुदाया-ऽऽत्मकरत्नाकरप्रोल्लसने सम्पूर्णकलाकलापकलितपार्वणेन्दुस्तेषां तद्दर्शनहेतु-तद्वचनानुसरणवीर्यवृत्तिमाविष्करणात्। श्राद्धेत्यात्रच्छन्दोऽपवादः। 'अघ'-त्यादिना पापः स एवान्धकारहरणश्रीशङ्खेश्वरपुराधीशः पार्श्वनाथ इत्येवं सम्बन्धः। 'स हृदे' त्यादिना स जिनेश्वरो मम हृदयकमलेऽधितिष्ठति प्रचुरतया तत्रस्थस्य तस्य तत्स्वरुपध्यानकरणात्।

स पुनः कीदृङ 'नरे' त्यादिना मनुष्यदेवदानवेन्द्रवृन्देन सततमस्खलितं भक्तिभाव-भरहृदयेन भजनपूजनाऽर्चनतत्प्रतिपत्तिविषयः। 'वरं' मित्यादौ श्रेष्ठप्रकृष्ठसमस्तसम्पत्ति समृद्धिभिर्भूषितव्यक्तित्वः। यत भावपरमात्मनि प्रातिहार्याऽतिशयादिमहर्द्धिर्दूरे तिष्ठतु, वर्तमानकालीनस्थापनानिक्षेपस्थश्रीशङ्खेश्वरपार्श्वनाथप्रतिमाऽपि जनैः प्रकृष्टविभूत्या भूषिता दृश्यते। तत एव 'हजरा-हजूर' इति प्रसिद्धेः 'प्रकटे' ति। वाञ्छितेच्छितकामितविषये लौकिककामधेनुचिन्तामणिकल्पतरुचित्रवल्लिकामघटादीनि वस्तूनि तद्धारके यथापुण्यं फलति नवा, तत्राप्यसौ भक्तिभरहृदयगतः सन्नसङ्कल्पिताकामितानिच्छितपरमार्थ-विभूतीनामपि लीलया प्रदानसमर्थ स इति भावः। एतत्सर्वप्रकटप्रभावलेशश्चतुर्याद्यष्टम-पर्यन्तश्लोके प्रदर्शितस्तद्विस्तारः पश्चाद्दर्शयिष्यति, तत्पूर्वमत्र कविः कृतौ तन्नाममन्त्र-गर्भितस्वाम्नायाऽऽगतमहामन्त्रस्वरूपलेशो दर्शयति। **'धरणे'** त्यादौ 'श्रुतकेवलि-

भद्रबाहुसूरिसिंहकृते **'उपसर्गहर'** स्तोत्रे **'चिट्ठउ दूरे'** इत्यादिना तन्नाममात्रधन्यीभूत-मन्त्रमहिमा कथितो, यत्र च कथितं श्री पार्श्वनाथ प्रभोर्नामयुत **'नमिऊणे'** त्यादि फुल्लिङ्गमन्त्र दूरे आस्तां, तन्नामग्रहमपि महत्फलाय, येन जाप्तेन ध्यातेन मनुष्य-तिर्यग्गतिगतजीवा दुःखं न प्राप्नुयुरिति वचनतः प्रसिद्धिप्राप्त इति। प्रणव-ओङ्कारो, बीजो- ह्रींकार इत्यादिनाऽलङ्कृतस्याधिष्ठायकदेवतापरिपूजितविभोर्नामग्रहणं-नमस्करणं महत्फलाय, मन्त्रश्चायं **ॐ ह्रीं श्रीं धरणेन्द्रपद्मावतीपरिपूजिताय श्री शङ्खेश्वरपार्श्वनाथाय नमः'** इत्याकारकप्रभुनामविशेषणविशिष्टधन्यीभूतमन्त्रो भो कल्याणेच्छु'भविक!' भवतासौ 'आज्ञया' विधिना प्राप्तव्यः प्राप्य च 'जपतु' भावपूर्वं, जप्तव्यो ध्यातव्यः अथाऽऽज्ञालेशः-सानशनं त्रिदिनान्तःसपादलक्षप्रमितोऽयं जप्तव्यः, पूजाभक्त्यादीन्यपि यथाविधि विधेयानि।

तदनन्तरमेवंभूतस्य तस्य परमात्मनः पञ्च श्लोकेषुः प्रभावलेशः कथ्यते। 'जगती' त्यादौ चानादिकालाऽऽगताऽनन्तकालगामिदुःखस्वरुपदुःखानुबन्धिदुःखफलके कर्म्मानुविद्धे संसाररूपे 'जगति' पदे पदेऽत्र प्रोक्तानि प्रचुरदुःखभयादीनि भवन्त्येव, तत्रापि श्री शङ्खेश्वरपार्श्वनाथप्रभो र्भक्ति ध्याननिदिध्यासनात्मसमर्पणात्मकं 'शरणं' समाश्रिते' सति 'मम' तत्राऽऽश्रितस्य 'भयं' 'नाऽस्ति' नमिउण-भयहरंस्तोत्रादौ विस्तारो प्राप्यते ऽतोऽत्राऽपि न दुष्टम् शब्दार्थः सुगमो भासते। 'कुग्रहे' त्यत्रच्छन्दोपवादः प्रयुक्तः।

'धने' त्यादौ स प्रभुः कीदृगर्थपुरुषार्थं समर्थयति, 'स' ध्यानादिकर्ता पार्श्वनाथस्य, 'मनसि' 'स्थिते' र्हेतोरेवंभूतानि वस्तूनि प्राप्नोतीतिहार्दम्।

तदनु 'सूलभते' इत्यादौ प्रभुमेकं मोक्षलक्ष्येनोपासितेऽनुषङ्गतः कीदृक्काम-पुरुषार्थमुपासकः परिवृणोतीत्यपि सुगमम्।

'अपी' त्यादिनाऽर्थकामाभ्यां विमुक्तानां शरणागतानामुपासनाहेतोर्लब्धिसिद्धि-सम्पादनमिति विध्यर्थाऽऽशीरर्थान्यतररीत्या प्रभवतादिति सुगमं, तत्रापि चान्यद्विस्तार विशेषग्रन्थान्तरेषु ज्ञातव्य, अत्रालम्।

योगमार्गनिरोधकतमोरजोगुणान्तर्गतदोषाः, कषायमोहजनितार्थितकामितलब्धि-विकारा प्राचुर्येण भवन्त्येव, यदुक्तम् भुजङ्गप्रयातच्छन्दसि-

अणिच्चा सुराणं सुहाणमवत्था
अणिच्चा अणित्थिज्जिया सव्व अत्था।
अणिच्चा य रायाण राया समत्था,
अणिच्चा हु उप्पत्ति जुत्ता पयत्था ।।१।।

अणिच्चा जए चक्कवट्टीण रिद्धी;
अणिच्चा णहोचारि विज्जाण सिद्धी।
अणिच्चा य केसिं मुणीणं पि लद्धी,
अणिच्चा सुराणं तिरुवरिद्धी,

इत्येवंभूतप्राकृतश्लोकगतभावनाभावितान्तः करणः कविः पराधीनः गुणाधीनः इत्यत्र तद्भावादात्मनो निर्लेपभावं मोहपराधीनताऽभावेन प्रार्थयति। तत एव जीव उत्तरोत्तरगुणभाजनभूतो भवत्येव, यथा मोहापहारतया जीवस्तत्वार्थश्रद्धानरूपं सम्यग्दर्शनं प्राप्नुयात्, तदनु सम्यग्ज्ञानं ततश्च तदेवाऽऽत्मनः 'परमतत्त्ववित्त्वं **'ज्ञानस्य फलं विरतिरिति** वचनात् ततो दर्शनज्ञानाभ्यामेव सम्यक्चारित्रवान्नवश्यङ्कारमात्मगुणाधीनः' 'भवमुक्तपदं' आत्मनः परं श्रेयस्त्वं प्राप्नुयादिति न संशयः, कविरप्येवं वाञ्छाशील इति समापने निष्कर्षेण भाव्यम्।

देवाय गुरुदेवाय वाऽऽदौ कस्मै नमस्यते?।
इति प्रश्ने नमस्तस्मै देवो येनेह दर्शितः।।१।।
समत्वसत्वसत्यात्मव्यक्तित्वं मूर्तशासनम्।
श्रीरामचन्द्रसूरीशं, प्रकृष्टं शरणं श्रये।।२।।
श्रीपुण्यपालसूरीन्द्र बृहत्तमगणे धुरः ।
तस्य श्रीचरणाऽचिन्त्य-प्रसादः सफलोऽभवत्।।३।।
तत्पादाब्जालिना हीर-भूषणकेन केनचित्।
स्तवेऽत्र'भवमुक्तोक्ते विवृतं मन्दबुद्धिना।।४।।
असम्बद्धविसंवादि, व्याकरणे च वर्णने।
स्यात्किञ्चिदत्र दुष्टं मे, शोधनीयं बुधैर्जनैः।।५।।

इति श्री शङ्खेश्वरपार्श्वनाथस्तवनवके समतासमाधिसिद्धतपागच्छाधिराजाचार्य-श्रीमद्विजयरामचन्द्रसूरिसमाधिपादशताब्दौ विवरणमिदं सम्पूर्णमिति शम्।

।। शुभं भवतु ।।

जिनशासनं नाम जगत्भिन्नम् शासनम्।

# श्रेयस्करीजिनस्तुतिचतुर्विंशी

- *साध्वीजीश्री प्रशमनिधिश्रीः

**श्री नमिजिनस्तुतिः**

**छन्दोनाम :-** द्वादशाक्षरीयजगतीजातौ 'भुजङ्गप्रयातं' नाम समवृत्तम्।

**वर्णन्यास :-** ।ऽऽ ।ऽऽ ।ऽऽ ।ऽऽ

**श्लोकः :-** **क्षमातः क्षमां, स्थैर्यतो मेरुशैलं,**
**परार्थेन मेघं, प्रतापेन सूर्यम्।**
**गुणै रत्नराशिं, समाक्रोशतीष्टं,**
**स्तुवे तं नमिस्वामिनं भावतोऽहं।।२१।।**

**अन्वयः :-** यः, क्षमां क्षमातः, मेरुशैलं स्थैर्यतः, मेघं परार्थेन, सूर्यं प्रतापेन, रत्नराशिं गुणैः, समाक्रोशति, तं, इष्टं, नमिस्वामिनं, अहं, भावतः, स्तुवे।

**विवरणं :-** **क्षमातः क्षमां....**। अहं भावतः-आन्तरप्रीत्या **तं नमिस्वामिनम्**-नमिनाथं **स्तुवे**-नौमि। कीदृशं? **इष्टं**-पूज्यं। तं इति कं?-यः **समाक्रोशति**-पराभवति। कां? **क्षमां**-पृथ्वीं। कुतः? **क्षमातः**-क्षान्तिनामगुणेन। पुनः कं? **मेरुशैलं**-मन्दराचलं। केन? **स्थैर्यतः**-

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्त्तिनी ।

निश्चलत्वेन। पुनः कं? **मेघं** जलधरं। केन? **परार्थेन**-परोपकारित्वेन यथा मेघः उच्चावचं अविचार्यैव सर्वत्र जलं वर्षति प्रभुस्तं जलधरमपि पराभवति सर्वजीवराशौ करुणया परमसुखमार्गप्रदर्शकत्वात्। पुनः कं? **सूर्यं**-रविं। केन? **प्रतापेन**-तेजसा। पुनः कं? **रत्नराशिं**-समुद्रं। कैः? **गुणैः** - असंख्यगुणैः। समुद्रे संख्यातीतानि रत्नानि, ततोऽपि गुणानां अनन्तत्वात् प्रभुः रत्नाकरं पराभवति ।।२१।।

**वृत्तवैशिष्ट्यं** :- अत्र सादृश्यमूलक-हेतूपमालङ्कारः। द्वादशाक्षरीय-जगतीजातौ '**भुजङ्गप्रयातं**'' नाम समवृत्तं। तल्लक्षणं तु हैमच्छन्दोऽनुशासने द्वितीये-ऽध्याये १७० तमे सूत्रे ''यीः **भुजङ्गप्रयातम्**'' इति।

* * *

**श्रीनेमिजिनस्तुतिः**

**छन्दोनाम** :- सप्तदशाक्षरीयाऽत्यष्टिजातौ '**हारिणी**' नाम समवृत्तम्।

**वर्णन्यास** :- ऽऽऽ ऽ।। ।।। ऽऽऽ ।ऽऽ ।ऽ **चतुर्षड्भिरक्षरैर्यतिः-विरामः।**

**श्लोकः** :- **प्रीत्याऽऽपूर्णां, विरहविधुरां, राजीमतीं कन्यकां।**
**तूर्णं त्यक्त्वा, नवभववधूं, मुक्तावतिस्नेहतः।।**
**यः प्राग् रागादपि हि नितरां, तस्यै समर्प्याऽमृतं**
**प्रेमाऽरक्षत्, सकलसुखदं, तं नेमिनाथं भजे ।।२२।।**

**अन्वयः** :- प्रीत्याऽऽपूर्णां, विरहविधुरां, नवभववधूं, राजीमतीं कन्यकां, यः, मुक्तौ अतिप्रेमतः तूर्णं त्यक्त्वा, अपि हि, प्राग् रागाद् तस्यै, अमृतं, समर्प्य, नितरां प्रेम अरक्षत्, तं, सकलसुखदं, नेमिनाथं भजे।

**विवरणं** :- **प्रीत्यापूर्णां**....। **तं-नेमिनाथं**-द्वाविंशं तीर्थनाथं। **भजे** सेवे। तं कं? **यः सुतरां**-सुष्ठुरुपेण-**नितरां प्रेम**-स्नेहः **अरक्षत्**-अपालयत्। कस्माद्? **प्राग् रागाद्**-पूर्वभवप्रीत्या। किं कृत्वा?-**समर्प्य**-वितीर्य-दत्त्वा। कं?

**अमृतं** मोक्षं। कस्यै? **तस्यै**-राजीमत्यै। किं कृत्वाऽपि? **त्यक्त्वाऽपि**-विहायापि। कां त्यक्त्वा? **-राजीमतीं-कन्यकां।** कीदृशीं? **-आपूर्णां**-संभृतां। कया? **प्रीत्या**-स्नेहेन-अनुरागेण। पुन: कीदृशीं?-**विरहविधुरां**-विरहेण-वियोगेन विधुरा-व्याकुला या सा तां। कथं त्यक्त्वा? **तूर्णं**-आशु-द्रुतं। कस्माद्? **अतिस्नेहत:**-अत्यनुरागेण। कस्यां? **मुक्तौ**-निवृत्तिकन्यायां ।।२२।।

**वृत्तवैशिष्ट्यं :-** अत्र प्रथम-द्वितीयपादयो: स्वभावोक्तिरर्थालङ्कार:। एतत् सप्तदशाक्षरीयाऽत्यष्टिजातौ 'हारिणी' नाम समवृत्तम्। तल्लक्षणं तु हैमच्छन्दोऽनुशासने द्वितीयेऽध्याये २९२ तमे सूत्रे 'म-भ्-न-म्-य-ल्-गा: **हारिणी**' घ-चैरिति -चतुर्भि: षड्भिरक्षरै: यतिर् विराम इति।

* * *

**श्री पार्श्वजिनस्तुति:**

**छन्दोनाम :-** पञ्चादशाक्षरीयाऽतिशक्करीजातौ **'कामक्रीडा'** नाम समवृत्तम् ।

**वर्णन्यास :-** ऽऽऽ ऽऽऽ ऽऽऽ ऽऽऽ ऽऽऽ

**श्लोक: :-** **प्रज्ञापद्मावासे पद्मं, श्रेयोलक्ष्मीगोविन्दम्,**
**गोविन्दं ज्ञानेनाऽस्वप्नै, र्गेयं ध्येयं विश्वेशम्।**
**विश्वे शं दातारं सारं, कर्माऽगव्यूहे पार्श्वम्,**
**पार्श्वं नाथं भक्त्या वंदे, पार्श्वे श्रीपार्श्वो यस्य ।।१८।।**

**अन्वय :-** यस्य पार्श्वे श्रीपार्श्व:, प्रज्ञापद्मावासे पद्मं, श्रेयोलक्ष्मीगोविन्दं, ज्ञानेन गोविन्दं, अस्वप्नै: गेयं, ध्येयं विश्वेशं, विश्वे शं दातारं, सारं, कर्माऽगव्यूहे पार्श्वं, पार्श्वं नाथं, भक्त्या, वन्दे।

**विवरणं :-** **प्रज्ञापद्मावासे......।। यस्य** - पार्श्वनाथस्य। **पार्श्वे**-समीपे। श्रिया

युतः पार्श्वनामा यक्षः - **श्रीपार्श्वः**। अस्ति इति गम्यम्। तं **पार्श्वनाथं**-वामासुतं भक्त्या-मानसबहुमानेन **वन्दे**-स्तौमि। कीदृशं? **पद्मं** - कमलं। कस्मिन्? **प्रज्ञापद्माऽऽवासे**,-प्रज्ञा-प्रकृष्टा धीः, सा एव लक्ष्मीः, तस्या आवासः-निवासः, तस्मिन्। पुनः कीदृशं?-**श्रेयोलक्ष्मीगोविन्दं**, श्रेयः-निवृत्तिः-मुक्तिः सा एव लक्ष्मीः-श्रीः, तस्यै गोविन्दः-कृष्णः यः स तं। पुनः कीदृशं? **गोविन्दं**-गां-सत्यं विन्दति-प्राप्नोति-विवेचयति वा यः स तं, सत्यप्रापकं-विवेचकम्। केन? **ज्ञानेन**- केवलज्ञानेन। पुनः कीदृशं? **गेयं**-स्तुत्यं-श्लाघ्यं। कैः? **अस्वप्नैः** देवैः सुरैः। पुनः कीदृशं। **ध्येयं**-ध्यातव्यं-आराध्यं। पुनः कीदृशं?-**विश्वेशं**-विश्वस्य-त्रिभुवनस्य ईशं-स्वामिनं-जगन्नाथं। पुनः कीदृशं? **दातारं**-वदान्यं-दायकं। किं? **शं**-सुखं। कस्मिन्? **विश्वे**-जगति। पुनः कीदृशं? **सारं**-श्रेष्ठं। पुनः कीदृशं। **पार्श्वं**-पर्शूणां समूहं। कस्मिन्? **कर्माऽगव्यूहे** कर्माणि पापानि एव अगाः-वृक्षाः, तेषां व्यूहः समूहः-तस्मिन्।।२३।।

**वृत्तवैशिष्टयं :-** अत्र संदृष्टाख्ययमकालङ्कारः। तल्लक्षणं तु काव्यादर्शे तृतीयपरिच्छेदे महाकविदण्डिना इदं प्रोक्तं-'**संदृष्टयमकस्थानमन्तादी पादयोर्द्वयोः**।' इति। एतत् पञ्चादशाक्षरीयाऽतिशक्करीजातौ '**कामक्रीडा**' नाम समवृत्तम्। तल्लक्षणं तु हैमच्छन्दोऽनुशासने द्वितीयेऽध्याये २६२ तमे सूत्रे ''**मुः कामक्रीडा**'' इति।

* * *

**श्री महावीरजिनस्तुतिः**

**छन्दोनाम :-** अष्टादशाक्षरीयधृतिजातौ '**चन्द्रलेखा**' नाम समवृत्तम् ।

**वर्णन्यास :-** ऽऽऽ ऽ।। ।।। ।ऽऽ ।ऽऽ ।ऽऽ

**श्लोकः :-** **वीरं वीरं, विशरणशरणं, वीरवीरं विमारं।**
**मारं मारं, सुभग-सुभगवल्लेखलेखाऽवितारं।।**

**तारंतारं, प्रशमप्रशमगं, कल्पकल्पं विलोकम्।**
**लोकं लोकं, विभव-विभववल्लोकलोकं प्रमोदे ।।२४।।**

**अन्वयः** :- वीरं, विशरणशरणं, वीरवीरं, विमारं, मारं, मारं, सुभगसुभगवल्लेखलेखाऽवितारं, ता-रंतारं, प्रशमप्रशमगं, कल्पकल्पं, विलोकं, विभव-विभववल्लोकलोकं, वीरं, लोकं लोकं प्रमोदे।

**विवरणं** :- **वीरं वीरं........।** अहं वीरं चरमतीर्थपतिं-वर्धमानं लोकं-लोकं-दृष्ट्वा-दृष्ट्वा, निरीक्ष्य-निरीक्ष्य। **प्रमोदे**-प्रहृष्यामि। कीदृशं? वीरं-विशेषण ईरयति-प्रेरयति-मोक्षमार्गं प्रति जन्तून् यः स तं। पुनः कीदृशं? **विशरणशरणं**-विगतं शरणं येषां ते विशरणाः-शरणरहिता जनाः, तेषां शरणं-आश्रयः यः स तं। पुनः कीदृशं? **वीरवीरं**-वीरेषु-शूरवीरेषु अपि वीरः-शूरः यः स तं-बाल्येऽपि अङ्गुष्ठेन मेरुं कम्पकत्वात्। पुनः कीदृशं? **विमारं**-विगतः मारः-कन्दर्पः यस्मात् स तं। पुनः कीदृशं? **मारं**- **'मा'** इति मानं ''मा-स्त्री माने मृतौ वेला, मेधा पद्मासु च स्त्रियां''। इति राघवकविरचितैकाक्षरकाण्डे। **रः** इति शत्रुः-''**रू रौ** शब्दौ पुमांसौ द्वौ, **शत्रु**-शब्दार्थ-वाचकौ।'' इति विश्वशंभुप्रणीतैकाक्षरनाममलिकायां। मायाः मानस्य रः-शत्रुः यः स तं। मान-कषायमोहनीयस्य शत्रुः-मोहनीय जेतृत्वात्। पुनः कीदृशं? **मारं**-**'मा'**-धीः - बुद्धिः ''**मा** स्त्री माने कृतौ वेलान्ते **धी**-स्त्री-व्यय-वस्तुषु।'' इति कालिदासव्यासकृतैकाक्षरनाममालायां। रः- तोयधिः-''**रः** कामो वह्निः सूर्योऽथ-तोयधिः''। इति सौभरीकृतैकाक्षरनाममालायां। मायाः-धियः, **रः-तोयधिः**-सागरः यः स तं-ज्ञानसमुद्रं अन्तज्ञानमयत्वात्। पुनः कीदृशं? **सुभगसुभगवल्लेखलेखाऽवितारं**-सुभगश्च सुभगवच्च लेखऽलेखाऽविता च यः स तं। सुभगः-रूपवान्, सुभगवत्-ऐश्वर्यवान्, लेखाः देवाः, तेषां लेखाः-श्रेणिः, तां अविता-रक्षकः-नायको वा यः स

तं। पुनः कीदृशं? ता-रंतारं-ता-करुणा। तायां-करुणायां रमते यः स तं। ''**करुणायां** तु **ता** स्त्री स्याद्'' इति राघवकविरचितैकाक्षरकांडे। पुनः कीदृशं? **प्रशम-प्रशमगं**-प्रशमः- प्रकृष्टशमधनः, प्रशं-प्रकृष्टसुखं, अगति प्राप्नोति यः स तं। पुनः कीदृशं? **कल्पकल्पं**-कल्पः-कल्पतरुः, तस्य कल्पः-तुल्य यः स तं। ईप्सितदायकत्वात्। पुनः कीदृशं? **विलोकं**-विशेषेण लोकते-शोभते यः स तं। सर्वश्रेष्ठरूपधारकत्वात्। पुनः कीदृशं? **विभवविभववल्लोकलोकं** विभवश्च विभववच्च लोकलोकश्च-यः स तं। विभवः-जन्मरहितः विभववत्-आत्म-स्वभावसुखधनवान्-लोकलोकं-लोकं-विश्वम्, लोकते निरीक्षते यः स तं-लोकलोकं-विश्वद्रष्टारं।।२४।।

**वृत्तवैशिष्ट्यं :-** अत्र सन्दृष्टादिमध्यान्तर्गताऽव्यपेतयमकालङ्कारः-अन्त्यानुप्रास-शब्दालङ्कारश्चाऽपि। एतदष्टादशाक्षरीयधृतिजातौ 'चन्द्रलेखा' नाम समवृत्तम्। तल्लक्षणं तु हैमछन्दोऽनुशासने द्वितीयेऽध्याये ३०४ तमे सूत्रे ''म भ् ना यिः चन्द्रलेखा'' इति। घ-छैरिति वर्तते। चतुर्भिः-सप्तभिश्चाक्षरैर्यतिः-विरामः।

❀ ❀ ❀

शब्दः, रूपं, रसः, स्पर्शः, गन्धश्च
इति पञ्चानां समुदायस्तज्जगद्।

# काव्यशास्त्र-विनोदेन

- *साध्वीजीश्री प्रशमनिधिश्रीः...

प्राणिषु का सदा कार्या? त्यक्तव्यो कस्च सर्वदा?
सर्वेषां ममता कीदृग्? दया दोष-निषूदनी ।।१।।

कषायाः कीदृशा लोके? संसारे भ्रामयन्ति के?
वर्ज्यं सर्वत्र किञ्चेह? दुर्जयाः विषया अति ।।२।।

वैदुष्यै भ्रमणीयो कः? केषां विद्या भवेत् प्रिया?
दातरि किं सतां-वाक्यं? विदेशः विदुषां नहि ।।३।।

प्राणिनः संसरन्ति क्व? पिता कः पाप्मनां मतः?
विनृम्भणे कृदन्तं किम्? संसाते मोहविजृम्भणे ।।४।।

भवेयुः कीदृशा आढ्याः? याचकाः किमपेक्षते?
का सर्वं सहते लोके? बहुरत्ना वसुन्धरा ।।५।।

श्लाध्यं स्यात् किं सतां विश्वे? सिद्धचक्रश्च कीदृशम्?
केषां कार्या प्रशंसाऽत्र? सद्वृत्तं महितं सताम् ।।६।।

स्वभावः कथ्यते कोऽसौ? ध्येयो कः मानसे सदा?
किं क्रियोपक्रमे कार्यम्? धर्मः परम-मङ्गलम् ।।७।।

---

* पू.आ.श्री विजयरामचन्द्रसूरिसमुदायवर्तिः ।

# विश्वजनीनः प्रसारः संस्कृतभाषायाः

- *म.म.देवर्षि कलानाथ शास्त्री

विश्वस्य प्राचीनतमायाः समृद्धतमायाश्च संस्कृतभाषायाः प्रसारफलकं प्रारम्भादेव समस्तेऽपि भूमण्डले व्याप्तमासीदिति संस्कृतपण्डिताः प्रब्रुवन्त्येव? ''एतद्देशप्रसूतस्य सकाशादग्रजन्मनः। स्वं स्वं चरित्रं शिक्षेरन् **पृथिव्यां सर्वमानवाः मनोरियमुक्तिः** स्पष्टमेव निर्दिशति यत् पृथिव्यां सर्वेषां देशानां मानवा भारतीयस्याग्रजन्मतः सकाशाच्छिक्षां गृह्णन्ति स्म। तस्याः शिक्षायाः 'माध्यमं' नूनं संस्कृतभाषैव तु स्यात्। नान्यः पन्था विद्यते अयनाय।

अत एव सहस्राब्दीभ्यः संस्कृतभाषाया ग्रन्था विश्वस्य सर्वेषु देशेषु प्रासरन्। तेऽधीयन्ते स्म तत्-तद्देशस्थविद्वद्भिः। विश्वमानवस्य पुस्तकालये सर्वप्रथमो ग्रन्थोऽस्ति ऋग्वेद इत्यद्यत्वे समस्तेऽपि विश्वे सम्मान्यं तथ्यम्। सोऽयमृग्वेदो भारते ''दृष्टोऽभून् मनीषिभिः किन्तु मौक्तिकरूपेणैव ऋचामध्ययनं क्रियते स्म।

लिपिर्नाऽभूद् भारते। अतः ''श्रुति'' शब्दो वेदस्य पर्यायत्वेन प्रसिध्यतीति बहूनां शोधदर्शिनां प्रवादः, किन्तु ''लिपिरपि भारतेऽभूत्, वेदा अपि लिख्यन्ते स्म, एतस्य प्रमाणान्युपलभ्यन्ते यजुर्वेदादिषु'' इत्यादिसप्रमाणं प्रतिष्ठापितवन्तो विद्वत्प्रवर **पं. मधुसूदन ओझा** प्रभृतयोऽद्य सुविदिताः। इदं कटु सत्यमवश्यं ध्यातव्यमस्ति यन्मुद्रणशिल्पस्याऽऽविष्कारानन्तरमृग्वेदस्य मुद्रितायाः संहितायाः सर्वप्रथमाऽवतारणा भारते नोऽभूत्, किन्तु लघुनि द्वीपे आङ्गलदेशीये आक्सफोर्डनगरे तत्र स्थितस्य विश्वविद्यालयस्य संस्कृतविद्याविमर्शोद्देश्येन स्थापितं ''बोडेन चेयर'' पीठमधितिष्ठतः प्रो. मैक्समूलर नाम्नः शार्मण्यदेशीयविदुषः साधनया १८४८ ई. वर्षादारभ्य १८७५ ई. वर्ष

* ''भारती'' संस्कृतमासिकपत्रिकायाः अध्यक्षः सी/८ पृथ्वीराज रोड, सी स्कीम, जयपुर ३०२००१ (राजस्थान)

पर्यन्तमभूत्। तदनन्तरं समस्तेऽपि भूमण्डले ऋग्वेदः प्रसारमाप।

इदं तथ्यमप्यविस्मरणीयमेव यद् भारतीयस्य संस्कृतवाङ्मयस्य विश्वजनीनः प्रसारः ऊनविंश्यां शताब्द्यां पुनर्जागरणयुगस्य कस्यचन कारणान्महान्तं वेगमलभत यदा हि योरपीयैः शोपेनहावी प्रभृतिभि र्गीतादीनां ग्रन्थानां योरपयिभाषास्वनुवादाः कृताः, विलियम जोन्सप्रभृतिभिराङ्ग्लैः शाकुन्तलनाटकादीनामाङ्ग्लभाषानुवादाः जातुर्वादाः कृताः। (१७८९-९२)। ऊनविंशी शताब्दी, संस्कृतस्य विश्वजनीनप्रसारे सुमहद्योगदानमनुष्ठित-वतीत्यनुमीयते। तदा हि वेदानां विमर्शः, अनुवादादिकं च विदेशेषु कदाचन भारतादप्यधिकम-भूदिति बहूनां विश्वासः। को न जानाति एच. एच. विल्सन, ग्रिफिथ स्टीवेन्सन इत्यादी आङ्ग्लविदुषो यै र्वेदा अधीता अनूदीताश्च, कीथ, एगलिंग, गोल्डनर बार्नूक प्रभृतयो वेदविमर्शकाः सुप्रथिताः। ब्रूमफील्डेन तु वेदानामद्भुताऽनुक्रमणी प्राकाश्यत यया

"सन्दर्भ" ग्रहणं सुकरमभूत्। मोनियरविलियम्ससदृशा विद्वांसो बोडेन पीढमध्यतिष्ठन्। कालजयिनः कोशग्रन्थस्य प्रणेता महर्षिः मोनियरविलियम्स प्रणम्यत एव मादृशैः सर्वैः।

यथा तस्यां शताब्द्यामाङ्ग्लदेशे संस्कृतवाङ्मयस्य दुन्दुभिघोषः स्पष्टमश्रूयत, तथैव योरपे, अमरीकाप्रभृतिदेशेष्वपि विश्वविद्यायलयेषु संस्कृताध्ययनाय विभागाः, सङ्कायाश्चाऽस्थाप्यन्त। पाणिनेर्व्याकरणोपरि हार्वर्डविश्वविद्यालयेन अमरीकादेशे यत् कार्यं कृतं तेन प्रेरिताः प्रो. विद्यानिवासमिश्रसदृशा अनेके विश्रुता विद्वांसस्तत्र ज्ञात्वा शोधकार्यमन्वतिष्ठन्। कैम्ब्रिज-ओक्सफोर्डप्रभृतिविश्वविद्यालयेषु ब्रिटेनदेशे संस्कृत-विभागाः समृद्धिमलभन्त, तस्य कारणं तु सुविदितं यत् आङ्ग्लानां शासनं भारतेऽभूत्, ते च भारताद् ग्रन्थादींस्तत्र नयन्ति स्म, भारतीयविद्वद्भिः सह तेषां संवादः सङ्गमश्च सरलोऽभूत्।

महतः प्रमोदस्यायं विषयो यद् विदेशेषु संस्कृतवाङ्मयस्य प्रसारविषये सुबहु साहित्यं सृष्टचरम्, संस्कृतसाहित्यस्येतिहासा अपि सर्वप्रथमं तु वैदेशिकैरेव विद्वद्भिर्विलिखिताः ख्यातिमलभत, कीथ-विंटरनिट्जप्रभृतीनां साहित्येतिहासाः पाठ्यक्रमेषु नियता अभूवन्। किं बहुना? कोलब्रूफ, अलेक्जेंडर, हेमिल्टन, श्लीगल, शेजी, बॅप, हेबोल्ट, शेलिंग, कोट, शिलर, स्वफार्ट फर्गुसन, जेम्स, रोय, बोटलिंग (कोषलेखकाः) ग्रासमैन, सूडोल्फ, गेल्डनर, जुडविग, पिशेल, वेखर, मैकडोनेल, थीबो, रोजी, जैकोबी, गोल्डस्टुकर, आफ्रेक्ट, म्योर, ह्विटनी, लेनमैन, गार्व, ओल्डनबर्ग, हिलेब्रोंत, बोटालिंग, राइस डेविड्स,

मोरिस हार्डी, स्पेयर, कैलैंड, सोकोमन, एगलिं, नेगलिंग, बेनफे, श्रोडर, स्टीवेन्सन, ग्रिलप्रभृतीनां वैदेशिकानां संस्कृतविदुषां नामानि, तेषां संस्कृतसेवायै सुविदितानि। एते तु पाश्चात्या अभूवन्, रूस-चीन प्रभृतिदेशेष्वपि तत्र स्थितैर्विद्वद्भिः संस्कृतविमर्शोऽकारि। बोटलिंग, रोरिकप्रभृतयो रूसदेशे न्यवसन्, तत्र व्यलिखित् संस्कृते। श्चेरबात्स्की प्रभृतयः संस्कृतविद्वांसो स्वप्रदेशे प्रथिताः।

इत्थं विश्वपटले संस्कृतप्रसारस्य स्वर्णयुगरूपेण ऊनविंशी शताब्दी, विंश्याः शताब्द्याश्च पूर्वार्धं गणयितुं शक्यते। किन्त्वेतदनन्तरं, न ज्ञायते कैः कारणैः, विदेशेषु संस्कृत संवर्धनस्य गतिर्वैपरीत्यामिवाऽभजत्। पाश्चात्यदेशेषु संस्कृताध्ययनेच्छुकानां छात्राणां सङ्ख्या क्रमशोऽपचीयते तेन कारणेन वा। आधुनिकयुगे कंप्यूटरप्रभृतिनूतनज्ञानशाखानां प्रसारस्य कारणेन वा पाश्चात्यविश्वविद्यालयेषु संस्कृतविभागाः, संस्थानानि समाप्तिं गतानि, संक्षिप्तानि वा विहितानीति महता खेदेन वयमवगच्छामः। गते कालखण्डे कैम्ब्रिज विश्वविद्यालये संस्कृते स्नातककक्षाः समापिताः। अधिस्नातककक्षास्वल्पीयांस एव छात्राः। अन्येष्वपि विद्यालयेष्वियमेव स्थितिः। रूसदेशे सेंट पीटर्सबर्ग (लेनिन ग्राडेति पूर्वनाम) स्थे विश्वविद्यालय एव संस्कृतस्याध्ययनाध्यापनादि प्रचलति नान्यत्र। संस्कृत-वैदुष्यस्य वैदेशिकेषु परिसरेषु यो ह्रासः परिदृश्यते तदुपरि गतेषु वर्षेषु विचारोऽपि सञ्जातः। संस्कृतवाङ्मयस्य दुन्दुभिध्वनिस्तु सर्वत्र श्रूयत एव। अमरीकायां संसदोऽधिवेशनं यदा प्रारभते तदा विश्वमानवस्य सर्वप्रथमाद् ग्रन्थाद् वेदघोषेण मङ्गलशासनं क्रियते इति पठितमेव वृत्तपत्रेषु। प्राचीनसंस्कृतेः प्रतीकरूपेण तु सर्वत्र संस्कृतं समान्यत एव। प्राचीनेतिहासस्य, भारतीयेतिहासस्य चाध्ययनाय संस्कृतं सस्कृतग्रन्था एव चैकमात्रं प्रमाणम्। इदमेव कारणं यदश्वमेधयज्ञस्य यशः श्रुत्वा पेरिसविश्वविद्यालयीयसंस्कृतप्राध्यापकेन जीनि एम. होबेन महोदयेन अश्वमेधविषये यदाऽनुसन्धानं कृतं तदा तेन ज्ञातं यज्जयपुरप्रतिष्ठापकेन सवाई जयसिंहेनाप्यश्वमेधःयागः कृतोऽभूत्। तस्य अश्वमेधस्य वर्णनं मत्पूर्वजेन देवर्षिश्रीकृष्ण-भट्टकविकलानिधिना "ईश्वरविलास" महाकाव्ये विहितमस्ति। होबेनमहोदयस्तदिदं ज्ञात्वा जयपुरे समागमत्, मामिमिलत्, ईश्वरविलासमध्यगीष्ट। सम्प्रति ईश्वरविलासस्य कियान् भागः पेरिषविश्वविद्यालये पाठ्यते यत्रायमध्यापकः। स्विट्जरलैंडेप्यसौ पाठ्यते यतोऽयं स्विट्जरलैंडवासी।

एवंविधान्युदाहरणानि त्वद्यावधि सर्वत्रैव स्युः किन्तु शनैः शनैः संस्कृतवैदुष्यस्य, संस्कृताध्यापनस्य चापचयो यथाऽनुभूयते तस्याऽनेकानि करणानि। अद्य भारतस्य राष्ट्रभाषा राजभाषा चाऽस्ति हिन्दी। सा हि सङ्ख्यावशाद् विश्वस्य तृतीया भाषाऽस्ति। द्वितीयाऽपि

भवितुं शक्नुते। तस्या अध्ययनाध्यापनं सर्वेषु देशेषु साग्रहं संभाव्यते एव। ऊनविंश्यां शताब्द्यां तस्या नाभूत् काचनाऽपि तादृशी स्थितिः। तस्य जननी संस्कृतमेवास्तीति कथान्तरं किन्तु हिन्द्या अध्ययनं भारतस्वातन्त्र्यानन्तरं सर्वेषु देशेषु प्रारभ्यत, समैध्यत चेति सुविदितमेव। तदप्येकं कारणं कथयितुं शक्यते। अपरं कारणं सुस्पष्टमेव। स्वयं भारतेऽपि कुत्र सन्ति तादृशा विद्वांसस्तादृश्यां संख्यायामद्य यथापूर्वमभूवन्। अतोऽस्मिन् कलियुगे देवगिरोऽस्या नामग्रहणं तु निश्चितमेव क्रियते तदुपर्यधिकारोऽल्पीयसामेव संभाव्यते।

भारते तु बहुभिः कारणै र्बहुसङ्कायीयविश्वविद्यालयेष्वपि संस्कृतविभागा विराजन्ते। पञ्चदशसंस्कृतविद्यालया अपि संस्कृतगिरः शास्त्राणामध्ययनाध्यापनाय प्रतिष्ठापिताः सन्ति, संस्कृतपत्रिकाः प्रकाश्यन्ते, ग्रन्था महत्यां सङ्ख्यायां प्रकाश्यन्ते। प्रत्यहं द्विः संस्कृतवार्ताः (समाचाराः) आकाशवाणीतो दूरदर्शनतश्च सकृत् प्रसार्यन्ते। "वार्तावली" शीर्षकवहं संस्कृतसमाचारचर्चादिप्रसारणं प्रतिसप्ताहं डी. डी. न्यूझतः क्रियते। इत्थं भारते तु बहुभिः कारणैः संस्कृतगिरः प्रसारोऽनवरतं परिदृश्यते। विदेशेषु दृष्टिपातः क्रियते चेत् नेपालरेडियोतः प्रत्यहं संस्कृतवृत्तपत्रं प्रसार्यते। शार्मण्यदेशात् 'बोन' रेडियोतः संस्कृतवृत्तपत्रं प्रसार्यते स्म, मन्ये तदद्यापि प्रचलति। संस्कृते (वेब) कंप्यूटरजाल) पत्राण्यपि भारतात् प्रवर्तन्ते, विदेशेष्वपि दृश्यन्तेऽनुस्रियन्ते च।

संस्कृतभाषां भारतस्य निधिं मन्वानाः सर्वेऽपि विद्वांसः, सर्वधर्मानुयायिनो मनीषिण एनां प्रति सुतरामात्मीयस्नेहभावनां बिभ्रति। कामं ते हिन्दवः स्युः महिम्मदाः स्युः, ख्रिस्तीयाः स्युः, वैदिकाः स्युः, जैनाः स्युः, बौद्धाः स्युः। इयमेव सार्वदैशिकता, सार्वधार्मिकता च संस्कृतभाषाया एनां विश्वजनीनां प्रख्यापयति। इयमेवास्ति श्रेयस्करी अद्य विश्वमानवीयाया एकताया युगे। "निःश्रेयसम्" सदृश्यः पत्रिकास्तथ्यस्यास्य प्रत्यक्षं निदर्शनानीति किमधिकं विस्तरेण।

❀ ❀ ❀

मृत्योः पश्चात् न जननं,
तदेव
परमात्मभवनम्।

# विभाग : २ अर्वाचीनकृतयः

## खण्ड : ५ नित्यशीर्षककृतयः

### चैतन्यप्रवाहः



।। आत्म प्रवादः ।।

श्रेयःसरित्

### जैनं जयति शासनम्...



।। विनयो शासने मूलम्... ।।

श्रेयःदर्शी

### नवं नवं सौन्दर्यम्...



प्रसन्नता पंथः प्रस्थानम्

श्रेयःदर्शी

### परमपदपन्थाः...



।। पञ्चविधः स्वाध्यायः ।।

श्रेयःपथिकः

### मधुरम् मधुरम्...



// चिन्तनम् //

श्रेयःपथिकः

### आत्मैश्वर्यप्राप्त्युपायः...



।। प्रज्ञापनीयताप्रबंधः ।।

श्रेयस्करः

### स्वादु-स्वादु शुद्धं-शुद्धं सुखावहं-शुभावहं



।। क्षमा ।।

श्रेयःश्रीः

### रहस्याऽऽस्वादः



।। अनुबन्धः ।।

श्रेयःसखा

### काव्यकौतुकम्...



।। काव्यरसास्वादः ।।

श्रेयःपद्मः

### वैविध्यम्



।। ज्ञानफलम् ।। ।। त्रिविधा प्रभुता ।।

श्रेयःसेतुः

### सांप्रतम्...



।। ज्ञानाशातना ।।

श्रेयःसद्मा

### वादः, न वितण्डावादः



।। सन्मेधा प्रागट्यम् ।।
(संवादः)

श्रेयःकान्तः

# चैतन्यप्रवाहः

- श्रेयःसरित्

भानो! किं चेष्टसे?

न किमपि स्वामिन् इति वदन् भानुः स्वामिनः पुरस्तात् स्थितः करबद्धः।

भानुः अवक्, स्वामिन्! भवान् कथं मां चेष्टसे इति अवक्। **घटयते चेष्टते इति घटः**, नाऽहं घटः? गृहपतिस्वामिनोक्तम् भानो! एतद् समीचीनं चिन्तितं त्वया। इयं शब्दव्युत्पत्तिः समस्ति यद् भवतोक्ता। शब्दव्युत्पत्तिस्तु शब्दमात्रस्य भवति, सा अन्यार्थेऽपि भवति। किन्तु यदि रूढ्यर्थक-पदार्थसंसूचकः शब्दो न भवेत् तदा। ततः शब्दधातूनां योऽभिप्रेतार्थः तं लक्षीकृत्य व्युत्पत्तिः संभवेद्, ततो न कोऽपि दोषः। ततः शब्दमात्रस्य स्वाभिप्रेतस्वभावजा व्युत्पत्तिः स्वीकरणीया इत्यय-माशयः। वास्तवतः सर्वपदार्थानां निर्माणकर्ता-उपयोगकर्ता च आत्मा एव यदि जगत्यात्मैव न भवेत् तदा सर्वेऽपि पदार्थाः निराधाराः निरुपयोगिनः संभवन्ति, इति ततः वास्तवेन तु चेष्टावान् स्वात्मा एव न त्वन्यत्।

अतएवोक्तम्-

आत्मानं यो जानाति, स सर्वं जानाति।

विना आत्मानं यः सर्वं जानाम्यहमिति वदति स न किमपि जानाति।

आत्मा =अतति तान् तान् पर्यायान्, पदार्थस्वभावान् प्राप्नोति-जानाति स आत्मा।

अथवा मीनातीति आत्मा।

अथवा आ=आसमन्तात्=सर्वतः,

त्=तनोति-विस्तारयति, मा=ज्ञानं। = सर्वतः ज्ञानं विस्तारयति स आत्मा इति।

भानो!

य आत्मविज्ञानपराङ्मुखः स सर्वसिद्धि-पराङ्मुख इति निर्धारणीयम्, यतः सोऽज्ञान-पङ्किलतया पशुप्रायः विवेकविकलत्वादिति। भानुः-स्वामिन्! आत्मा किं स्वरूपः? आत्मा किं जलरूपः?



|| आत्म प्रवादः ||

अथवा किं पृथ्वीरूपः? अग्निरूपः? यदुत वायुरूपः? अथवा आकाशरूपः आत्मा?, यतः आत्मा न दृश्यते इति निर्विवादं सत्यमस्ति। यदि भवतोक्तं आत्मैव जगति प्रमुखस्थानं भजति। तर्हि तस्य स्वरूपज्ञानं विना कथं तत् स्वीकरणीयम्? इति प्रश्नो मां बहुकालाद् पीडयति स्वामिन्!।

भानो! त्वया योग्यं पृष्टोऽहम्। आत्मनः स्वरूपं द्विविधं संभवति। आत्मा जलरूपोऽपि समस्ति, अजलोऽप्यऽस्ति। आत्मा पृथ्वीस्वरूपो-ऽप्यस्ति, अपृथ्वीभूतोऽप्यस्ति, वह्निवद् दहन-स्वभावो-ऽप्यस्ति। पुनरात्मा, अनग्निभूतोऽप्यस्ति। वायुसमवृत्ति-कोऽपि जीवः विद्यते पुनः अवायुस्वरुपोऽप्यस्ति। आकाशवद् जगन्मात्रमित्रमपि जीवोऽस्ति सर्वथा सर्वेषां वसतिप्रदायकत्वात्। पुनरनाकाशोऽपि चेति। भानुः अवक् स्वामिन्! कथंकारेणेदमाऽऽत्मस्वरूपम् घटामञ्चति?।

स्वामिना चोक्तम्।

श्रुणु वत्स! सावधानीभूय।

नमनयोग्यस्थाने नमनेनाऽऽत्मा जलरूपोऽपि भवति पुनरनमनस्थानेऽनमनेऽजलरूपोऽपि भवति। देह-धारणाऽपेक्षया काठिन्यभावधारकत्वादात्मा पृथ्वी-रूपोऽपि भवति। पुनश्चात्मपदार्थं लक्षीकृत्य विचारणायां तु आत्माऽकाठिन्यभावधारकत्वादऽपृथ्वीरूपोऽपि भवति। कर्मसंयोगे सति तापसंतापसंतप्तत्वात् वह्निसदृशो-ऽप्यात्मा भवति। कर्मनिर्मुक्तिसमया-पेक्षयाऽऽत्माऽवह्निरूपोऽपि भवति।

(अनुसंधान...९३ पृष्ठे)

# जैनं जयति शासनम्...

।। विनयो शासने मूलम्... ।।

- श्रेय:दर्शी

विनयगुण: जैनशासनस्य मूलमस्ति। विना विनयं गुणसमृद्धि: नाविर्भव।

प्रश्न: - कथं विनयो हि गुणाविर्भावकः कथित:?

उच्यते -विनीयते अष्टप्रकारं कर्म अनेन स विनय:। ततः।

* विनयेन विद्या शोभते।
* विनयेन मानदोषस्य हानि: भवति।
* विनयेन गुणसंपत्संतति: सततं समागच्छति।
* विनयेन सर्वगुणवल्लि: विकाशमादधाति।
* विनयेन गुणैश्वर्यं वर्धते।
* विनयेन बाह्याभ्यन्तरगुणसमृद्धे: संप्राप्ति: भवति।
* विनयेन नम्रतागुणाधानं भवति।
* विनयेन सर्वत्र प्रसिद्धि: भवति।
* विनयेन गुरुजनाकर्षणं भवति।
* विनयेन झटिति विद्यालाभो भवति।
* विनयेन सन्मानं वर्धते।
* विनयेन स्वशोभाया: पराकाष्ठा भवति।
* विनयेन मदो न जायते।
* विनयेन लघुता गुणः प्रभवति।
* विनयेन स्व-पर दोषानां निर्मूलनं भवति।
* किं बहुना? विनयेन किं किं न भवति?

अर्थात् सर्वसिद्धिस्तेनैव भवति।

।।इति शम्।।





# नवं नवं सौन्दर्यम्...

## प्रसन्नता पंथः प्रस्थानम्

राजन्!

मम केनाऽपि कारणेन प्रसन्नता मनसि नागच्छति?

विना प्रसन्नतां सुखानुभूति: मम न भवति। अस्ति किं भवत् पार्श्वे तदुपाय:?

मित्र! प्रसन्नतैव सुखमार्ग:। यदि सा नास्ति तदा धन-वैभव-पत्नी-परिवारादिभि: किं कर्तव्यम्?।

राजन्! उपाय: कोऽपि अस्ति नस्ति वा?।

मित्र! बाढं अस्ति। औषधत्रयं तत्र आसेवनीयम्। प्रथम स्वच्छत्वं, द्वितीयस्तु नैर्मलत्वं, तृतीयमार्जवम्। इति। पश्चात् अप्रसन्नता कदाऽपि नागच्छेत्।

**स्वच्छत्वं**=शुद्‌धि: मनसि प्रथमं स्थापनीया। अशुद्‌धिश्च निराकरणीया। यदि मनसि स्वच्छता, तर्हि न काऽपि चिन्ता। यदि मनसि शुद्‌धि: भवेत्, तदा मायाकरणेच्छा न संभविष्यति। मानाऽपमानौ भविष्यत: तदाऽपि स्वदोषगूहन-गुणप्रकाशनेच्छा न भविष्यति। ततस्तु सहजेन **निर्मलत्वं**=नैर्मल्यं स्वात्मसात् भविष्यति। निर्मलत्वं प्रभूतां प्रसन्नतामर्पयति। निर्मलतां प्राप्य जन: स्वपरयोः प्रसन्नतां जनयति। नैर्मल्यगुणेन आत्मनि **ऋजुता** प्रकटयति। ऋजुभावेन चात्मा स्वजननी-जनकगुर्वादिस्वोपकारिभि: सार्धं विनय-विवेक-नम्रतौचित्यसभर-व्यवहारेण प्रवर्त्तते। तस्य तत्र अकथनीयं किमपि न भवति। सदैव स्वहृदयतुच्छत्वं त्यजति। निर्मलभावमाद-धाति। यदाज्ञा मनसि वर्तते। तदा स सर्वदा प्रसन्नतापथि प्रस्थानं करोति, पुनः अन्यान् अपि कारयति।

।। इति शम् ।।

# परमपदपन्था:...

## ।। पञ्चविध: स्वाध्याय: ।।

**- श्रेय:पथिक:**

स्वस्य अध्याय: इति स्वाध्याय:। स्व=आत्मा। स्वस्य तस्य अध्याय:=विचार: चिन्तनं, मननं इति स्वाध्याय:। गुणप्राप्तिस्वरूप: अधिक: आय: इति अध्याय:। स्वस्य अध्याय: इति स्वाध्याय: अथवा स्वात्मनि आय:=गुणप्राप्तिस्वरुप: आय:, लाभ: स स्वाध्याय:। स पञ्चधा भणित:। **वाचना, पृच्छना परावर्तना, अनुप्रेक्षा, धर्मकथा** च। तत्र **वाचना**=गुरु सांनिध्ये सूत्र ग्रहणम्, **पृच्छना** गृहितसूत्रस्य समाधानार्थं पृच्छनम्, **परावर्तना**=पठितस्य सूत्रस्य पुन: पुन: स्मरणम्, **अनुप्रेक्षा**=पठितसूत्रे सति स्वात्मनि कथं दर्शितगुणा: भवन्ति इति स्वात्मदर्शनं, तद् आत्मन: अनु=पश्चात् प्रेक्षणं=दर्शनं सा=अनुप्रेक्षा, **धर्मकथा**=धर्मस्वरुपा, धर्मोजीवनाधार: धर्मात्मन: कथा चरित्रंयस्यां सा धर्मकथा।

एतादृश: स्वाध्याय: सर्वदा-सर्वथा साधुना कर्तव्य:। स स्वाध्याय: द्वादशविधतपस्सु अन्तर्भवति। तत: स्वाध्याय: तप:स्वरूपोऽस्ति। द्वादशविधेषु तपस्सु स्वाध्याय: प्रकारविशेष:। विना तप: साधु: न शोभते। विना तप: साधु: प्राणवियुक्तदेहसदृशो भवति। ततोयं स्वाध्याय: सदा कर्त्तव्य: भवति। अत एव साधूनामपरनाम तपस्वी इति सार्थकम्।

# मधुरम् मधुरम्...



## // चिन्तनम् //

चिन्तनेन चेतस: विशुद्धि: भवति। अत: पुन: पुन: चित्तचमत्कारकरं चिन्तनं कर्तव्यम्। जीवस्य जीवनाधार: चित्तम्, तत् स्वामी आत्मा। किन्तु साम्प्रतं चित्तं यदिच्छेत् तदेवाऽऽत्मा करोति। आत्मा चित्ताधीनोऽभवत्। यथाऽऽत्मा तस्य नवां नवां अयोग्येच्छां पूर्णीक करोति तथा तथा तद् आत्मानं स्वायत्तं करोति। चित्तं तु स्वेष्टकार्यसिद्ध्यर्थं स्वपञ्चेन्द्रियदासीभ्य: कार्यमर्पयति। स्वप्रभुत्वं चात्मनि स्थापयति। यदुत आत्मा स्वामी अस्ति, तथाऽपि स्वकिङ्करस्य चित्तस्य दासी: संपृच्छय स्वकार्यं साधयति। जीव: स्वामी भूत्वाऽपि स्वस्वभावानुसारं कार्य करणेऽक्षमो भवति। तत: एवं सञ्जातमस्मदात्मा स्वकिङ्करस्य सेविका: या पञ्चेन्द्रियस्वरुपा:। तासां सेवको भूत्वा ता: संपृच्छ्य स्वकार्यं साधयति, तत्तु नाऽऽत्मन: शोभास्पदं, तत् स्वात्मन: कलङ्कभूतमिति स्वचेतसा विचार्यम्। चिन्तनीयं पुनश्च स्वेष्टकार्यसाधनाय, स्वस्मिन्-स्वात्मप्रभुता स्थापनीया, पुनश्चान्तररिपुषु स्वाज्ञा स्थाप्या च।

## ।। आत्म प्रवाद: ।।

(क्रमश: ९१ पृष्ठत:)

त्वात्। पुनरात्माऽन्यान्यगतिषु गच्छति, तदा वायुरूप:, यदा एकत्रैव तिष्ठति, निर्गन्तुमना अपि न निर्गच्छति, तत्रैव गतिषु कर्मभि: बद्धत्वात् तिष्ठति तदा त्वात्माऽवायुसदृशो भवति स तु आत्मा पुन: कर्मपरतन्त्रतया न तादृशो भवति। यत: वायु: सर्वत्राऽप्रतिबद्धोऽस्ति, द्रव्येण न बध्नाति, सहजैतादृग्-स्वभावत्वात् तदा तु आत्मा भवत्यवायुसदृश: पुनश्चाऽऽकाशस्वरूपोऽपि भवत्यात्मा, धर्मप्राप्त्यनन्तरं सर्वजीवराशिना सह मैत्रीं प्राप्त:, सुविस्तृत-विशाल-गंभीर-हृदयधारक:, आत्मा तु आकाशववद्विशालो भवति, तदा आत्मा आकाशभूतो भवति। पुनश्च निराकाशो कर्मपारतन्त्र्येण यदा जीव: क्षुद्रो भवति तदा।

इत्येवं भानो! मया संक्षेपेण वर्णितमाऽऽत्म-स्वरुपम्। आत्मा तु स्वभावेन क्षमावानऽस्ति। वैराग्यवानऽस्ति। स्वात्मजनितसुखेषु संस्थित:। स हि आत्मा स्वस्वभावरममाण: सुखी इति उच्यते अन्यथा तु विभावभ्रमभवनेन दु:खी भवति। अथावसरेऽहं विभावदशाया निरूपणं करिष्ये।

।। इति शम् ।।



# आत्मैश्वर्यप्राप्त्युपायः...

।। प्रज्ञापनीयताप्रबंधः ।।

- श्रेयस्करः

प्रज्ञापनीयता=प्रकर्षेण ज्ञापनीयः, तस्य भावः, यं सरलतया प्रज्ञापयितुं शक्यः-स प्रज्ञापनीयः। गुर्वादि-कथितस्वीकरणयोग्यता सा प्रज्ञापनीयता।

प्रज्ञापनीयतागुणप्राप्तौ आत्मैश्वर्यप्राप्तिः सफला-सहजा-सरला भवति।

प्रज्ञापनीयताप्राप्तिकरणोद्यतस्य जीवस्य आत्मैश्वर्यलाभः कथं भवेत्। तत् पुनः पुनः शोचनीयम्, ऐश्वर्यप्राप्त्युपायस्तु पुनः पुनः सेवनीय, आदरणीयश्च।

प्रज्ञापनीयताप्राप्तौ पञ्च उपायाः सन्ति।

१. **सरलता** - सरलतयैव प्रज्ञापनीयता प्राप्यते यदा गुरुजनादिना शिक्षणं-कथनं सुगमरीत्या स्वीक्रियते सा सरलता।

२. **स्वीकारपरता** - सरलतागुणप्रभावेन गुरुजनाद्युपदेशस्य स्वीकारपरायणता भवति। गुरुजना यद् यद् कथयन्ति, तद् तद् सर्वं स स्वीकरोति, तदा तु प्रज्ञापनीयता सुलभा भवति।

३. **शुद्धचित्तता** - उपदेशस्वीकारोपि शुद्धचित्ततां विना न भवति। तत् तद् विषयादिषु पराङ्मुखता हि शुद्धचित्तताजननी, ततः शुद्धचित्तता प्रज्ञापनीयताप्राप्तौ त्वनिवार्यैव।






४. **स्वात्माऽपरिवञ्चना** - अपरिवञ्चनं तु गुणप्राप्तिषु स्वयं मुख्यभागं भजति, चितशुद्धितया, **जनः स्वात्मानं** कदाऽपि न परिवञ्चयतीति परिवञ्चनं=स्व-परविप्रतारणं=स्वस्थितमशुभं भावं छादयित्वाऽन्यद्भावचप्रदर्शतं। सा स्वात्मापरिवञ्चना।

५. **अशठता** - परवञ्चना त्यागशठता सर्वथाऽशठभावं विना जीवेषु गुणोद्भवः न संभवति, ततः सर्वत्राऽशठभावस्य पुनः पुनः आवश्यकता इति प्रज्ञापनीयतागुणप्रबन्धः।

# स्वादु-स्वादु शुद्धं-शुद्धं सुखावहं-शुभावहं ॥

- श्रेयःश्रीः

## - कोहो पीइं पणासेइ।

क्रोधः पुरातनां प्रीतिं प्रणाशयति। ततः न क्रोधः कर्तव्यः, तस्य विपाकः चिन्तनीयः ततः क्रोधविजयो भविष्यति। प्रचुरं दुःखं, दोषं, दुर्गतिं च दुरितं ददाति ततः ''क्रोधं मा कुरु क्षमां कुरु'' इति वाक् हृदयस्था कर्तव्या क्रोधस्य प्रभूतदोषाः ग्रन्थन्तरेषु वर्णिताः सन्ति। ततः क्रोधो महान् शत्रुरिति पुनः पुनः निभालनीयम्।

## - माणो विनयनासणो।

मानो विनयगुणध्वंसी, ततः मनसि मानस्य प्रवेशोऽपि न दातव्यो, यदि प्रवेशोऽपि भवति तदा मानो महालुण्टाकः सर्वमात्मधनं विलुम्पति, ततो मानः सर्वथा त्याज्यः। मानः= अहंकारः गर्वः इति पर्यायाभिहितः, सज्जनेन स्वात्मना स्वायत्ती कृत्य झटिति विसर्जनीयः।

## - माया मित्ताणि नाशेइ।

माया=परवञ्चना, मापया स्वात्मनि अन्यभावः तथाऽपि बहिरन्यभावं प्रख्यापयति जीवः, पुनःपुनश्च निदर्शयति। सा माया यदि न निगृहीता, तदा सा सर्वत्र क्षतयः समुत्यादयति। यदि सा कदाचित् गाढमित्रेऽपि ज्ञास्यत, तदा तैः सार्धं मित्रता नष्टा एव इति शोचनीयम्।

## - लोहो सव्वविणासणो।

लोभः सर्वविनाशनहेतुः ततः सर्वथा इच्छामात्रस्य नियन्त्रणं कर्तव्यम्, इच्छा लोभः अभिकाङ्क्षा, इच्छामात्रनिरोधः लोभनिरोधो भवति। लोभेन तु सर्व विनाशो दृष्टः ज्ञानचक्षुभिः जिनवरैः। तत स सर्वथा विजेतव्यः।



# क्षमा

॥ क्ष ॥

क्षम : = समर्थः, कस्मिन्?
सहनकरणे-इति
न
तु
परां प्रति प्रतिक्षेपने।
परे
कदाचिदाक्षिपन्ति।
तदाऽपि यदात्मा न विह्वली-
भवति-इति।
परः क्रोधादिवशेन कीदृशमऽपि
आचारं समाचरेत्। तदाऽपि
तदोपरि तितिक्षाभावः संसेव्यः।
इति क्ष-शब्दार्थः।

॥ मा ॥

मा = ज्ञानं, पूर्वोक्तं
सहनकरणोद्यतमतिपारगामिता,
येन ज्ञानेन स्वसामर्थ्यं प्रकटीभवति।
तज् ज्ञानं।
ज्ञानं तु किं स्वरूपम्?
स्वात्मस्वभावरमणस्वरूपमस्ति।
यद्-ममाऽयं स्वभावः यद्
परेषां सर्वं सहनीयम्'', तदैव स्वात्मस्वभावः
प्रकटिष्यते।
॥ इति शम् ॥

# रहस्याऽऽस्वादः



- श्रेयःसखा

## ।। अनुबन्धः ।।

सर्वं शुभकार्यं सावधानमनसा सानुबन्धं कर्तव्यम् इति शास्त्रोपदेशः।

ननु-अनुबन्धः किं स्वरूपः ?

आह-अनुबन्धः कर्मबन्धस्य पश्चाद् यः भवति सः। यथाहि-

दान-शीलादि सत्कार्यं जीवो यदा करोति तदा जीवः शुभकर्मबन्धं करोति तत्पश्चात्तु जीवः तत् कार्यं भावशीलहृदयतया यदि पुनः पुनः संस्मरति। ''यत् सुष्ठु कृतं मया'' ''सुष्ठु कृतं मया'', देव-गुरु-धर्मप्रभावेण मया सुन्दरं अनुष्ठितम्। इत्येवं यद् अनुमोदनं तत् अनुबन्धः इत्युच्यते।

अल्पतरकृतमऽपि तपः पश्चात् कृतानुमोदनेन, पुनः पुनः संस्मरणेन, तत् तपः महाफलप्रापकं भवति। अल्पतरकृतः त्यागः, पश्चात् कृतानुमोदनेन, स बृहत्तरफलप्रापको भवति। ततः बन्धादनुबन्धः प्रभूततरः फलदः भवति। यतः सत्कार्यं कृत्वा पश्चाद् येन शुभभावेन अनुमोदनं कृतं, तेन या स्वात्मविशुद्धिः भवति, सा प्रभूततरकर्मनिर्जराहेतुत्वात् विशिष्टकर्मनिर्जराहेतूतया महत्तमोऽनुबन्धः कथितः।

अपितु जीवानां स्वभावो यदशुभकार्यं कृत्वा पश्चात् पुनः पुनः तदनुमोदयति। स्वस्मिन् प्रहर्षं वहति। पुनः पुनः वदति च 'सुन्दरं चेष्टितं जातम् इत्यादयः। तेन चानुमोदनेन जीवोऽशुभानुबन्धस्वरूपं दुष्टकर्म बध्नाति।

यदि तु जीवोऽशुभकार्यं कृत्वाऽपि यदि पश्चाद् सखेदो भवति, तदाऽपि स बन्धः सहजनिर्जरः भविष्यति। यत्तु पूर्वम् अशुभकर्मबन्धः कृतः, तस्यापि फलमल्पीकरोति। विपाकरहितमल्पविपाकं वा भवति। इत्येवमनुबन्धः प्ररूपितो भगवता, यथा सङ्गमेन वृद्ध-विधवाऽऽभीरीपुत्रेण एकवारं सद्गुरोः पायसमर्पयित्वा पश्चात्तु पुनः पुनः अनुमोदनं कृत्वा शुभातिशुभकर्मोपार्जनेन राजगृहनगरे नगरश्रेष्ठि गोभद्रश्रेष्ठिगृहे शालिभद्ररुपेण जन्म प्राप।

तद्वदस्माभिरपि पुनः पुनः शुभानुबन्धसञ्चयः कर्तव्यः।

।। इति शम् ।।

# काव्यकौतुकम्...

## काव्यरसास्वादः

- श्रेयःपद्मः

### इन्द्रवज्रा

कल्याणमार्गैकविचारसारम्,
दुर्वारमोहादिविमुक्तिकारम्।
माङ्गल्यलीलाकृतभावसारम्;
**निःश्रेयसं** सद्गुणश्रेणिधारम् ।।१।।

### विद्युन्माला

नव्यैः काव्यैः, दत्तामोदम्,
शुभ्रैः बोधैः, ध्वस्तक्रोधम्।
लेखै र्नष्टाऽज्ञानाऽनीकं;
तस्मात् **श्रेयः** सद्यः स्याताम् ।।२।।

### वसंततिलका

भक्त्या नताः सुमनसः, शुभभावतो यं,
यः पूजितश्च मनुजैः, सुमनोऽधिपैश्च।
**निःश्रेयसं** नृपतिवासवमेत्य तं भोः!,
वर्धापयस्व बहुमुक्तककाव्यपुष्पैः ।।३।।

### शार्दूलविक्रिडीतम्

येन स्याद् गुणराशिवासितमतिः सद्ध्यानस्वस्थाशया,
प्रज्ञा प्राज्ञमनोहराऽतिविमला, यत् संस्तवात् संभवेत्।
सत् पुण्या प्रतिभा परा परमदा, यत् सेवया स्यादरम्,
तन्नि**ःश्रेयस**दर्शनाय नयने, सोत्कण्ठिते स्तः सदा ।।४।।

### स्रग्धरा

नित्यं चेतो विंशुद्धि, र्भवति शुभतरा, तीव्रसंवेगसारा,
मिथ्याभावो निरस्तः, स्वगुणगणहरो, यस्य सद्वाचनेन।
सर्वे ये ये प्रमादा, मनसि न विलसेत्, यस्य दिग्दर्शनेन,
पत्रं **निःश्रेयसाह्वं**, पठतु पठतु सदा, मित्रवृन्दोऽतिप्रीत्या ।।५।।



### अनुष्टुप्

सम्यग्ज्ञानसुधासारं, मिथ्याभावविदारकम्।
**निःश्रेयस**पदं नित्यं, स्मरेदं भावशुद्धितः ।।६।।

### उपेन्द्रवज्रा

सदाचिदानन्दपदोपयुक्तम्,
प्रशस्यसद्भावसमूहपूतम्।
दूष्पापतापैकहरायचूतम्,
तं स्तौमि **निःश्रेयस**पद्मपत्रम्।।७।।

### उपजातिः

सर्वत्रसिद्धिं लभते सुखेन,
सर्वत्रकीर्तिं विलसेच्चनित्यम्।
सर्वस्य प्रीतिं सुखदा यतस्तं
**निःश्रेयसा**ह्वं पठ मित्र! पत्रम् ।।८।।

### द्रुतविलम्बितम्

विततपुण्यविकाशविलासजम्,
विकटकोटिभवार्जितपापकम्।
विषयवासितभावजकर्महृत्;
कृतमहो! भविना निज**श्रेयसम्**।।९।।

### स्वागता

एतदेव भवभैरववारम्,
एतदेव गुणसौरभसारम्।
एतदेव शुभपुण्यविचारम्;
एतदेव सुखसाधन**श्रेयः**।।१०।।

# वैविध्यम्

## ज्ञानफलम्

**- श्रेयःसेतुः**

दिनकरकिरणसन्दोहेन नश्यत्येव तमः। इति सर्वविदितम्। न तु नवीनं। तद्वत् आत्मापि ज्ञानालम्बनं संप्राप्याज्ञानजनवत् चेष्टां न करोति। यतः ज्ञानं पथदर्शकं, न कदाचित् कोऽपि गर्तां दृष्ट्वा पतति तत्र, यदि ज्ञानप्रागट्यं सत्यं भवेत् तर्हि कुत्र गन्तव्यम्?, कुत्र न गन्तव्यम्? किं कर्तव्यम्? किं न कर्तव्यम्? कीदृक् वर्तितव्यम्? कीदृक् न वर्तितव्यम्? केन सह गन्तव्यम्- केन सह न गन्तव्यम्? किं गर्हितव्यम्? किं न गर्हितव्यम्? किं देयम्? किं न देयम्? किं पेयम्? किं न पेयम्, कुत्र स्थातव्यम्? कुत्र न स्थातव्यम्? कुत्र वस्तव्यम्? कुत्र न वस्तव्यम्? इत्यादिः बोधः प्रतिजागर्ति। तथा च कार्यकरणे कदाचिदऽपि दुःखापत्तिः न, न च दुःखपरंपरा संभवति। ततः सर्वत्र विवेकप्रदं ज्ञानं, ज्ञानं हि जीवनं दृढतरं रचयति। दोषमुक्तिं च प्रदते। ततः ज्ञानमेव समुत्पाद्यम्।

विना उत्पादनं न फलं प्राप्नोति जीवः। यथाऽऽम्रबीजं न रोपयति तदा नाऽम्रफलं प्राप्नोति, तद्वद्न ज्ञानं विना ज्ञानफलमनुभवति जीवः।

फलप्राप्तेरानन्दो येनानुभूयते, सो वचोतिगः। न कनापिवर्ण्यते। तं सैव जानाति। निर्मलता जायते। शुद्धिः प्रसरति। विशुद्धिः स्वस्थानं करोति परिणतिः स्वात्मसाद् भवति। ततः ज्ञानस्य फल प्राप्त्युपायः पुन पुनरासेवनीयः।

## त्रिविधा प्रभुता

प्रभुः, स्वामी, नायकः, नाथः एते पर्यायाः। प्रभौ प्रभुता वर्तते। यदि प्रभुता भवेद् किन्तु तत्र यदि गुणाः न सन्ति तदा किं कर्तव्यम्। प्र=प्रकर्षेण भु=भवनं कार्यसंपादनं यत्र भवति स प्रभुः, तस्य यद् यद् कार्यकरणक्षमत्वं सा प्रभुता।

सा त्रिविधा मता आज्ञैश्वर्यत्वं, योगक्षेमकारित्वं, पराकर्षणस्वभावत्वं च । तत्र प्रथमा या आज्ञा=स्वामिनिर्देशः, तद्कारयितुं समर्थता=ऐश्वर्यम्। तद् आज्ञैश्वर्यं तस्य भावः आज्ञेश्वर्यत्वं। सा स्व-परहिताहित-प्रवृत्तिनिर्वृत्तिस्वरुपा भवेत् तर्हि सत्यप्रभुता भवति। अन्यथा तु नाममात्रेण प्रभुता न तु सत्यप्रभुता। सत्यप्रभुताप्रापकानां हि स्वाज्ञाकरणसक्षमो जनसमूहो भवति।

द्वितीया पुनः योगक्षेमकारित्व तत्र तु स्वाश्रितजनं प्रत्ययोगप्राप्तस्य गुणस्य योगं कारयित्वा, पुनः योगप्राप्तस्य गुणस्य च क्षेमं=रक्षणं करोति सा द्वितीयम् योगक्षेम कारित्वम्।

तृतीया तु पराकर्षणस्वभावत्त्वं सा तु विलक्षणीभूता। या स्वस्वभावेन प्रभावेन वा पराकर्षणं करोति। यदि प्रभुतावान् स्वप्रभावेन परान् प्रभावभृतो न करोति। परान्नाकर्षयितुं न समर्थो भवति। तदा तत्प्रभुता नष्टप्राया जाता, यदि पराकर्षणं भवति तदा प्रभुरपि स्वकार्यकरणोद्यतताया: प्रागट्यं कर्तुं समर्थो भवति। ततः सा विलक्षणीभूता इति। अस्याः प्रभुतामङ्प्राप्तिः पुण्यप्रकर्षं विना न भवति।

इत्येवं प्रभुतास्वरूपं संज्ञाप्य स्वकार्यकरणोद्यतवता भाव्यम्।

# सांप्रतम्...

## ज्ञानाशातना

- श्रेयःसद्मा

श्री सुधर्मास्वामि जैन ज्ञानभंडार
C/o. विमुक्ति विश्व विद्यालय
हिराजैन सोसायटी के पास, रामनगर,
साबरमती, अहमदाबाद - 380005
फोन नं.:-(079) 55220409

सांप्रतं इति शीर्षकं समाश्रित्य निःश्रेयस्य प्रत्यङ्के निःश्रेयसाय नवं नवं विषयमवलोकितुमिच्छा वर्तते।

तत्र तु प्रथमं ज्ञानाशातनाविषयगृहितोऽस्माभिः, तत्र प्रभूततरः वक्तव्येच्छाऽस्ति, यतः तत्र प्रभूततरं वक्तव्यमस्ति। प्रथमं तावत् ज्ञानं किं स्वरूपं तत्तु दृष्टव्यम्। ज्ञानमात्मस्वभावस्वरूपमस्ति। आत्मानो लक्षणेष्वपि प्रथमं तावद् ज्ञानमेवास्ति।

आत्मनः लक्षणानि अष्टौ सन्ति। तत्राऽपि मुख्यतया प्रथमस्थितिकं ज्ञानमेवाऽस्ति। यथा सर्वसङ्गत्यागिनः साधूनामप्युक्तं यत् दशवैकालिकसूत्रे–

'यो जीवं न जानाति, योऽजीवं न जानाति, यो जीवाऽजीवं न जानाति, स जानाति कथं संयमम्'। ततः सर्वेषु गुणेषु ज्ञानमेव प्रधानम्। बाल्येऽपि महत्त्वपूर्णं ज्ञानम्, यौवनेऽपि विना ज्ञानं न साफल्यं, प्रौढावस्थायामऽपि ज्ञानं विना गृहं कथं चालयिष्यति। वृद्धावस्थायामपि सा अवस्था कथं व्यतीयते इति ज्ञानं महत्वपूर्णं, ततः यदि तत् तद् वयसि तद् तद् प्रायोग्यं ज्ञानं यदि न संपादयिष्यते तदा साऽऽवस्था सुखं सुखेन न व्यतीयेते। ततः ज्ञानं आत्मनि मौलिकतामापादयति। वस्त्रनिर्मापने, वस्त्रक्रये, वस्त्रविक्रये, वस्त्रपरिधाने, भोजननिर्माणे, संपादने, स्वादने, वस्त्रादीनां परिधापने ज्ञानमेव प्रधानम्।

सांसारिकाऽऽध्यात्मिकयोगरूपसर्वावस्थाषु ज्ञानमेव प्रधानभावं भजति। विना ज्ञानं न किमपि चलति जीवस्य। ज्ञानेनैव च

जीवाऽजीवानां विभेदनमस्ति।

यदि जडपदार्थे ज्ञानमस्ति, तदा जीवस्य किं वैशिष्ट्यम्?

यदि जीवेषु ज्ञानं न भवति तदा अजीवात् जीवस्य का विलक्षणता? इति शोचनीयः प्रश्नः। ततः आत्मनः सहचारि प्रथमगुणः ज्ञानमेव इति स्थितम्।

तद् ज्ञानस्य आशातना=खण्डनं तद् ज्ञानाशातना। आ समन्तात् शातयति पातयति, खण्डयति आत्मनः गुणान् सा आशातना। इत्येवं प्रकारेणाशातनाशब्दस्य व्युत्पत्त्यर्थः।

सांप्रतकाले ज्ञानोपासना न विपुला, किन्तु ज्ञानाशातना विपुलतरा भवति, शास्त्रेषु पुनः ज्ञानाशातना चतुर्दशभेदेन वर्णिता।

ननु शिष्यः वदति–ज्ञानस्य कोऽर्थः?

ज्ञानेन तु एव चिन्ता भवति यदि अज्ञानः तदा न काचिद् चिन्ता भवति?। ततः अज्ञानं श्रेयस्करं ज्ञानेन च चिन्ता

भारो हि वर्धते। यदि पय:कुंडे विषमस्ति? इति संज्ञाते मन:विह्वलता भविष्यति, यदि ज्ञानं न भवति, तदा नरो विना चिन्तां पिबति प्रभूततरं पय:। तद् रसमास्वादयति, दधाति चाऽऽनन्दातिरेकमिति? ततः ज्ञानस्य किं साफल्यं? सुष्ठतर: भवतां प्रश्न:।

अत्र निर्वचनयति-यदि संज्ञाते चिन्ता, तदा असंज्ञाते तु महती चिन्ता भवेत्, यतो यदि प्रथमं तावत् तद् पयः भवता पीतं, पश्चात् तु ज्ञानं सञ्जातं तदा भवान् किं करिष्यसे? अधुना का चिन्ता? मया पीतं, यद् भाव्यं तद् भविष्यतीति न, इत्येवं जीवो न शोचति। तदा किं वा शोचिष्यति? तदा तु यदा ज्ञानं प्राप्तं, इदं इदं स्वरुपं इत्येवं प्रकारं विषमत्रक्षिप्तं, तेन सञ्जातमिदं पयः इति ज्ञात्वा तदैव स वदति सुष्ठु जातं मम संज्ञानं प्राप्तं। पुनश्चाधुना झटिति तत्प्रतिकारकरणसमर्थमुपायं स निभालयति। प्रतिकारं मार्गयति। तच्चिकित्साकरं प्रेक्षते। यथातथं तं वदति। विषदोषं च निष्काषयितुं प्रयत्नातिशयं करोति। अज्ञाने तु मरणशरणं भवति। तत: ज्ञानं फलसाधकम्।

अज्ञानं खलु स्वात्मनि जडतां निर्मापयति, ज्ञानं त्वात्मनि चैतन्यं सृजति। तत एवोक्तम्-''ज्ञानी श्वासोश्वासैः कठिनकर्म क्षपयति।'' तत: ज्ञानमेव महोपकारकारणं जीवोपयोगित्वाद् जीवस्वभाववत्वाच्च।

तद् ज्ञानं द्विभेदम्।

प्रत्यक्षं परोक्षंचेति। आत्मा स्वयं यद् जानोति तद् प्रत्यक्षं, किन्तु आत्मा स्वपरोपाधिना जानाति तदा तद् परोक्षं। तत्र प्रत्यक्षं अवधिर्-मन:पर्यवः कैवल्यं। तत्तु साक्षादात्मा स्वयमनुभवति । परोक्षं तु इन्द्रिय-मनो निमित्तं यत् ज्ञानं जीवः करोतीतितत्। तत्तु मतिश्रुते स्तः।

ततः ज्ञानं महत्वपूर्णं जीवाङ्गभूतम्। यथा धनेन धनं तद्वत् ज्ञानेन ज्ञानं वर्धते यद्यपि आत्मन: महत्वपूर्णगुणं ज्ञानं तथाऽपि साम्प्रतं सर्वेऽपि जना: आत्मज्ञानं परित्यज्य जडपुद्गलास्तिकायादिषु स्वोन्नतिकरं परिकल्पयन्ति। सा तु स्पष्टतया मूर्खता। सांप्रतं तु ज्ञानोपासना नहिवत् सञ्जाता, पुनश्च ज्ञानाशातना प्रभूततरां वृद्धिं प्राप्ता, तथाहि-

भोजनं ज्ञानसाधनोपरि ।
उपवेशनं ज्ञानसाधनोपरि ।
निषिदनं ज्ञानसाधनोपरि ।
अर्पणं ज्ञानसाधनोपरि ।
ग्रहणं ज्ञानसाधनोपरि ।

सर्वपदार्थे लेखनम् ।
सर्वनिर्माणे लेखनम् ।
सर्वस्थाने लेखनम् ।
अशुचिस्थाने लेखनम् ।
विना लेखनं न प्राप्नोति पदार्थः ।

सर्वाणि पदार्थजातानि ज्ञानसंयुक्तानि भवन्ति।

वस्त्राणि ज्ञानसंयुक्तानि।

भोजनभाण्डानि ज्ञानसंयुक्तानि। ततस्तु

पुन: पुन: अभिनवप्रकारेण ज्ञानविराधना वर्धिता, पुनश्च ज्ञानाराधना स्थगिता, भोजन समये ज्ञानस्पर्शोऽपि ज्ञानाशातना हेतु:।

लघुनीति-वडीनीतिकार्यमपि विना ज्ञानस्पर्शेण कर्तव्यम्।

ज्ञानविराधनया जीवः बधिर:, मूक:, अस्पष्टजिह्व:, खञ्ज:, पङ्गु:, रोगी, स्वल्पद्रव्य:, पराधीन:, अल्पायु:, निर्धन: भवति। ज्ञानाराधनेन तत: विपरीतं भवति।

सम्यग्ज्ञानसंपादनं, सम्यग्ज्ञानाराधनं, सम्यग्ज्ञानविराधनाहरणं इति त्रिविधं कार्यं यदि संभवेत् तदा स्वायत्तं शुद्धधं ज्ञानं संभवति।

# वादः, न वितण्डावादः

|| सन्मेधा प्रागट्यम् ||

(संवादः )

- श्रेयःकान्तः

| | | | |
|---|---|---|---|
| **पात्रम्–** | गृहपतिः | – | लालनः |
| | माता | – | अप्सरा |
| | पुत्रः | – | मनीषः |
| | भ्राता | – | मुकेशः |
| | परिचारकः | – | आनन्दः |
| | पुत्री | – | मनीषा |
| | लघुपुत्री | – | मदुरा |
| | जगद्देवः | – | शङ्करः–विष्णु |
| | देवाधिदेवः | – | अर्हन् |
| | साधुः | – | रामलालः |

**प्रथमं दृश्यम्**– पटावरणं निराकृतम्।

प्रकटः मुकेशः। स्वयं एककः एव रमते। किञ्चिद् वेलानन्तरं पाठशालातः समागतः मनीषः। गतौ तौ क्रीडाङ्गणे क्रीडार्थम्।

पृष्टो मनीषेण मुकेशः–कथमद्यः त्वं पाठशालायां नाऽऽगतः ?

मुकेशेनोक्तम्–किं ? न स्मरसि ? अद्यः परमेश्वरस्य पूजाऽभवत्।

मनीषेणोक्तम्–परमेश्वरस्य ?

ओम्...ओम्....परमेश्वरस्य इति मुकेशेनोक्तम्।

परमेश्वर नाम किम् ?

इति पृष्टं मनीषेण।

मुकेशः– अरे!..., परमेश्वरः नाम

परमं ऐश्वर्यं येन प्राप्तं स परमेश्वरः।

मनीषेणोक्तम्–परमेश्वरत्वम् केन प्राप्तम् ?

मुकेशः–परमेश्वरत्वं शङ्करेण, ब्रह्मणा, विष्णुना प्राप्तं, किं न जानासि त्वम् ?

परमेश्वरस्य पञ्चप्रकृतिः प्रसिद्धा, कदाचित् षष्ठी अपि भवति।
तस्य परमेश्वरस्य प्रथमा–तावत् जगज्जन्तुषु कारुण्यभाव कर–
त्रिजगत्निर्मापितं तेन ।
द्वितीयं पुनः– एकोऽपि भूत्वा स तिष्ठति सर्वत्र।
तृतीयं पुनः सर्वभोक्ता।
चतुर्थं पुनः सर्वसंहर्ता।
पञ्चमं पुनः निर्वाणपथं गत्वा परिनिर्वाताऽवस्था प्रापकः।
पुनश्च कदाचित् निर्माणेच्छा भवति तदा पुनः कृपालुः स समागच्छति।
यदि ईदृशमपि न त्वं जानासि तदा त्वं मूर्खेषु प्रथमः।
इत्येवं प्रजल्पन सति मनीषस्य बृहत्तराभगिनी पृष्ठतः स्थित्वा सर्वमश्रुणोत्।
किं वदति मुकेशः इति चिन्तयित्वा स्थितवती सा।
मनीषस्तु शोचति। मात्रा देवस्वरुपं पाठित, किन्तु नैतादृक्–
स्वरुपं परमेश्वरे मया ज्ञातम्।
यदा तु स्थगितः मुकेशः, तदा मनीषः किमपि वक्तुं प्रयत्नातिशयं करोति,
तदैव मनीषभगिनी अन्तरा वदति, असमीचीनं असमीचीनमिदं सर्वमज्ञानविलसितम्।
तत् श्रुत्वा मुकेशः क्रोधाद् वदति।
कथं कथमज्ञानविलसितम्? कथं वाऽसमीचीनम्?
इदं सर्वं मां त्वत् पितृव्येन मज्जनकेन चैव कथितं, तेनैव चाऽहं पाठितः।
कल्ये महाभारतपारायणेऽपि जोषीरामलालेन साधुनाऽपीदमेव पठितमस्ति।
तदा कथं त्वं ईदृशं वदसि?
तदैव मात्रा भोजनार्थ माहूतास्सर्वेऽपि गताः भोजनाय।
द्वितीयं–दृश्यं–
(पटाच्छादनं सञ्जातम्। गृहदृश्यम्)

समागतः गृहपतिः इति ज्ञात्वा उष्णजलव्यग्रहस्ता समागता स्वसौधाङ्गणे अप्सरा। स्नापितौ पादौ गृहपतेः, प्रसृता च गृहे निरवशान्तिः। पूर्वसंस्थापिते भोजनासने च सुखंसुखेन स्वस्थानमङ्गीकृतम् गृहपतिना। प्रथमं तावत् पृच्छति गृहपतिः–सर्वेषां भोजनं सञ्जातम् नवा? इति। पुनः गृहपतिना लालनेन, किं मनीषेन 'इत्यादिना नामग्रहणेनापि पृच्छा कृता। तत्पश्चाच्च स्वस्थचेतसा भोजनं कृत्वा मन्त्राणाखण्डे समागतः।

तदैव मनीषादयः सकोलाहलेन समागताः।
पृच्छतु पृच्छतु एवं वदन् सर्वप्रथमः प्रविष्टः मनीषः। मनीषेण सह पश्चात्तु लघुभगिनी मदुरा प्रविष्टा।
तत्पश्चात् मुकेशः प्रविष्टः।
यावत् किञ्चित् शोचति तावता।
सर्वेऽपि यथाऽऽसनेषु उपविष्टाः।
गृहपतिना मृदुस्वरेण प्रोक्तम्।
कथं बालाः? यूयं कलकलं कुरुध्वं। एकत्र संमील्य प्रीत्या सार्धं रमध्वं, तिष्ठथ,

विलसथ न तु विवादं=विकारोद्भूतं वादं, विवादं कुरुथ।

मनीषयोक्तम्-वयं न कलहं कुर्मः। वयं तु तत्त्वनिर्णयं कुर्मः।

विना तत्त्वं न भवोच्छेदं भविष्यति।

तत्त्वं हि नृणां जीवनम्।

तत्त्वं हि नृणां जीवनरहस्यम्।

तत्त्वं हि नृणां जीवनसाफल्यम्।

विना तत्त्वं तु नृणां जीवनं पशुतुल्यं भवति।

ततस्तत्त्वं निर्णेतुं भवद्भिः माध्यस्थ्यं कार्यम्।

अस्माकं सर्वेषां भवदुपरि पूर्णतया विश्वासोऽस्ति। ततः कारणादेवाऽस्माकं भवत्समीपागमनम्।

अस्माकं तु परमेश्वरस्वरूपस्य विषये चर्चा प्रचलति।

मुकेशः कथयति-परमेश्वरस्य पञ्चधा स्वभावः।

१. कारुण्यभावतः जगन्निर्माता।

२. तस्य सर्वत्रावस्थितिः।

३. भोक्ता स एव।

४. संहर्ताऽपि स एव।

५. परिनिर्वाता पुनः मुक्तौस्थैर्यवानपि स एव।

किन्तु मनीषो मनीषभगिनी च तं परमेश्वरस्वरुपं न स्वीकरोति। ततः विवादो वर्धतेऽस्माकम्। ततः तत्त्वनिर्णयार्थं समागतवन्त भवत् समीपं सर्वे वयम्।

यदा एव मुक्त्वा मनीषा तूष्णीका स्थिता, तदैव मुकेशः वदति। यदि न भवेदीदृशं तदा वेदाः कथंमित्येवं वदन्ति। ''जले विष्णु स्थले विष्णु, विष्णुःपर्वतमस्तके....'' इत्यादिना सर्वत्र परमेश्वरस्य व्यापकता प्रसिद्धा। ततः जगति नाऽन्यद् किञ्चिदपि, सर्वमेव विष्णुमयं परमेश्वरमयंमिति निर्णीतम्।

लालनः- श्रुणुत बाला!

सत्यं, परमेश्वरस्य स्वरूपं विलक्षीभूतम्। स्वल्पेनैव जनेन प्राप्यते तद्।

वेदोक्तं सर्वं पदं सापेक्षं।

मुकेशः यदि भवता वेदोक्तं कथितं स्वीक्रियते, तदा जगत्सु सज्जन-दुर्जन-चौर-शाठ्यलुण्टाकादिनां शुभाशुभभावानाञ्च व्यवहारः कथं चलिष्यति नैव चलिष्यतीति स्पष्टः दृश्यते। ततः वेदवाक्यं परमेश्वरस्य महत्वप्रख्यापकम्। न तु सर्वत्र परमेश्वरस्य, इश्वरस्य, विष्णोः, ब्रह्मणः वाऽवस्थानमिति स्वीकरणीयम्।

यदि जगन्निर्माता परमेश्वरः, भोक्ताऽपि स एव भवेद्, परिनिर्वाताऽपि स एव भवेद्, तर्हि तदा काऽऽपत्तिः संभवेत् तानहंमद्यरात्रौ भवतां सर्वेषां ज्ञापयिष्यामि। भवद्भिः समागन्तव्यम्। अधुनात्वहमनिवार्यकार्यप्रसङ्गमुरीकृत्य बहिर्गन्तुमना अस्मीति।

(अग्रे वर्तिष्यति)

## लेखप्रेषकेभ्यो विज्ञप्तिः

* ''श्रीनिःश्रेयसम्''पत्राय प्रेषणीयलेखेषु लेखाः पृष्ठस्यैकपार्श्वे लेखनीया-ऽक्षरपङ्क्तिमध्ये व्यवधानमावश्यकम् उभयपार्श्वयोरपि रिक्तस्थानं रक्षणीयम्। * स्वच्छाक्षरै र्लिखिता एव लेखाः प्रेषणीया अर्थाल्लेखेषु अक्षरस्वच्छता-ऽनिवार्या, अस्पष्टाऽशुद्धाक्षरलिखितलेखा न प्रकाशिष्यन्ते। * नव्यसृष्टलेखेषु व्याकरणछन्दोऽलङ्कारप्रमुखाणां शुद्धिरावश्यिकी। * ये लेखा निर्णितप्रकाशनदिनात् मासत्रयपूर्वं प्राप्स्यन्ते त एव लेखा प्रकाशिष्यन्ते। * तदनन्तरं-प्राप्तलेखा यदि यथोक्तपूर्वा भविष्यन्ति तर्ह्यागामिन्यङ्के प्रकाशिष्यन्त इति समवधेयम्। * गद्यपद्य लेखेषु सर्वेषु स्वरव्यञ्जनसन्धिः कर्तव्यैव। * अर्थभेदस्थान एव ''अवग्रहः'' कर्तव्यः। * अनुस्वारानुनासिकयोर्विकल्प-स्थानेऽनुनासिक एव कर्तव्यः, यत्र नित्यानुस्वार-स्तत्रानुस्वारकरणे न बाधा। * लेखप्रकाशनेऽप्रकाशनेच सम्पा-दकप्रवराणामेवाधिकारो भविष्यति। * अद्यतन समये येन लेखो लिखितो भवेत् तं प्रार्थयेऽहम् न कदाऽपि ''अज्ञातकर्तृकः'' इति कृत्वा प्रेषणीयो भवेद्, अज्ञात इति प्रयोगः प्राचीनेषु भवत्येव इति ज्ञातव्यम्।

-प्रकाशकः




संसारार्त्तिविभेदनैकप्रवणं,
**नि:श्रेयसं** गीयते,
सम्यग्ज्ञानसुरापगा वितनुतां,
**नि:श्रेयसं** भास्वरम्।
सद्धीवैभववारिधिः प्रविलसेत्,
**नि:श्रेयसेनाद्**भुतो,
वर्णन्याससुरम्यकाव्यरचना,
**नि:श्रेयसाया**ऽस्तु मे ॥१॥

वाक्शुद्धिं प्रतिभां नवां च लभते,
**नि:श्रेयसाद्** वाचकश्,
चत्वारो गुणखण्डका गुणकरा,
**नि:श्रेयसस्याङ्**गणे.
कीर्तिं मुक्तिकरी च सद्गुणकरी,
**नि:श्रेयसे** संभवेत्,
सद्भावैः समतादिकैः शुभकृते,
**नि:श्रेयस!** स्यात् सदा ॥२॥

**प्रकाशकम्**
**जगद्गुरु पू.आ.श्री**
**विजय हीरसूरीश्वरजी श्रुतज्ञानभवनम्**
पालडी-अहमदाबाद

Matiksha M.: 9820715236